July 1924.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

at the Vidya Vilas Press, Benares.

1924.

July 1924.

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 319.

गादाधरी।

श्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचिता।
श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या
श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता।

GÂDÂDHARÎ

A COMMENTARY ON DÎDHITI THE COMMENTARY
OF TATTVA CHINTÂMANI.

By Gadádhara Bhattâchârya Charavartin. With Text.

Edited by Nyâyâchârya Vâmâcharana Bhaṭṭâchârya
Professor Govt. Sanskrit College, Benares
and Nyáyacharya Sreérâma Sâstrî Bhândâri.
Professor of the same College,
BENARES.

FASCICULUS XIV-१४.

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.
AGENTS: PANDITA JYESHTHÂRAMA MUKUNDAJI, BOMBAY:
OTTO HARRASSOWITZ, LEIPZIG: GERMANY.
PROBSTHAIN & CO., BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1924.

विशेष्यतावच्छेदकपरतयोपवर्णनमकिञ्चित्करं विद्यमानधूमादिविषयकानुमितित्वस्यैव धूमादिजन्यतावच्छेदकत्वसम्भवात् विद्यमानधूमादिसाध्यकानुमितेरपि धूमादिजन्यत्वसम्भवेन व्यभिचारानवकाशात् ।

न चैवं तत्साध्यकाद्यनुमितेरपि तत्कालीनत्वावगाहिता स्यात्तत्प्रयोजकतज्जन्यत्वसत्त्वादिति वाच्यम् । तदवच्छिन्नविशेष्यकत्वप्रयोजकतल्लिङ्गकपरामर्शतदवच्छिन्नविशेष्यकपरामर्शान्यतरघटितसामग्रीजन्यत्वसहितस्यैव तज्जन्यत्वस्य तत्कालीनत्वभानप्रयोजकतयाऽतिप्रसङ्गवारणसम्भवात् । एवं पक्षतावच्छेदकसमानकालीनत्वस्यानुमितिविषयत्वे धूमादेः पक्षतावच्छेदकत्वेनैव धूमकालीनवान्हिसिद्धिनिर्वाहात् लिंगोपहितभानस्य निर्युक्तिकतापत्तिरित्यस्वरसबीजम् ।

करणतावच्छेदकरूपावच्छिन्नजन्यस्यैव व्यापारतेति नियमाभिप्रायेण शङ्कते । न चेति । परामृश्यमानत्वेनेति । विषयनिष्ठयावद्धर्मस्य ज्ञानकरणतावच्छेदकत्वे मानाभावादिति भावः । नियमं निराकुर्वन् समाधत्ते । व्यापारमिति । रूपान्तरेण । विषयत्वादिना । ताद्रूप्येण । परामृष्यमाणत्वेन । विरोधाभावात् । बाधकाभावात् ।

मतान्तरमाह । लिङ्गत्वेनैवेति । एवकारेण परामर्शस्यावच्छेदकत्वव्यवच्छेदः । तर्ह्यपरामृश्यमानात्कुतो नानुमितिरित्यत आह । परामर्शास्त्वति । तथा च व्यापाराभावान्नातिप्रसङ्ग इति भावः । अत्र उक्तनियमसत्त्वे लिङ्गत्वेनापि न कारणतासम्भवः तेन रूपेणापि परामर्शहेतुताया अप्रामाणिकत्वादित्यस्वरसः ।

(चि०) अत्रोच्यते अतीतानागतधूमादिज्ञानेऽप्यनुमितिदर्शनान्न लिङ्गं तद्धेतुः व्यापारपूर्ववर्त्तितयोरभावात् । न च विद्यमानं लिङ्गान्तरमेव तद्धेतुः । तदा तस्यापरामर्शात् । परामर्शाविषयस्य कारणताग्राहकाभावात् । भाविनि पक्षे व्यक्त्यैक्यमेव वा यत्र लिङ्गं तत्र लिङ्गान्तराभावाच्च । यदि च वर्त्तमानमेव तत्र लिङ्गं तदा वर्त्तमानवह्न्यनुमानोपपत्तिः । अथ भावि भूतं वा धूमादि न लिङ्गं किन्तु तत्प्राग-

भावस्तद्ध्वंसश्च वर्त्तमान एव तयोरपि वह्निसमानदेश-त्वादिति चेन्न । अतीतभाविदिनवृत्तितया निश्चिता-द्वर्त्तमानतया सन्दिग्धाद् धूमादनुमितौ हि न प्राग-भावध्वंसौ लिङ्गे, तयोः सन्दिग्धत्वात् । नापि धूम-स्तस्यावर्त्तमानत्वात् । किञ्च भूतभाविवर्त्तमानत्वा-विषयात् पर्वते धूम इति ज्ञानाद्यत्रानुमानं तत्र का गतिः ? सर्वत्र प्रागभावाद्यन्यतमवत्त्वं धूमाद्यत्यन्ता-भावाभाववत्त्वं वा लिङ्गमिति चेन्न । व्यर्थविशेषणत्वेन तेषामलिङ्गत्वात् । अन्यतमत्वाज्ञानेऽपि धूमज्ञानाद-नुमितिसत्त्वाच्च ।

(दी०) परामर्शाविषयस्येति । विनिगमनाविरहो विशेष-णत्वं वा तस्य हेतुत्वे बीजं न चेदमज्ञायमानेऽस्तीति भावः । न च विशिष्टस्य कारणत्वं गृह्णत् प्रमाणं विशेषणतावच्छेदका-वच्छेदेनापि तत्परिच्छिनत्ति तथा चापरामृष्यमाणस्यापि लि-ङ्गत्वेन हेतुत्वमविरुद्धमिति वाच्यम् । यतो हि लिङ्गत्वं न सा-ध्यव्याप्यत्वादिकं तदप्रसिद्धावपि गगनाद्यनुमानात् । ना-पि परामर्शविषयतावच्छेदकत्वमात्रं तथा सति वस्तुमात्रस्यै-वानुमितिहेतुतापत्तेः । न चेदं प्रामाणिकम्, तथाऽन्वयव्य-तिरेकादिविरहात् । अन्यथेच्छाशाब्दबोधादिकं प्रतीष्टसाधनत्वा-काङ्क्षादिकुक्षिनिक्षिप्तस्य जगत एव हेतुतापत्तेः । न वा वास्तवो विनिगमनाविरहोऽपि, प्रमेयत्वादिना ज्ञातादपि लिङ्गादनुमित्यापत्तेः । व्याप्तिपक्षधर्मत्वेन ज्ञायमानत्वोक्तौ च लाघवात्तादृशज्ञा-नत्वेनैव हेतुत्वात् ।

(गा०) मूले न लिङ्गं तद्धेतुरिति । व्यभिचारेण नानुमितिहेतुरि-त्यर्थः । व्यापारेति । व्यापारपदं स्वव्यापारपूर्ववर्त्तितापरं पूर्ववर्त्ति-

ता च स्वस्य पूर्वकालवर्त्तिता तथा च स्वस्य स्वव्यापारस्य च नियताव्यवहितपूर्ववर्त्तिताविरहादित्यर्थः । तद्धेतुरिति । अतीतादिलिङ्गज्ञानजन्यानुमित्यव्यवहितपूर्ववर्तीत्यर्थः । तदा । उक्तानुमित्यव्यवहितपूर्वकाले । तस्य । विद्यमानलिङ्गान्तरस्य । कारणताग्राहकाभावादिति । अनुमितेरज्ञायमानलिङ्गान्तरसमानकालीनतानवगाहित्वेन हेत्वसिद्ध्या उक्तानुमानस्य तत्कारणत्वाग्राहकत्वादिति भावः ।

ननु दर्शितानुमानात्परामृश्यमानलिङ्गस्य हेतुतासिद्धौ अपरामृश्यमानसाधारणलिङ्गत्वस्यैव तत्कारणतावच्छेदकत्वोपगमादपरामृश्यमानस्यापि लिङ्गस्य कारणत्वं दुर्वारमेवेत्याशंक्य दीधितिकृत्तस्याकारणत्वं व्यवस्थापयति। विनिगमनाविरह इति। लिङ्गतत्परामर्शयोः कस्य वा कारणत्वं कस्य वा तदवच्छेदकत्वमित्यत्रेत्यादिः । विशेषणत्वम् । परामर्शकारणताग्रहे विषयितया विशेषणत्वेन भासमानत्वम् । अस्य । लिंगस्य । इदम् । एतद्बीजद्वयम् । अज्ञायमान इति। तस्य विषयतया परामर्शरूपहेतुतावच्छेदकानाक्रान्ततया विशेषणत्वस्यासम्भवादिति भावः ।

यद्यपि तदा तस्यापरामर्शेऽपि विनिगमनाविरहेण परामर्शस्य हेतुतावच्छेदकत्वे कालान्तरीणपरामर्शविषयतयैव कारणत्वसम्भवः विशिष्टकारणप्राक्सत्तायाः फलोपधानप्रयोजकत्वेनातिप्रसङ्गवारणसंभवात् तत्कालीनपरामृश्यमानत्वेनाहेतुत्वात् । एवं तत्कालीनानुमित्युपधायकपरामर्शे विद्यमानताग्राहकप्रमाणाविषयकालांतरीणपरामर्शे विद्यमानलिङ्गस्याविशेषणत्वेऽपि लिङ्गपरामर्शसामान्येऽनुमितिसामान्यकारणताग्राहकप्रमाणविषयकालान्तरीणपरामर्शे विद्यमानलिंगस्य विशेषणतया द्वितीययुक्त्यापि तस्य कारणत्वमावश्यकमिति तदा तस्यापरामर्शादित्यादिमूलमसङ्गतं तथापि विशिष्टस्य नियतप्राक्सत्त्वं कारणताघटकं तत्रैव विशिष्टसत्त्वं फलोत्पत्तिप्रयोजकं अत्र च न तादृशस्य प्राक्सत्त्वनियम इति न विशिष्टापेक्षणीयताप्रयोजककारणतासंभवो लिंगस्येति तत्कालपरामृश्यमानत्वेन हेतुत्वं वाच्यम् । एवं विशिष्टकारणताग्राहकप्रमाणेन विशेष्यविशिष्टस्यैव विशेषणस्य नियतपूर्ववर्तिताघटितं कारणत्वं प्रत्याय्यते तथा च कालान्तरीणपरामर्शविषयतामादाय न विद्यमानलिङ्गस्य तादृशकारणतानिर्वाह इत्यत्र मूलतात्पर्यम् ।

न चैवं सति परामर्शाविषयमात्रस्य कारणताग्राहकाभावकथन-विरोधः, लिङ्गमात्रकारणताबाधकव्यभिचारस्यैव सत्त्वादिति वाच्यम्। कारणताग्राहकपदेनाव्यभिचारनिर्वाहकस्य तत्कारणतावच्छेदकवैशिष्ट्यस्यैव विवक्षितत्वात्। विशेषणतावच्छेदकावच्छेदेनापीति। विशेष्यवैशिष्ट्यमनन्तर्भाव्य केवलविशेषणतावच्छेदकतावच्छेदेनापीत्यर्थः। साध्यव्याप्यत्वादिकमिति। साध्यव्याप्यत्वविशिष्टपक्षधर्मतावत्त्वमित्यर्थः। तदप्रसिद्धाविति। साध्यव्याप्यत्वाप्रसिद्धावित्यर्थः। इदमुपलक्षणम्। व्याप्त्यादिभ्रमविषयादप्यनुमित्युत्पत्त्या व्याप्त्यादिविशिष्टत्वविशेषितस्य कारणत्वासम्भवेन व्याप्तेर्विषयनिष्ठविशेषणतायामवच्छेदकत्वासम्भवोऽपि द्रष्टव्यः।

वस्त्विति। वस्तुमात्रस्यैव परामर्शविषतावच्छेदकाधिकरणत्वाभावत्वादिमत्त्वादिति भावः। इदमुपलक्षणम्। परामर्शाविषयतावच्छेदकवज्ज्ञानत्वेनाहेतुत्वात्तदवच्छेदकत्वस्यापि विशेषणतावच्छेदकत्वाभावो बोध्यः। इदम्। उक्तलिङ्गत्वेन हेतुत्वम्। तथा। तेन रूपेण। अन्यथा। तेन रूपेणान्वयव्यतिरेकविरहेऽपि जनकज्ञानविषयतावच्छेदकत्वेन हेतुत्वे। अतीतादिलिङ्गज्ञानादनुमित्यपलापे परामृश्यमानत्वेन हेतुता सम्भवतीत्यत आह। न चेति। परामृश्यमानत्वं ज्ञायमानत्वमात्रं व्याप्तिपक्षधर्मताभ्यां ज्ञायमानत्वं वा? आद्यं दूषयति। व्याप्तीति। लाघवात्। अवच्छेदकलाघवात्। व्याप्तिपक्षधर्मताज्ञानस्य हेतुतावच्छेदकत्वे धर्मिणोऽधिकस्य निवेशेन गौरवादिति भावः।

(दी०) किं च कालान्तरीयतादृशज्ञानविषयादपि लिङ्गादनुमितिप्रसङ्गः। कारणतावच्छेदकावलीढकारणसत्त्वस्यैव कार्योत्पत्तिनियामकत्वान्न तु तद्विशिष्टसत्त्वस्यैव गौरवात्। इतोऽपि च प्रतिबन्धकाभावादीनां न कारणतावच्छेदकत्वं परामर्शविशिष्टसत्त्वस्य चात्र प्रयोजकत्वाभिधाने लाघवादावश्यकत्वाच्च परामर्शस्यैव तथात्वं तत्र च नातिप्रसङ्गशङ्काऽपि। अथैवं संयुक्तेन्द्रियादीन्द्रियसंयोगाद्योः कारणतायामपीदमेव विनिगमकं स्यादिति चेत्? स्यादेव यदि न स्याता-

मिन्द्रियादेः स्वतन्त्रान्वयव्यतिरेकौ । स्याच्च व्यापारेण व्यापारिणोऽन्यथासिद्धमानम् । न चानुमितिमात्रे तौ लिङ्गस्य, न चातीन्द्रियस्यापि तस्य परामर्शो व्यापार इति । अपि च चैत्रेण परामृश्यमानाल्लिङ्गादपरामृशतोऽपि मैत्रस्यानुमितिप्रसङ्गः । तत्तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषपरामृष्यमाणलिङ्गत्वेन हेतुत्वे चानन्तकार्यकारणभावप्रसङ्गः । इच्छाकृतिसुखदुःखस्मरणविशिष्टज्ञानशाब्दबोधादिषु ज्ञानेच्छाधर्माधर्मनिर्णयविशेषणभानपदार्थज्ञानादीनामिवानुमितौ परामर्शस्याप्येकार्थप्रत्यासत्त्या हेतुत्वान्नातिप्रसङ्गशङ्कापीति कृतं पल्लवितेन ।

(गा०):ननु व्याप्तिपक्षधर्मत्वविषयतानिरूपितविषयताविशिष्टज्ञानत्वेन हेतुत्वे विशेष्यविशेषणभावे विनिगमनाविरह इति तादृशविषयतासम्बन्धेन ज्ञानस्य कारणतावच्छेदकत्वमेवोचितमित्याशङ्कायां लिङ्गकरणतापक्षे दोषान्तरमाह । किञ्चेति । गौरवादिति । विशिष्टसत्त्वस्य विशेषणविशेष्योभयसत्त्वगर्भत्वादिति हृदयम् । इतोऽपि । कालान्तरे प्रतिबन्धकाभावविशिष्टात्प्रतिबन्धकसमवहितात्कार्यापत्तितोऽपि । न कारणतावच्छेदकत्वम् । अपि तु सहकारित्वमेव । अपिकारेण विनिगमनाविरहोऽपि सूचितः । अत्रापत्तिवारणाय विशिष्टसत्त्वमेव प्रयोजकमन्यथानुपपत्त्या वाच्यं तत्राह । परामर्शेति । तत्र च । परामर्शसत्त्वस्य प्रयोजकत्वे च । नातिप्रसङ्गशङ्कापीति । परामर्शशून्यकाले नानुमितिप्रसङ्गशङ्कापीत्यर्थः ।

एवं सति विषयेन्द्रियसंयोगस्य हेतुत्वकल्पे विषयसंयुक्तेन्द्रियस्यापि विनिगमनाविरहाद्धेतुत्वमित्यपि न स्यात्तत्रापि संयोगस्य कारणतावच्छेदकत्वे कालान्तरे संयुक्तादिन्द्रियात्संयोगविरहदशायां प्रत्यक्षापत्तिः । संयोगविशिष्टसत्त्वस्य प्रयोजकत्वाभिधाने च लाघवादावश्यकत्वाच्च संयोगसत्त्वस्यैव तथात्वमुचितमिति विनिगमकसम्भवादिन्द्रियं हेतुरेव न स्यादित्याशङ्कते । अथेति । यदि न स्यातामिति । तथा चेन्द्रियनाशे संयोगसत्त्वेऽपि प्रत्यक्षानुत्पादानुरोधेन तस्य हेतुत्वमिति भावः । इन्द्रियनाशे ततो द्वितीय-

यक्षणे तत्संयोगोऽपि नश्यति अधिकैकक्षणे प्रत्यक्षोत्पाद इष्यत एवेत्याशङ्क्याह । स्यान्नेति । व्यवधानम् । अन्यथासिद्धिः । तादृशीं हेतुताव्यवस्थापकयुक्तिं प्रकृते निराकरोति । न चेति । लिङ्गशून्ये धर्मिणि भ्रमात्मकपरामर्शसत्त्वेऽपि लिङ्गव्यतिरेकाद् भ्रमानुमिति-व्यतिरेक इत्यनुमितिविशेषे लिङ्गस्यान्वयव्यतिरेकौ सम्भवत इति अनुमितिमात्र इत्यत्र मात्रपदोपादानम् । तौ । अन्वयव्यतिरेकौ । अतीन्द्रियस्येति । तत्परामर्शजनकेन्द्रियसंयोगरहितस्येत्यर्थः । तेनातीतादिपरिग्रहः । परामर्शो व्यापार इति । तादृशस्य परामर्श-विषयीभूतस्यापि तदजनकत्वात् परामर्शस्य तदंशे लौकिकत्वा-भावादिति भावः ।

ननु विशिष्टसत्त्वं विशेषणावच्छिन्नविशेष्यनिरूपितं विलक्षणा-धिकरणत्वं न विशेषणसत्त्वगर्भमपि तु विशेषणसत्त्वानियतमेव तथा च विशिष्टसत्त्वस्य प्रयोजकत्वे क्वचिद्विशेषणसत्त्वस्य तदावश्यकत्वं तथा च पूर्वोक्तयुक्त्या ज्ञानस्य जनकतावच्छेदकत्वमेवोचितमित्या-शङ्क्य दोषांतरमाह । चैत्रेणेति । परामर्शहेतुतामते तत्पुरुषीयत्वानिवे-शेऽपि अतिप्रसङ्गमुद्धरति । इच्छेति । इच्छादिकार्यसप्तके यथासंख्यं ज्ञानादिकारणसप्तकस्यान्वयो बोध्यः । एकार्थप्रत्यासत्त्या । सामाना-धिकरण्यप्रत्यासत्त्या । नातिप्रसङ्गशङ्कापीति । कारणतावच्छेदकसम्ब-न्धेन स्वाधिकरण एव कारणस्य कार्यतावच्छेदकसम्बन्धेन का-कार्योत्पत्तिप्रयोजकत्वादिति भावः । मूले व्यक्त्यैक्यामिति । विद्यमा-नान्यव्यक्तिरित्यर्थः । तथा च विद्यमानपक्षे तन्मात्रवृत्तिरूपादि-व्यक्तेरेव लिङ्गत्वावच्छिन्नस्य विद्यमानतासम्भवात् पक्षस्य विद्य-मानतालाभेनातीतपक्षपरिग्रहः ।

(दी०) एकान्योन्याभावविशिष्टापरान्योन्याभावादिर्वर्त्त-मान एव सर्वत्र हेतुः सम्भवतीत्यत आह । यदि चेति । किं तु तत्प्रागभाव इति । तस्य च विरोधिकालावच्छेदेन व्याप्यत्व-ग्रहान्न तत्कालीनसाध्यसिद्धिरिति भावः ।

(गा०) भाविनीत्यादिना यत्र पक्षस्य भावित्वमतीतत्वं वा तत्र तत्पक्षवृत्तित्वघटितलिङ्गत्वावच्छिन्नस्य विद्यमानत्वासम्भवोक्तेस्तत्र

विद्यमानस्य लिङ्गत्वाप्रसक्तेर्यदि चेत्यसङ्गतमतः लिङ्गत्वशरीरे न पक्षवृत्तित्वं विशेषणविधया निविष्टं किं तूपलक्षणतयेत्याशयेन उक्तविद्यमानलिङ्गासम्भवं दूषयन् यदि चेत्यादिकमवतारयति दीधितौ । एकेति । ह्रदादिभेदविशिष्टह्रदान्यनिर्वह्निभेदादिरित्यर्थः । निर्वन्ह्यादिसामान्यभेदस्य वन्ह्याद्यनतिरिक्ततया विशिष्टविशेषभेदानुधावनं मूले वर्तमानवह्न्यनुमित्यापत्तिरिति अपरामृश्यमानस्याहेतुत्वेन विद्यमानलिङ्गस्यापरामर्शदशायामनुमितिमपलप्य तत्परामर्शदशायामेवानुमितेः स्वीकरणीयतया तद्विशिष्टपक्षानुयोगिकसाध्यवैशिष्ट्यस्यानुमितौ भानेन तत्समानकालीनो विद्यमानो वह्निरनुमितौ भासेतेत्यर्थः । वस्तुगत्याऽतीतानागतहेतुकानुमितौ अतीतानागतलिङ्गज्ञानस्यैव जनकत्वादतीतानागतवह्निरेव सिद्ध्यति तत्र यदि व्यभिचारवारणार्थमुक्तस्य वर्तमानलिंगस्य हेतुत्वमादृतं तदा ज्ञायमानस्यैव तस्य हेतुत्वं स्वीकरणियमिति तत्कालीनो वर्तमानोऽपि वह्निर्भासतामिति भावः । वर्तमानस्य प्रागभावादेर्लिङ्गत्वेऽपि कथितवर्त्तमानवन्ह्याद्यनुमानापत्तितादवस्थ्यादथेत्यादिशंकाया असङ्गतिरतस्तादृशापत्तिमुद्धरति दीधितौ । तस्य चेति । विरोधिकालावच्छेदेनेति । यदा यत्र धूमप्रागभावस्तदुत्तरं तत्र वह्निरिति विभिन्नकालमन्तर्भाव्य व्याप्तिग्रहादित्यर्थः । न तत्कालीनसाध्यसिद्धिः । न वर्त्तमानप्रागभावादिकालीनसाध्यस्यानुमितिरित्यर्थः । विभिन्नकालाघटितव्याप्तिविषयकपरामर्शस्यैव हेतुसमानकालतया साध्यभासकत्वादिति भावः ।

(चि०) अपि च न धूमप्रागभावादि लिङ्गं न वा तद्धीरनुमितिकारणम्, प्रागभावादीनां व्यर्थत्वात् आवश्यकधूमादिज्ञानादेवानुमितिसम्भवाच्च । किञ्च लिङ्गं नानुमितिमात्रे हेतुः, लिङ्गं विनाऽपि धूलीपटलाल्लिङ्गभ्रमेणानुमित्युत्पत्तेः । नापि लिङ्गं प्रमानुमितौ, परामर्शोऽनुमितिमात्रे हेतुः, तद्विशेषप्रमात्वाप्रमात्वाभ्यामेवानुमितितथात्वात् । यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वा-

त् । अथ परामर्शस्य प्रमात्वं विद्यमानलिङ्गविषयत्वं तथा चायातं लिङ्गस्य प्रमानुमितिहेतुत्वमिति चेन्न । भाविना भूतेन वा यदा कदाचिद्विद्यमानेनापि लिङ्गेन परामर्शप्रमात्वसम्भवान्नानुमितिपूर्वसमये तत्प्रमात्वानुरोधेन लिङ्गस्य सत्त्वं कारणत्वं वा । धूमकालीनवह्न्यनुमानं च यदा यत्र धूमस्तदा तत्र वह्निरिति व्याप्तिज्ञानादेव । अथ वा धूमकालः पक्षतावच्छेदकः पक्षतावच्छेदकधर्मसमानाधिकरणं च पक्षधर्मबलात् साध्यं सिध्यतीति धूमकालीनवह्निसिद्धिः ॥

(दी०) अपि चेत्याद्यभ्युपगमवादः । नियतसामानाधिकरण्यरूपाया व्याप्तेः प्रागभावादौ दुरपवादत्वात् । धूमप्रागभावत्वादिकं नावच्छेदकमिति चेत् ? किं चातः? न चैतदपि, व्याप्तेरवच्छिन्नत्वनियमात् परिशेषेण तस्यैव तथात्वात् अन्यथा धूमादिवृत्तिव्याप्तीनामपि धूमत्वादिकमवच्छेदकं न स्यात् । अथ स्वव्यापकसमानाधिकरणं व्याप्यं व्यापकत्वं च तद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वादिकं स च विशेषणं धर्मो व्याप्त्यवच्छेदकः ।

(गा०) धूमनिश्चयं विनाऽनुमितेरसिद्धिरतो मूले ऽतीतभाविदिनवृत्तितया निश्चितादिति । अतीतदिनावच्छेदेन भाविदिनावच्छेदेन वा पक्षवृत्तितया निश्चितादित्यर्थः । धूमस्य वर्तमानतया निश्चये प्रागभावध्वंसयोर्निश्चयसम्भवेन लिंगत्वसंभवाद्वर्त्तमानतया संदिग्धादिति । पक्षवृत्तितयाऽनिश्चितत्वेन प्रागभावादेरलिङ्गत्वमुक्का पक्षवृत्तितयाऽज्ञातत्वेनालिङ्गत्वस्थलमाह । किं चेति । भूतभाविवर्त्तमानत्वाविषयात् । पर्वते वर्त्तमानध्वंसप्रागभावप्रतियोगित्वाविषयकात् तत्कालावच्छिन्नपर्वतवृत्तित्वविषयकाच्चेत्यर्थः । धूमस्यावर्त्तमानत्वलाभाय वर्त्तमानत्वाविषयकत्वाभिधानम् । तस्य वर्तमानत्वे वर्त-

मानत्वाभानस्य अनुमित्यविरोधित्वात् ।

धूमप्रागभावादेर्लिंगत्वस्य विचारासहत्वात् अपि चेत्यादि-दूषणे मूलकृतोऽनिर्भरं दर्शयति । अपि चेत्यादीति । अभ्युपगम-वादः । धर्मिभेदेऽपि वैयर्थ्याभ्युपगमेनोक्तिः । साध्यसामानाधिक-रण्यावच्छेदकरूपायाः व्याप्तेः धूमप्रागभावत्वादेः सामानाधिकर-ण्यानवच्छेदकत्वे धूमप्रागभावादावसत्त्वसम्भवेनाह । नियतसामा-नाधिकरण्यरूपाया इति । शंकते । धूमप्रागभावत्वादिकमिति । नावच्छेदकमिति । गौरवेण व्याप्यतानवच्छेदकमित्यर्थः । तथा च न तदवच्छिन्नं लिंगमिति भावः । किं चेति । धूमप्रागभाव-त्वादेर्लिङ्गतानवच्छेदत्वेऽपि व्याप्तिपक्षधर्मतावत्त्वरूपलिंगत्वेन प्रा-गभावादेरनुमितिहेतुताया दुर्वारत्वादिति भावः । प्रौढ्या तत्त्व-स्यापि लिंगतावच्छेदकत्वं व्यवस्थापयति । न चैतदपीति । परिशे-षेण । धूमप्रागभावाद्यवृत्तिधूमत्वावच्छिन्नत्वबाधसहितावच्छिन्नत्वहे-तुना प्रागभावादिनिष्ठव्याप्तौ धूमप्रागभावत्वाद्यवच्छिन्नत्वासिद्धा । तस्यैव । धूमप्रागभावत्वादेरेव । तथात्वात् । तथात्वसिद्धेर्व्याप्यता-वच्छेदकत्वसिद्धेरिति यावत् । अन्यथा । व्याप्तेरवच्छिन्नत्वानियमे । व्याप्तिर्नाव्यभिचारितसामानाधिकरण्यं किं तु स्वव्यापकसाध्य-सामानाधिकरण्यं तथा च धूमप्रागभावादिनिरूपिता व्यापकता न प्रसिद्ध्यतीति न तस्य व्याप्यतेति शंकते । अथेति । अभावत्वादि-कमित्यादिना स्वसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदक-त्वत्वावच्छिन्नाभावपरिग्रहः । विशेषणमिति । व्यापकताघटकसा-मानाधिकरण्यप्रतियोगिनि विशेषणमित्यर्थः । व्याप्त्यवच्छेदक इति । व्यवह्रियत इति शेषः । एवं च व्याप्तेः स्वरूपसंबंधात्मकाकिं-चिदवच्छिन्नताया अप्रामाणिकत्वेऽपि न धूमत्वादीनां व्याप्यतावच्छे-दकत्वानुपपत्तिः ।

(दी०) न च धूमप्रागभावसमानाधिकरणाभावप्रतियोगि-तात्वादिकं प्रतियोगितावच्छेदकं, गौरवादपि तु धूमसमानाधि-करणाभावप्रतियोगितात्वादिकमेव लाघवात् । एवं च न धूमप्रा-गभावो व्याप्यो न वा तत्त्वं व्याप्यतावच्छेदकम् । अत एव प्र-मेयधूमत्वादिकमपि नावच्छेदकमिति चेत्? गतं तर्हि जातिसमनि-

यतोपाधिगुणादीनां व्याप्यत्वेन, लाघवेन गोजलादिनिष्ठाभावप्रतियोगितात्वादेरवच्छेदकत्वात् न तु सास्नास्नेहादिमन्निष्ठाभावप्रतियोगितात्वादेर्गौरवात्। प्रस्थितं च गोत्वादिवृत्तिधर्माणामवच्छेदकत्वेन, आपतितं च ते नीलधूमत्वादेर्व्याप्त्यवच्छेदकत्वेन नीलधूमसमानाधिकरणाभावप्रतियोगित्वाद्यभावस्यातिरिक्तत्वात् प्रमेयधूमत्वादिना वह्न्याद्यव्यापकत्वार्थमिव स्नेहत्वादिना व्याप्यत्वार्थमपि लघुगुरुसाधारणस्यावच्छेदकत्वस्योपादाने कुतस्तद्व्युदास इति। तथा चेति। तत्रैव क्लृप्तसामान्यकारणस्य विशेषरूपेण हेतुत्वं यत्र कल्प्यकारणतावच्छेदकमपेक्ष्य न गौरवम् अन्यथा विशेषकारणकलापविलयप्रसङ्गादिति भावः। धूमकालीनेत्यादि। सामानाधिकरण्ये कालविशेषस्यापि सम्बन्धघटकतया प्रविष्टत्वादित्यर्थः। यदा यत्रेति। कालिकदैशिकव्याप्तिद्वयज्ञानात्कालदेशयोः साध्यं सिध्यदसति बाधके लाघवादेकमेव सिध्यतीत्यपि वदन्ति। पक्षतावच्छेदकेति। पक्षतावच्छेदककालाद्यवच्छिन्नमित्यर्थः।

(गा०) न चेति। धूमप्रागभावसमानाधिकरणाभावप्रतियोगितात्वादिकं च न प्रतियोगितावच्छेदकमित्यन्वयः। तथा च तादृशप्रतियोगितात्वावच्छिन्नाभावरूपव्यापकत्वस्याप्रसिद्धिरिति भावः। गौरवावधिं दर्शयति। अपि त्विति। अत एव। प्रमेयत्वविशिष्टसमानाधिकरणाभावप्रतियोगितात्वादेर्गौरवेण प्रतियोगितानवच्छेदकत्वादेव। तर्हीति। स्वसमानाधिकरणाभावप्रतियोगितात्वस्य गुरुतयाऽनवच्छेदकत्वेन स्वस्वनिष्ठधर्मयोर्व्याप्यत्वतदवच्छेदकत्वाभाव इत्यर्थः। जातिसमनियतोपाधिगुणानाम्। गोत्वजलत्वादिसमनियतानां सास्नास्नेहादीनाम्। व्याप्यत्वेन। गोत्वजलत्वादिव्याप्यत्वेन गतमित्यनेनान्वयः। गोत्वादिवृत्तिधर्माणाम्। गोत्वत्वादीनाम्। अवच्छेदकत्वेन। व्याप्यतावच्छेदकत्वेन। स्वरूपत एव गोत्वादीनां प्रतियोगितावच्छेदकशरीरनिवेशसंभवेन गोत्वत्वादीनामनिवेशात्। आ-

पतितं चेति । नीलधूमत्वाद्यवच्छिन्नेऽपि स्वयं व्याप्त्युपगमादाधि- क्येनैव नीलधूमादिति प्रयोक्तुर्निग्रहस्य वक्ष्यमाणत्वान्नेत्युक्तम् । अस्य च वैयर्थ्यस्थले व्याप्तिमनंगीकर्त्तुरित्यादिः । अतिरिक्तत्वात् । धूमादिसमानाधिकरणाभावप्रतियोगितात्वावच्छिन्नाभावान्यत्वात् । तस्य न्यूनवृत्तित्वादिति भावः ।

ननु तादृशप्रतियोगितात्वादौ पारिभाषिकमभावप्रतियोगिता- वच्छेदकत्वं निवेशनीयं तच्च गुरुधर्मसाधारणं तथा च तादृशप्र- तियोगितात्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छि- न्नाभावत्वादिरेव पर्यवसितं व्यापकत्वमिति साक्षात्स्नेहादीनां व्या- प्यतोपपत्तिरित्यत आह । प्रमेयेति । यथा प्रमेयधूमत्वावच्छिन्नस्य वह्न्याद्यव्यापकतार्थं प्रतियोगितानवच्छेदकेत्यत्र पारिभाषिकमवच्छे- दकत्वं निवेशितं तथा प्रतियोगितात्वे तदवच्छेदकत्वे वा उक्तपारि- भाषिकावच्छेदकत्वविवक्षणे इत्यर्थः । तद्व्युदासः । धूमप्रागभावा- देरव्याप्यत्वव्युदासः ।

मूले लिंगं विनापि। पक्षे वह्निव्याप्यमात्रासत्त्वेऽपि । लिंगभ्रमेण । व्याप्तिभ्रमेण । परामर्शस्य प्रमात्वे विद्यमानलिङ्गविषयत्वमिति पा- करक्ते श्यामोऽयमिति धियः श्यामत्वांशे भ्रमत्वमित्यभिमानेन आयातं लिंगस्य प्रमानुमितिहेतुत्वमिति लिङ्गप्रमाया नियतपूर्व- वर्त्तित्वे लिङ्गस्यापि तथात्वादिति भावः ।

ननु लिङ्गस्य नियतपूर्ववर्तित्वेऽपि यत्सामान्य इत्याद्युक्तनि- यमात्प्रमापरामर्श एव प्रमानुमितौ हेतुरावश्यक इति कथमेषा श- ङ्केति शङ्कां निरसितुं भावं पूरयति दीधितौ । तत्रैवेति ।

न च यत्सामान्ये इत्याद्युक्तनियमात्प्रमानुमितौ परामर्शस्य हेतुतासत्त्वेऽपि तस्य कारणतावच्छेदकं विद्यमानलिङ्गविषयक- त्वमेवेति विशिष्टकारणताग्राहकमानेन लिङ्गस्यापि कारणत्वं ग्र- हीतव्यं तथा चायातं लिङ्गस्य हेतुत्वमिति मूलस्य नासङ्गतिरिति वाच्यम् । यतो विद्यमानलिङ्गविषयकपरामर्शत्वेन न हेतुत्वं गौर- वात् अपि तु लिङ्गपरामर्शत्वेन लाघवादिति मूलाभिप्रायेण दीधितिकृता भावो वर्णित इति । अन्यथा विशेषलघुरूपावच्छिन्ने कारणान्तरसम्भवेऽपि गुरुविशेषरूपेण सामान्यकारणस्यैव हेतु- त्वे विशेषकारणविलयप्रसङ्गात् ज्ञानादिविशेषप्रत्यक्षानुमित्यादौ स-

भिकर्षपरामर्शादिविशिष्टमनोयोगत्वादिनैव हेतुत्वापत्त्या सन्निकर्षपरामर्शादीनामहेतुत्वप्रसङ्गात् । तथा च लिङ्गत्वापेक्षया विद्यमानलिङ्गज्ञानत्वेनैव कारणतोचितेति भावः ।

मूले पक्षीयधूमकालीनत्वपर्यन्तस्य साध्यांशे भानविर्वाहाय यदा यत्रेत्यादिसामान्यव्याप्तिरादृता तत्र यत्तत्पदार्थस्याननुगततया पर्वते यदा धूमस्तदा तत्कालावच्छिन्नो वह्निरिति सहचारस्यागृहीतत्वेन तादृशवह्निसिद्धिर्न सम्भवतीत्यालोच्याह। सामानाधिकरण्य इति । कालविशेषस्य स्वसमानाधिकरणधूमकालस्य । सम्बन्धघटकतया । साध्यसम्बन्धघटकतया । तादृशकालावच्छिन्नसंयोगः । साध्यतावच्छेदकसम्बन्ध इति भावः ।

एतादृशसम्बन्धेन पर्वते वह्निसिद्धावेव फलतः पर्वतीयधूमकालीनवह्निसिद्धिः । एतावताऽपि अतीतानागतपक्षीयधूमकालीनत्वभानमादायार्थांतरनिरासासंभवात् तत्तद्धूमकालस्य पक्षतावच्छेदकत्वं मूलकारोऽङ्गीकरिष्यति ।

मतान्तरमाह । यदा यत्रेति । व्याप्तिद्वयज्ञानादिति । एवं च यदा धूमस्तदा वह्निर्यत्र धूमस्तत्र वह्निरिति मूलस्य योजना । कालदेशयोः पक्षीकृतयोरेतद्धूमकालपर्वतयोः कालिकदैशिकसंबंधाभ्यामिति शेषः । एकमेव । एकत्वविशिष्टमेव । अत्र कल्पे एतत्काले वह्निसिद्धेः पूर्वं एतत्कालीनवह्नित्वावच्छिन्नस्यासिद्ध्या तदभेदरूपमेकत्वं लाघवज्ञानादप्यनुमितिः कथं विषयीकरिष्यतीत्यस्वरससूचनाय वदंतीत्युक्तम् । पक्षतावच्छेदकसमानाधिकरणसाध्यसिद्ध्या नोद्देश्यासिद्धिः तदसमानकालीनस्यापि तत्समानकालसंबंधिपक्षसबंधितया तत्कालसामानाधिकरण्यसिद्धावपि साध्ये तत्कालीनत्वासिद्धेरतः समानाधिकरणपदमवच्छिन्नार्थकतया व्याचष्टे। पक्षतावच्छेदकेति । कालादीत्यादिना नितंबादिरूपदेशपरिग्रहः ।

(चि०) यत्तु व्यापाराभावान्न परामर्शः करणमिति तथैव किं तु व्याप्तिज्ञानं करणं परामर्शो व्यापारः । न च परामर्शस्य संस्कारो व्यापारः, परामर्शस्य चरमकारणत्वेन संस्कारोत्पादनसमये

ऽनुमित्युत्पादनात् । नापि तर्कः, व्याप्तिग्राहकस्य त्रिष-यपरिशोधकस्य वा तस्य तदजन्यत्वादिति ॥

इति परामर्शचिन्तामणिः ।

(दी०) किं तु व्याप्तीति । न च स्मरणात्मकपरामर्शस्थ-ले तदसम्भवः । तत्र व्याप्तिविशिष्टानुभवस्य संस्कारद्वारा परा-मर्शहेतुत्वात्, फलाजनकव्यापारस्य फलजनकव्यापारजनकत्वे विरोधाभावात् । न च विशिष्टपरामर्शत्वेन न कारणत्वं व्याप्तिज्ञा-नत्वेन च न तद्विशिष्टस्मृतिहेतुत्वं न वा विशिष्टस्मृतित्वेनानुमिति-हेतुत्वमिति वाच्यम् । व्याप्तिविषयकज्ञानत्वस्मृतित्वाभ्यां वि-शिष्टविषयकतत्त्वाभ्यां वा हेतुहेतुमद्भावेऽपि व्यापारव्यापारि-भावाविरोधात् । न हि द्वारद्वारिणोः फलजनकत्वं येन रूपेण तेन रूपेण तयोर्मिथो हेतुहेतुमद्भावेऽपि नियमो मानाभावात् । इ-न्द्रियतत्संयोगपदज्ञानपदार्थोपस्थित्यादिषु प्रत्यक्षशाब्दादिकरण-व्यापारेषु व्यभिचाराच्च । न चैवं धारावहनस्थले पूर्वपूर्वेषां विशे-षणज्ञानानामुत्तरोत्तरतद्द्वारा विशिष्टप्रत्यक्षं प्रति करणत्वापत्तिः । यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तत्र व्यापारत्वात् ।

(गा०)तदसंभवः। व्याप्तिज्ञानस्य कारणत्वासंभवः। अनुभवात्म-कपरामर्शे प्रत्येव विशेषणतावच्छेदकप्रकारकज्ञानविधया व्याप्तिप्रका-रकज्ञानस्य हेतुत्वादिति भावः । स्मरणे विशेषणतावच्छेदकविधया व्याप्तिधियोऽहेतुत्वेऽपि स्मरणस्य समानविषयकानुभवजन्यत्वात् प्राचीनानुभवात्मकपरामर्शस्य व्याप्तिज्ञानत्वेन कारणत्वमक्षतमेवेति समाधत्ते । तत्रेति ।

ननु तत्फलजनकव्यापारे तत्फलकरणव्यापारविधया तत्फ-लाजनकस्य न हेतुतेति नियमः । आचार्यमतेऽपि लिंगव्यापारतयाऽ-नुमितिजनके परामर्शेऽनुमित्यजनकस्यैंद्रियादिव्यापारस्य हेतुतया व्यभिचार इति तत्फलकरणव्यापारविधयेति । एवं चानुमित्यजन-कस्य संस्कारस्यानुमितिजनकपरामर्शे कथमनुमितिकरणस्य व्या-

परितया हेतुतंत्याशंकानियमं प्रतिक्षिपन्निरस्यति । फलाजनकेति ।

ननु स्मरणात्मकपरामर्शद्वारा प्राचीनपरामर्शस्य कारणत्वं तदा संभवति यदि तयोर्मिथः कार्यकारणभावावच्छेदकाभ्यां विशिष्य व्याप्तिविशिष्टपक्षज्ञानत्वतत्स्मृतित्वाभ्यां करणव्यापारभावः स्यात् । स्याद्वा कारणतावच्छेदकव्याप्तिज्ञानत्वाद्यवच्छिन्ननिरूपितजन्यतायामनुमितिजनकतायां च विशिष्टस्मृतित्वमवच्छेदकं यद्द्वारा यस्य यत्कारणं तन्निष्ठतत्फलजनकतावच्छेदकावच्छिन्नतत्फलकारणताकमिति नियमस्य तावतैव निर्वाहात् तदेव नेत्याशंकते । न चेति । न कारणत्वमिति । अपि तु व्याप्तिज्ञानत्वेनैवेति शेषः । विशिष्टस्मृतिहेतुत्वम् । विशिष्टस्मृतित्वावच्छिन्नहेतुत्वम् अपि तु व्याप्तिस्मृतित्वावच्छिन्नहेतुत्वमेवेति शेषः । नानुमितिहेतुत्वमिति । व्यभिचारादिति शेषः । व्याप्तिविषयकस्मृतिज्ञानत्वाभ्याम् । व्याप्तिविषयकस्मृतित्वव्याप्तिविषयकज्ञानत्वाभ्याम् । विशिष्टविषयकतत्त्वाभ्याम् । विशिष्टविषयकज्ञानत्वविशिष्टविषयकस्मृतित्वाभ्याम् । वाशब्दोऽनास्थायाम् ।

उक्तनियमस्य प्रामाणिकत्वे विरोधोऽस्त्येवेति तं प्रतिक्षिपति । न हीति । साधकाभावमुक्त्वा नियमे बाधकमप्याह । इंद्रियेति । इंद्रियं इंद्रियत्वेन चक्षुष्ट्वादिना वा प्रत्यक्षे कारणं व्यापारीभूततत्संयोगः तत्तत्संयोगत्वेन तद्धेतुः तेन तेन च रूपेण न तयोर्मिथः कार्यकारणभावः अपि तु संयोगत्वेन द्रव्यत्वेनैव । एवं शाब्दबोधे पदज्ञानं तत्त्वेन करणं व्यापारभूता पदार्थोपस्थितिः पदज्ञानजन्यार्थोपस्थितित्वेन हेतुः तयोस्तत्सम्बन्धिज्ञानत्वेन तत्तत्स्मृतित्वेन परस्परं हेतुहेतुमद्भाव इति व्यभिचारादित्यर्थः ।

न चैवमिति । एवम् । यद्यद्रूपेण मिथो न हेतुहेतुमद्भावः तत्तद्रूपेणापि करणव्यापारभावे । धारावहनस्थले । विशिष्टबुद्ध्यनन्तरं विशिष्टबुध्यन्तरोत्पादस्थले । पूर्वपूर्वेषाम् । प्रथमविशिष्टज्ञानजनकानाम् । उत्तरोत्तरतद्द्वारा । स्वस्वजन्यविशिष्टबुद्ध्यात्मकविशेषणज्ञानान्तरद्वारा । विशिष्टप्रत्यक्षं प्रति । विशिष्टबुद्धित्वेन तदुत्तरविशिष्टप्रत्यक्षं प्रति । करणत्वापत्तिः । विशेषणज्ञानत्वेन करणत्वापत्तिः ।

समाधत्ते । यमिति । यम् । यद्रूपावच्छिन्नम् । यस्य । यद्रूपावच्छिन्नस्य । यज्जनकत्वम् । यद्रूपावच्छिन्नजनकत्वम् । तस्यैव । तद्रूपावच्छिन्नस्यैव । तत्र । तद्रूपावच्छिन्ने । व्यापारत्वादिति । त-

था च विशिष्टज्ञानजनकतावच्छेदकविशेषणज्ञानत्वस्य कारणत्वा-भिमततद्रूपावच्छिन्नविशेषणज्ञानजन्यतावच्छेदकत्वाभावो न तद्रूपे-ण व्यापारताविरहप्रयोजकः अपि तु तद्रूपावच्छिन्नमजनयित्वाऽपि त-द्रूपावच्छिन्नस्य विशिष्टधीजनकत्वमेव उत्तरोत्तरविशिष्टबुद्धिव्यक्तिं प्रति पूर्वपूर्वविशिष्टबुद्ध्यात्मकविशेषणज्ञानव्यक्तिद्वारा तज्जनक-विशेषणज्ञानव्यक्तीनां तत्तद्व्यक्तित्वेन कारणत्वस्य च नापत्तिः व्यव-हितव्यक्तीनां तत्तद्व्यक्तित्वेन कारणताया अप्रामाणिकत्वात् अन्यथा उक्तनियमोपगमेऽप्यप्रतीकारादिति भावः ।

(दी०) यत्तु तथा नियमेऽपि न क्षतिः विशिष्टस्मृतेरपि व्या-प्तिविशिष्टज्ञानतया विशेषणव्याप्तिविषयकेण पूर्वानुभवेन संस्का-रेण वा जननाद्व्याप्तिविषयकत्वेनैव करणत्वादिति । तन्न । जन्य-त्वविशेषितेन संशयसाधारणेन व्याप्तिविशिष्टज्ञानत्वेन तज्ज-न्यत्वात् नित्यसाधारणेन च व्याप्तिविशिष्टवैशिष्ट्यावगाहिपक्ष-निश्चयत्वेनानुमितिहेतुत्वात् । यदि च विशिष्टव्याप्तेःप्रथममनुपस्थि-तावपि विशेष्ये विशेषणं तत्रापि विशेषणमिति रीत्या परामर्शाद-नुमितिस्तदा नियतपूर्वोपस्थितिकपदार्थोपस्थितेरेव कारणत्वं वा-च्यम् । यत्तु परामर्शजनकत्वेन तत्तद्विशेषणज्ञानानां कारणत्वमिति तन्न । अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव तथात्वग्रहेणान्यथासिद्ध-त्वात् । न च तत्र फलाननुगुणमन्यं प्रतीति वाच्यम्, गौरवा-त् । नचैवं भ्रमिजनकत्वलक्षणं दृढत्वमपि दण्डे घटजनकताव-च्छेदकं न स्यादिष्टत्वात् । दण्डत्वेनैव तथात्वात् । क्वचिद्घटानुत्पादो भ्रमिरूपद्वाराविरहात् । क्षुद्रचक्रभ्रमिजननसमर्थान्महाचक्रसमव-हितादण्डाद्घटानुत्पत्तौ तत्प्रयोजकताया आवश्यकत्वात् । भ्रमि-विशिष्टत्वेन च जनकत्वे चक्रादीनामपि पृथक्कारणत्वं न स्यात् । न स्याच्च घटार्थितया दण्डे निष्कम्पा प्रवृत्तिः, प्रथमं भ्रमेरुपधा-नानिर्णयात् ।

(गा०)तथा नियमाभ्युपगमेऽपि व्याप्तिज्ञानपरामर्शयोः करणव्यापारभावमुपपादयतां परामर्शस्य व्याप्तिविशिष्टज्ञानत्वेन व्यापारताभिमानिनां मतमुपन्यस्यति । यत्त्विति । न क्षतिः । न प्रकृते क्षतिः। व्याप्तिविशिष्टज्ञानतयाऽनुभवेन संस्कारेण वा जननादित्यन्वयः । विशिष्टज्ञानतयेति । तृतीयार्थोऽवच्छिन्नत्वम् । अनुभवेनेत्यादौ तृतीयार्थो निरूपितत्वं जननं जन्यता तथा चानुभवादिनिरूपितविशिष्टज्ञानत्वावच्छिन्नजन्यताश्रयत्वादित्यर्थः । स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति साक्षाद्विशेषणधियः पूर्ववर्त्तितया स्मृतिसाधारणविशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानहेतुत्वमिति मते पूर्वानुभवेनेति। तद्रूपावच्छिन्नं प्रति विशेषणविषयकत्वेन संस्कारादिसाधारणेन हेतुतेति मतमनुसृत्य संस्कारेण वेति । विशिष्टबुद्धिं प्रति विशेषणविषयकत्वेन हेतुत्वे प्रकृते व्याप्तिज्ञानत्वेन करणत्वमुक्तनियमसत्त्वे न निर्वहतीत्युक्तं तन्मते करणतावच्छेदके ज्ञानत्वं परित्यजति । व्याप्तिविषयकत्वेनैवेति । व्यापारनिष्ठकरणजन्यतावच्छेदकेऽधिकनिवेशं दर्शयति । जन्यत्वविशेषितेनेति । जन्यनित्यसाधारणधर्मस्य जन्यतानवच्छेदकत्वादिति भावः ।

तत्र न्यूनतां दर्शयति । संशयसाधारणेनेति । तथा च निश्चयत्वानिवेशान्न्यूनता । व्याप्तिविशिष्टज्ञानत्वेनेत्यतोऽपि विशिष्टवैशिष्ट्याप्रवेशान्न्यूनता लभ्यते । तन्निष्ठानुमितिजनकतावच्छेदके न्यूनताधिक्ये दर्शयति । नित्यसाधारणेनेतिनित्यसाधारणेनेत्यनेन जन्यत्वाप्रवेशो दर्शितः। नित्यस्यापि स्वरूपयोग्यस्य सहकारिविरहात्फलानुपधायकत्वमिति भावः। व्याप्तिप्रकारकत्वेन करणत्वोपगमे विशिष्टवैशिष्ट्यावगाहितायाः परामर्शनिष्ठानुमितिजनकतावच्छेदककोटिनिवेशनेनाधिक्यं विशिष्टवैशिष्ट्यावगाहितायाः विशेषणतावच्छेदकप्रकारकत्वावच्छिन्ननिरूपितजन्यतावच्छेदकत्वादिति संशयान्यत्वनिवेशादेवाधिक्यम् । समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावे पक्षविषयकत्वनिवेशाधिक्यं चेत्यवधातव्यम् ।

प्रथमम् । परामर्शपूर्वम् । विशेषणतावच्छेदकविशिष्टविशेषणज्ञानं विना विशिष्टवैशिष्ट्यबोधासंभवादाह । विशेष्ये विशेषणमिति । तादृशबोधे विशेषणज्ञानविधया प्रत्येकपदार्थोपस्थितेरेव हेतुतया विश-

कलितानां व्याप्तिघटकपदार्थानामुपस्थित्या परामर्शसंभवादिति भावः । व्याप्तिघटकपदार्थांशे निश्चयत्वपर्यन्तानिवेशेन लाघवाद् व्याप्तिविशिष्टवैशिष्ट्यबोधत्वेनैवानुमितिहेतुता व्याप्त्याद्यंशे संशयाकारबुद्धेश्च न तद्विशिष्टवैशिष्ट्यावगाहिता तत्पूर्वं तद्विशिष्टवैशिष्ट्यबोधजनकतन्निश्चयासत्त्वान्नियमात् । यत्र च विशेष्ये विशेषणमित्यादिरीत्या परामर्शस्तत्र तदनंतरोत्पन्नविशिष्टवैशिष्ट्यावगाहिपरामर्शादेवानुमितिरित्युक्तिसंभवाद्यदि तदेत्युक्तम् ।

इदमापाततः । विशिष्टवैशिष्ट्यविषयितायाः कारणतावच्छेदके निवेशेऽपि व्याप्त्यभावप्रकारकं ज्ञानं जायतामितीच्छाधीनव्याप्त्यंशेऽनाहार्यसंशयात्मकविशिष्टवैशिष्ट्यावगाहिबोधस्य दुर्वारत्वात् तदंशे निश्चयत्वंनिवेश आवश्यकः

न च तादृशेच्छासत्त्वे तद्घटितसामग्र्या बलवत्त्वात् व्याप्तेरेव भानासंभवात्कथं संशयः, व्याप्तिव्याप्त्यभावोभयप्रकारकं भानं जायतामितीच्छायां व्याप्तेरपि भानसंभवादिति ।

नियतपूर्वोपस्थितिकेति । तादृशपदार्थाः । व्याप्तिघटकाभावत्वादयः । करणत्वम् । तत्तत्पदार्थज्ञानत्वेन वाच्यम् । परामर्शजनकत्वेनेति । अभावत्वज्ञानत्वादिना हेतुत्वे नानाकारणताप्रसंगात् विनिगमनाविरहेण एकमात्ररूपेण हेतुत्वासंभवात् । परामर्शजनकत्वस्य सर्वसंग्राहकतया विनिगमनाविरहानवकाशादिति भावः ।

अन्यं प्रति पूर्ववर्त्तित्वं गृहीत्वैवेति । परामर्शजनकत्वरूपावच्छेदकग्रहस्य परामर्शपूर्ववर्तित्वग्रहात्मकतया तं विना तेन रूपेणानुमितिपूर्ववर्तित्वग्रहासंभवादिति भावः । फलाननुगुणमिति । तथा च परामर्शस्यानुमित्यनुगुणतया तत्पूर्ववर्तित्वग्रहं विना परामर्शजनकत्वेनानुमितिपूर्ववर्तित्वाग्रहेऽपि न तेन रूपेणान्यथासिद्धिरिति भावः । एवम् । अन्यथासिद्धिशरीरे सामान्यत एवान्यं प्रतीत्युक्तौ । न स्यादिति । उक्तान्यथासिद्धिनिरूपकत्वादिति भावः । इष्टापत्त्या समाधत्ते । इष्टत्वादिति । तदा केन रूपेण घटजनकतेत्याकांक्षायामाह । दण्डत्वेनेति ।

नन्वेवं भ्रमिजननायोग्यात्कोमलादपि दंडाद्धट उत्पद्येतात आह । क्वचिदिति । कोमलदंडे घटार्थिनोऽप्रवृत्तिश्च फलानुपधाननिश्चयादिति भावः । भ्रमियोग्यत्वेन हेतुत्वेऽपि भ्रमिविरहस्य घटानु-

त्पादप्रयोजकतां दर्शयति । क्षुद्रेति । दंडात् । क्षुद्रदंडात् । तत्प्रयोजकतायाः । भ्रमिविरहस्य घटानुत्पादप्रयोजकतायाः । आवश्यकत्वात् । भवतापि स्वीकारात् ।

ननु भ्रम्युपहितत्वेन हेतुतोच्यते तथा च भ्रमिविरहस्य न घटानुत्पत्तिप्रयोजकत्वमुपेयते उक्तस्थले भ्रम्युपहितदण्डव्यतिरेकेणैव घटानुत्पादसंभवादित्यत आह । भ्रमिविशिष्टत्वेनेति । पृथक् । चक्रत्वादिना । भ्रम्युपधानसंदेहेन सकंपप्रवृत्तिसंभवादाह । निष्कंपेति । तादृशप्रवृत्तौ स्वरूपयोग्यतानिश्चयस्य हेतुत्वादिति भावः । प्रथमम् । प्रवृत्तिपूर्वम् ।

(दी०) अस्तु वा भ्रमिप्रयोजकोऽन्वयवविशेषादिरेव तथा, प्रथमोपस्थितत्वादावश्यकत्वाच्च । अन्यथा घटजनकत्वेनैव भ्रमिजनकतां किमिति न रोचयेः । अत एव सौवर्णवैणवादिदण्डेष्वनुगतदण्डत्वाविरहेऽपि न क्षतिः । किं चैवं प्रवृत्तिं प्रति इष्टसाधनताज्ञानजनकत्वेन शब्दादीनां शाब्दबोधं प्रति च तज्जनकाकाङ्क्षादिज्ञानजनकत्वेनानुमानसंस्कारतत्तद्विशेषणज्ञानादीनां कार्यान्तरं प्रति च तज्जनकतत्तत्पदार्थकारणानां तत्तत्पदार्थकारणत्वेन हेतुत्वप्रसङ्गः । तज्जनकत्वेन हेतुत्वे तत्त्वेनैव हेतुत्वं प्रथमोपस्थितत्वादावश्यकत्वाल्लाघवाच्चेति चेत् ? किमिदं प्रकृते पाणिपिहितम् ? इदं पुनरिहावधेयम्—विशिष्टविषयकत्वेन कारणत्वे केवलविशेषणादिविषयकत्वेन न हेतुत्वं तदवच्छिन्नकार्यजनकतावच्छेदकान्तराव्यापकरूपेणैव तदवच्छिन्नं प्रति जनकत्वात् । दर्शयिष्यते हि तथाऽन्यथासिद्धत्वम्, अन्यथा घटत्वाद्यवच्छिन्नं प्रति कपालतत्संयोगादीनां जन्यत्वविशेषितेन शुद्धेन वा द्रव्यत्वगुणत्वादिना विशिष्टवैशिष्ट्यबोधं प्रति च विशेषणतावच्छेदकविषयत्वेन हेतुत्वप्रसङ्गात् । अनुमितिशाब्दबोधचिकीर्षादिकं प्रति च परामर्शाकाङ्क्षाकृतिसाध्यत्वादिज्ञानविषयविशिष्टाविशिष्टतत्तत्पदार्थविषयत्वेन हेतुत्वेऽन-

न्तकार्यकारणभावप्रसङ्गाच्च ।

(गा०) ननु सौवर्णादिदंडसाधारणं दंडत्वंऽन जातिः जातिसंकरादिति भ्रमिजनकत्वमेव तादित्यत आह। अस्तु वेति। भ्रमिप्रयोजकः। भ्रमिजनकतावच्छेदकः। अवयवसंयोगविशेषादिरिति। दार्ढ्याख्यविजातीयावयवसंयोगादिरित्यर्थः। तथा। घटजनकतावच्छेदकः। तस्य त्ववच्छेदकत्वमुभयत्रैव स्वसमवायिसमवेतत्वसंबंधेन समवायेनैव वा दंडावयवानामेव तेन रूपेण हेतुत्वोपगमात् । दंडावयविनोऽहेतुत्वेऽपि क्षतिविरहात् । यत्र च परस्परसंबद्धैर्बहुभिः कोमलदंडैर्नुन्नं चक्रं भ्राम्यति तत्र तेषामेव संयोगे तादृशी जातिरिति । तत्र तेषां तेन रूपेण हेतुता तत्र तदवयवानामपि तादृशसंयोगस्याऽऽवश्यकत्वात् । परंपरासंबंधेन तेषां दंडादावपि सत्त्वेन तेन संबंधेन हेतुतावच्छेदकत्वपक्षेऽप्यदोषः ।

अथैवं तादृशजातेर्द्रव्यानारंभकसंयोगसाधारणतया तदारंभकतावच्छेदकजात्या संकरप्रसङ्गः । तत्र तावद्दंडे दंडांतरारंभोपगमेऽनुभवविरोधात् । दारुवेण्वाद्यारब्धस्य दारुवेण्वादित्वनियमेन दारुत्ववेणुत्वादिजातीनां संकरमिया कोमलदारुवेण्वादिसंवलनस्थलेऽवयव्यंतरोत्पादोपगमासंभवाच्च । अत एव गृहादीनां नैकावयवत्वमिति सिद्धांतः ।

एतेन कोमलदंडैकत्वव्यावृत्तैकत्वगतजातिभेद एव भ्रम्यादिप्रयोजक इत्यपि निरस्तम्। न चानारंभकसंयोगेष्वेव भ्रमिजनकघटप्रयोजिका जातिरुपेयते एकैकदण्डात्तदुत्पादस्थले च तदेकावयवापरावयवयोः संयोगस्य द्रव्यानारंभकतया तस्यैव घटाद्युत्पादप्रयोजकत्वोपगमादिति नारंभकतावच्छेदकजात्या संकरप्रसंग इति वाच्यम् । एवमपि यत्र यादृशकोमलदंडत्रयसंवलनादेव घटादूयुत्पत्तिर्न तु तदुभयमात्रसंवलनात्तत्र तदुभयसंवलनादपि तदुत्पादप्रसंगो दुर्वारः । व्यक्त्यंतरसंयोगसहकारेण तदुभयसंयोगात्तदुत्पादनिर्वाहाय तादृशसंयोगे जातिभेदोपगमस्यावश्यकत्वात् ।

एतेन दंडचक्रसंयोग एव तादृशी जातिस्तद्वत्त्वेन घटादिजनकतेति निरस्तम् । दंडांतरसंयोगसापेक्षयादृशचक्रदंडसयोगाच्चक्रं भ्राम्यति तन्निरपेक्षतत्संयोगव्यक्तितो घटाद्यापत्तेर्दुर्वारत्वात् । प्रथम-

तच्चक्रसंयोगादिमत्त्वानिश्चयाभावेन प्रवृत्त्यनुपपत्तेश्चेति चेत् ? तर्हि कोमलदंडादिसाधारणेन पृथिवीत्वेनैव भ्रम्यादिजनकता स्वीक्रियते अतिप्रसंगभंजकः सहकारिविरह एव प्रवृत्त्यतिप्रसंगमपि फलानुपधाननिश्चय एव निराकरोति । यदि च बलवता मारुतेनाभिहतमपि चक्रं भ्रांत्वा घटं जनयति तदा स्पर्शवत्त्वेन द्रव्यत्वेन वा तथात्वं मूर्तत्वजातिपक्षे तु तथैव,तत्परिग्रहायैवादिपदमुपात्तमिति बोध्यम् । एवकारेण भ्रमिजनकत्वं व्यवच्छिद्यते । प्रथमोपस्थितत्वादिति । जनकताग्रहे तदवच्छेदकग्रहस्यापेक्षणीयतया भ्रमिजनकतामपेक्ष्य तदवच्छेदकस्य प्रथममुपस्थितत्वादित्यर्थः । आवश्यकत्वादिति । नियतपूर्ववर्त्तितावच्छेदकधर्मस्यैव जनकतात्मकतया भ्रमिजनकताया घटजनकतावच्छेदकत्वे भ्रमिजनकतावच्छेदकस्य तथात्वावश्यकत्वादित्यर्थः । तथा च जनकतात्वेन तादृशधर्मस्य तथात्वापेक्षया विशिष्य तथात्वे लाघवमिति भावः ।

अथागत्या भ्रमिं प्रति अत्यंताजनकसाधारणेन स्पर्शवत्त्वादिना हेतुत्वेऽपि घटं प्रति न तेन रूपेण हेतुत्वमुपेयते अत्यंताजनकव्यावृत्तेन भ्रम्युपधायकत्वेनैव हेतुतासंभवात् कथंचिद्भ्रम्युपधायकनिश्चयदशायामेव घटार्थिनां निष्कंपाया अन्यदा तदर्थिनां सकंपाया प्रवृत्तेरुपगंतव्यत्वादित्यत आह । अन्यथेति । अन्यथा । अत्यंताजनकव्यावृत्तये एकजनकत्वेनापरजनकत्वोपगमे । घटजनकत्वेनैवेति । विनिगमनाविरहादिति भावः । अन्योन्याश्रयेण च परस्परजनकत्वेन उभयजनकता न संभवतीति बोध्यम् ।

दण्डत्वेन कथितहेतुतामतेऽनिर्भरबीजं स्वयमेवाह । अत एवेति । अनुगतदंडत्वविरहेऽपि सुवर्णत्ववेणुत्वादिजातिसंकीर्णतया साधारणदंडत्वजातिविरहेऽपीत्यर्थः । ननु अन्यं प्रतीत्याद्यन्यथासिद्धिकवलिततया घटजनकत्वेन भ्रमिजनकता न संभवति तत्र चान्यस्मिन्फलाननुगुणत्वविशेषणाद्घटं प्रति भ्रमिजनकत्वेन हेतुत्वमविरुद्धमित्याशंक्य फलाननुगुणत्वविशेषणप्रतिक्षेपाय प्रतिबंदिं दर्शयति । किं चेति । एवम् । फलाननुगुणकार्यजनकत्वेनानन्यथासिद्धत्वे । कार्यांतरम् । घटादिकम् । तत्तत्पदार्थकारणानाम् । दंडचक्रकुलालादिकारणानाम् । तज्जनकत्वेन । इष्टसाधनताज्ञानादिजनकत्वेन । हेतुत्वे ।

प्रसक्ते । तत्त्वेनैव । इष्टसाधनताज्ञानत्वादिनैव । लाघवाच्चेति । न तु तज्जनकत्वेन गुरुतया अन्यथासिद्धिनिरूपकत्वादिति शेषः । प्रकृते । दण्डघटयोर्हेतुहेतुमद्भावस्थलं ।

मनसोऽनुमितिकरणतां व्यवस्थापयिष्यन्मूलोक्तव्याप्तेस्तद्घटकपदार्थानां च धियोऽनुमितिकरणत्वं निराकरोति । इदं पुनरित्यादिना । तत्तद्व्यक्त्यादिजनकतावच्छेदकतत्तद्व्यक्तित्वादिव्यापकसामान्यधर्मेण सामान्यधर्मावच्छिन्नतत्तद्व्यक्त्यादिहेतुत्वात्तदवच्छिन्नत्वद्वयं फलतः कार्यताविशेषणम् । स्वस्यापि स्वव्यापकत्वादवच्छेदकान्तरेति ।

न च व्याप्तिज्ञानकारणतायां विभिन्नपक्षसाधारणधूमनिष्ठताद्दशव्याप्तिज्ञानाव्यवहितोत्तरवह्न्यनुमितित्वं परामर्शकारणतायां तु तत्पक्षकतत्साध्यकपरामर्शाव्यवहितोत्तरानुमितित्वं कार्यतावच्छेदकमिति कथमेककार्यतावच्छेदकावच्छिन्नं प्रति द्वयोर्जनकत्वमिति वाच्यम् । धूमनिष्ठव्याप्तिज्ञानस्य पर्वतपक्षकानुमितिं प्रत्येव नियतव्यापाराभावेनाकरणत्वात् ।

(१)न च धूमव्याप्तिज्ञानाव्यवहितोत्तरं तत्पक्षकतदनुमितित्वं तथाऽस्तु तथाऽपि नैकमुभयजन्यतावच्छेदकमिति वाच्यम् । वह्निव्याप्यो धूमो वह्निव्याप्यालोकवान् पर्वत इति समूहालंबनपरामर्शजन्यानुमितौ धूमव्याप्तिज्ञानकरणिकायां व्यभिचारात् व्यापारसंबंधेन तदभावात् तस्माद् धूमपरामर्शाव्यवहितोत्तरपर्वतपक्षकवह्न्यनुमितित्वं परामर्शस्येव तस्यापि जन्यतावच्छेदकं वाच्यं तथा सतीदमिति भावः।

ननु जनकतावच्छेदकांतरव्यापकस्यापि नियतपूर्ववर्तितावच्छेदकत्वान्न कथं तस्य जनकतावच्छेदकत्वमित्यत आह । दर्शयिष्यते हीति । तथा । व्यापकरूपेण । अन्यथासिद्धत्वमिति । तथा चान्यथासिद्धिनिरूपकत्वान्न तस्य तथात्वमिति भावः । व्यापकरूपेणान्यथासिद्धत्वे युक्तिमाह । अन्यथेति । नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियमपक्षमवलंब्याह । जन्यत्वविशेषितेनेति । तादृशानियमानभ्युपगमपक्षमवलंब्याह । शुद्धेन वेति । हेतुत्वप्रसंगादिति । नियतपूर्ववर्तिताया अन्यथासिद्ध्यन्तराविरहस्य च तद्रूपावच्छिन्नेऽपि सत्त्वादिति भावः ।

---

(१) 'न चेत्यादिर्भाव' इत्यन्तः पाठः पुस्तकान्तरे नास्ति ।

विशिष्टाविशिष्टेति । विशिष्टपदार्थोऽभावादिः अविशिष्टपदार्थोऽभावत्वादिः ।

(दी०) न चात्र करणान्तरासम्भवादगत्या परामर्शजनकज्ञानस्य तथात्वं कल्प्यते । चिकीर्षां प्रत्यपि कृतिसाध्यताज्ञानजनकज्ञानस्य तथात्वापत्तेः । तत्र मन एव करणमिति चेत् ? इहापि तदेवास्तु । मनोऽसाधारणकरणकज्ञानत्वेन मानसत्वापत्तिरिति चेत् ? चिकीर्षादिसाधारणतत्करणकत्वस्यैव ज्ञानत्वविशेषितस्यापि तस्याप्रयोजकत्वात् । किं तर्हि मानसत्वे प्रयोजकमिति चेत् ? किं नाम प्रयोजकम् ? कारणं चेत् ? न किञ्चित्, कार्यं चेत् ? तत्प्रत्यक्षम् । व्यापकं चेत् ? प्रमेयत्वादि । व्याप्यं चेत् ? तत्सामग्रीजन्यत्वादि । तदवच्छिन्नोत्पत्तिनियामकं चेत् ? तत्सामग्री । करणाभेदे कथं कार्यवैजात्यमिति चेत् ? सामग्रीवैलक्षण्यात् । यथा मनःकरणकानामेव चिकीर्षासुखादीनाम्, यथा वा अग्निकरणकानां पाकजानाम् । कथं तर्हि प्रमाणविभाग इति चेत् ? करणे विशेषकक्रियावैजात्यविशेषादिति विभाव्यताम् ।

(गा०) परामर्शजनकज्ञानस्य । व्याप्त्यादिज्ञानस्य । तथात्वम् । करणत्वम् । चिकीर्षां प्रत्यपीति । तत्रापि करणांतरासम्भवादित्याशयः । चिकीर्षायां करणान्तरसम्भवमाशङ्कते । तत्रेति । इहापि । अनुमितावपि । तदेवास्तु । मन एव करणमस्तु । शङ्कते । मनोऽसाधारणेति । चाक्षुषादेरपि इन्द्रियत्वेन मनःकरणकत्वात्तद्वारणायासाधारणपदम् । मनोऽसाधारणकरणकत्वं च मनस्त्वावच्छिन्नकरणताकत्वं ज्ञानत्वनिवेशाच्चिकीर्षासुखादिव्यावृत्तिः । अप्रयोजकत्वात् । निष्प्रमाणकमानसत्वव्याप्तिकत्वात् । न किञ्चिदिति । मानसत्वस्य जातित्वेनाजन्यत्वादिति भावः । करणभेद एव कार्यवैचित्र्यमिति नियमाभिमानेन शङ्कते । करणाभेद इति । कार्यवैचित्र्यम् । अनुमितिमानसचिकीर्षादिवैजात्यम् । सामग्रीभेद एव कार्यवैजात्यप्रयोजको न तु करणभेदमात्रमिति समाधत्ते । सामग्रीति । एतदेव दृष्टान्तेन

दृढयति । यथेति । पाकजानां रूपरसादीनां करणाभेदेऽपि साम-
ग्रीवैजात्यात् कार्यवैजात्यमित्यनुषंगेणान्वयः । तर्हि । मनसोऽनुमिति-
करणत्वे । कथं प्रमाणविभागः । प्रत्यक्षप्रमाणतः पार्थक्येनानुमान-
प्रमाणस्य परिगणनं मनस इन्द्रियत्वेन प्रत्यक्ष एवांतर्भावादिति
भावः । विशेषकेति करणताभेदकेत्यर्थः । एतच्च क्रियावैजात्यवि-
शेषणम् । क्रियावैजात्यात् । प्रत्यक्षप्रमितितोऽनुमितिवैजात्यात् । क-
रणताभेदस्यैव प्रमाणपार्थक्यप्रयोजकत्वादिति भावः ।

अथ वा करणविशेषकेति । करणविशेषणीभूतायाः क्रियायाः पा-
र्थक्यादित्यर्थः । तथा च क्रियारूपविशेषणभेदेनैव विशिष्टभेदव्यप-
देश इति भावः ।

(दी०) अपरे तु व्याप्तिज्ञानत्वेन विशिष्टपरामर्शत्वेन वा
नानुमितिमात्रं प्रति हेतुता साध्यादिभेदेन व्याप्तेर्भेदात् किं तु
पक्षज्ञानत्वेनाभावज्ञानत्वेन ज्ञानत्वेन वा । पक्षोऽपि धर्मिमात्रं प-
क्षताया अप्यननुगमात् । तत्तत्पक्षतावच्छेदकविशिष्टे वह्न्यनुमितिं
प्रति तत्तद्विशिष्टे वह्निव्याप्यवत्तापरामर्शत्वेन हेतुताया आवश्य-
कत्वे वह्न्यनुमितिमात्रं प्रत्यपि न तादृशपरामर्शत्वेन हेतुता गौ-
रवात्, किं तु वह्निव्याप्तिज्ञानत्वेन लाघवात् । वस्तुतो वह्निज्ञा-
नत्वेनैव तथा अतिलाघवात् । एवं वह्न्यभावानुमितिं प्रत्यपि ।
एतेनानुमित्यन्तरं व्याख्यातमिति वदन्ति । कृतं पल्लवितेनेति ॥

इति परामर्शदीधितिः ।

(गा०) अनुमितिमात्रं प्रति । अनुमितित्वावच्छिन्नं प्रति । व्या-
प्तेर्भेदादिति । करणाननुगमेन व्यभिचारादिति शेषः । अभावज्ञान-
त्वेनेति । अभावत्वज्ञानत्वेनेत्यर्थः । तेन व्याप्तिशरीरे सर्वत्राभाव-
त्वेन पदार्थान्तरभानस्थलेऽपि नानुपपत्तिः । न वा धर्मिनिवेशाधि-
क्याद्गौरवं विशेषसामग्र्या अतिप्रसंगवारणस्यावश्यकत्वे विषयनि-
वेशो विफल इत्याशयेनाह । ज्ञानत्वेन वेति ।

ननु पक्षज्ञानत्वस्य पक्षताघटितत्वात्तच्छरीरे च साध्यादिविशे-
षांतर्भावात्कथमनुगम इत्यत आह । पक्षोऽपीति । पक्षपदार्थोऽपीत्यर्थः ।

धर्मिमात्रमिति । तथा च पक्षतानन्तर्भावान्नानुगम इति भावः । न चैवं धर्मित्वस्य केवलान्वयितया धर्मिविषयकत्वमव्यावर्तकं तथा च कारणतावच्छेदककोटौ निवेशानर्हमिति वाच्यम् । एतदालोकस्यैव कल्पांतरानुसरणात् । ज्ञानत्वादेरनुमितिकारणतावच्छेदकपरामर्शत्वव्यापकत्वेऽपि न तेन रूपेणान्यथासिद्धिः परामर्शत्वस्याननुगततया विशेषरूपावच्छिन्नं प्रत्येव जनकतावच्छेदकतया ज्ञानत्वाद्यवच्छिन्नजन्यतावच्छेदकत्वाभिमतशुद्धानुमितित्वावच्छिन्नजनकतानवच्छेदकत्वात् एतदभिप्रायेणैव परामर्शत्वादेरनुमितिसामान्यजनकतावच्छेदकत्वनिराकरणात् ।

अथ ज्ञानत्वेनानुमितिहेतुत्वे संयोगत्वविभागत्वादिनैव कथं न हेतुता विशेषसामग्रीतोऽतिप्रसङ्गवारणस्याऽऽवश्यकतया विनिगमकस्य दुर्लभत्वादिति चेदगत्या विनिगमनाविरहेण नानाकारणताया उपगमात् ।

यत्तु विनिगमनाविरहेण नानाकारणत्वकल्पनापेक्षया परामर्शत्वाख्यजातिविशेषं कल्पयित्वा तेनैव रूपेणानुमितिहेतुत्वकल्पनमुचितम् । तेन रूपेण हेतुत्वे च न विनिगमनाविरहावकाशः कारणतावच्छेदकतयैव तत्सिद्धेः । न च तादृशजातेश्चाक्षुषत्वादिना सङ्करप्रसङ्गः । मानसज्ञान एव तदभ्युपगमात् । चाक्षुषादिपरामर्शस्थलेऽपि तदुपनीततत्तत्पदार्थविषयकमानसपरामर्शकल्पनया क्षणैकव्याजेनानुमित्युपपादनसम्भवात् । पक्षादिना समं चक्षुरादिसन्निकर्षसत्त्वेऽपि चक्षुर्मनोयोगाद्यभावस्य फलबलेन कल्पनात् चाक्षुषादिसामग्रीविरहोपपत्तेः । चाक्षुषादिपरामर्शानन्तरं तज्जन्यसंस्काराधीनस्मरणात्मकपरामर्शकल्पनेनाऽनुमित्युत्पादनासम्भवेन स्मृतित्वव्याप्यैव कथं न सा जातिरिति तु न वाच्यम् । लाघवाऽभावेऽधिकैकक्षणविलम्बस्याऽन्याय्यत्वात् , अनुमितिपूर्वं स्मृतिकल्पने उभयवाद्यसिद्धतत्तत्स्थलीयस्मृतिसामग्र्या उभयवाद्यसिद्धाया मानसं प्रति प्रतिबन्धकत्वकल्पनाधिक्येन गौरवाच्च । उद्बोधकानामननुगमेन स्मृतिसामग्र्यननुगमात् उभयसिद्धस्मृतिसामग्रीस्थलीयप्रतिबन्धकतयाऽनिर्वाहात् ।

न च परामर्शत्वस्य स्मृतित्वव्याप्यत्वे विशेषकारणतायामपि तज्जातेरवच्छेदकघटकतया तत्र संशयान्यत्वानिवेशेन लाघवं संशयरूपस्मृतेरभावेन तत्रानिवेशेऽप्यतिप्रसङ्गाविरहादिति वाच्यम् । परामर्श-

त्वस्य मानसत्वव्याप्यतामतेऽपि संशये तदनभ्युपगमादेव ततोऽनुमितिप्रसङ्गविरहात्। तन्मतेऽपि विशेषकारणतावच्छेदकगर्भे संशयान्यत्वानिवेशादिति । तदसत् ।

ज्ञान इव संयोगादावपि अनुमितिजनकतावच्छेदकतया जातिविशेषकल्पनसम्भवेन विनिगमनाविरहाऽनुद्धारात् । परामर्शत्वावाच्छिन्नस्य व्यापारविरहेण करणत्वासम्भवात् । ज्ञानत्वेन कारणताया आवश्यकत्वाच्च।अत एव विभागत्वादिकमादाय विनिगमनाविरहस्यापि नावकाशः । विभागादीनां परामर्शाजनकतया कारणत्वासम्भवात् ।

एतेन विशेषकार्यकारणतावच्छेदकेऽनुमितित्वनिवेशस्यावश्यकत्वेन तत एव तदवच्छिन्नोत्पत्तेराकस्मिकतावारणादनुमितित्वावाच्छिन्नं प्रति सामान्यतो ज्ञानत्वेन हेतुत्वं निर्युक्तिकमित्यपि परास्तम् । विशेषकारणस्य परामर्शादेरनुमित्यकारणतया ज्ञानत्वेन तत्कारणताकल्पनस्याऽऽवश्यकत्वादिति कृतं पल्लवितेन ।

विशिष्य पक्षतावच्छेदकमनिवेश्य वह्न्याद्यनुमितिं प्रति वन्हिव्याप्यवत्तानिश्चयत्वेन किञ्चिद्धर्मावच्छिन्नविशेष्यकतन्निश्चयत्वेन वा सामान्यतो हेतुत्वं कस्यचिदभिमतं तद् दूषयति । तत्तत्पक्षतावच्छेदकेति । तर्हि केन रूपेण वन्ह्यनुमितित्वावच्छिन्नं प्रति हेतुतेत्याकांक्षायामाह । किन्त्विति । विशेषसामग्र्या अतिप्रसङ्गस्य वारणस्याऽऽवश्यकत्वे व्याप्तिविषयकत्वनिवेशनमफलमित्याशयेनाह । वस्तुत इति । वन्हिज्ञानत्वेनैवेति ।

न चैवं ज्ञानत्वेनैव न कथं हेतुतोपेयत इति वाच्यम् । सामान्यविशेषयोरेकरूपावाच्छिन्नजन्यतावच्छेदकत्वाभावनियमात् । वह्न्यभावानुमितिं प्रत्यपि वन्हिज्ञानत्वेनैव हेतुतेत्यनुषङ्गेणान्वयः । तत्पूर्वं वह्न्यभावज्ञानस्याऽऽवश्यकत्वे वन्हिज्ञानस्याप्यावश्यकत्वादिति भावः।अयं चाभ्युपगमवादः तत्तत्पक्षतावच्छेदकावाच्छिन्नविशेष्यकवह्न्याद्यनुमितित्वरूपविशेषकारणकार्यतावच्छेदकगर्भे वह्न्यनुमितित्वादिनिवेशादेवोपपत्तेस्तदवाच्छिन्नं प्रति हेतुत्वान्तरस्य निर्युक्तिकत्वात्, सुखादिसाधारणजन्यात्मविशेषगुणत्वावाच्छिन्नं प्रति मनस्त्वेन कारणताकल्पनात्तत एवानुमितेः सकरणकत्वनिर्वाहेणाऽनुमितित्वावाच्छिन्नम्प्रति ज्ञानत्वादिना हेतुत्वमपि निर्युक्तिकमित्याद्यस्वरसबीजमत्र बोध्यमिति।

इति गादाधर्यां परामर्शप्रकरणम् ॥

अथ केवलान्वयिग्रन्थः ।

(चि०) तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् । तत्रासद्विपक्षं केवलान्वयि, तथा हि केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः, अभिधानेऽनभिधाने च विपक्षत्वव्याघातात् ।

(दी०) केवलान्वयीत्यादि । केवलान्वयिसाध्यकादीत्यर्थः । तत्र । तेषु मध्ये । असद्विपक्षम् अत्यन्ताभावाप्रतियोगिसाध्यकं केवलान्वयि, एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकि, गृहीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकि ।

(गा०) अनुमानविभागपरमूलग्रन्थे केवलान्वयिपदस्य प्रसिद्धार्थकत्वे ज्ञानकरणतापक्षे ज्ञानस्य केवलान्वयित्वाभावादसंगतिः । लिंगकरणतापक्षेऽपि केवलान्वयिसाध्यकव्यतिरेकिहेतोरसंग्रह इति तस्य तुरीयतापत्तेः ।

अथाऽन्वयव्यतिरेकिलक्षणे व्यतिरेकिपदस्य यथाश्रुतार्थकतया गृहीतसाध्यसहचारव्यतिरेकप्रतियोगित्वमेवाऽन्वयव्यतिरेकित्वमस्तु तथा चोक्तहेतुरपि अन्वयव्यतिरेकिष्वेवाऽन्तर्भवतु । न चैवमसद्विपक्षं केवलान्वयीति मूलोक्तलक्षणविरोधः । विपक्षपदस्य साध्याभाववदर्थकतया प्रसिद्धत्वेन साध्ये केवलान्वयित्वस्यैव ततो लाभादिति वाच्यम् । तथा हि केवलान्वयिनोऽभिधेयत्वस्य न विपक्ष इति लक्षणसंगमने विपक्षपदस्य साध्याभाववदर्थकत्वेऽभिधेयत्वस्यानन्वयेन तस्याऽभाववन्मात्रार्थकताया आवश्यकत्वात लक्षणस्थतत्पदस्याऽपि तदर्थकतौचित्यात् । न च साध्यस्य केवलान्वयिताया: केवलान्वय्यनुमानानंतर्भावे तत्र साध्यसंदेहरूपपक्षतायाः साध्याभावाप्रसिद्ध्याऽसंभवादनुमित्यनिर्वाहशङ्काया अग्रिमाया असंगतिरिति वाच्यम् । हेतोः केवलान्वयित्वे साध्यस्याऽपि तथात्वमावश्यकमन्यथा सद्धेतुत्वानिर्वाहादिति तदा-

शङ्कासङ्गतेरिति चेन्न। तादृशहेतोरन्वयव्यतिरेकित्वे तादृशहेतुकानुमानस्य मीमांसकैरभ्युपगन्तव्यतया तेषां साध्याभाववदवृत्तित्वस्य व्याप्तित्वाभ्युपगमे विरोधादतो व्याचष्टे । केवलान्वयीति। साध्यकादीत्यादिपदात्केवलव्यतिरेक्यन्वयव्यतिरेकिसाध्ययोः संग्रहः । तत्र व्यतिरेकित्वविशेष्यतया साध्यानन्तर्भावे केवलान्वयिलक्षणे साध्यान्तर्भावेण केवलान्वयिसाध्यकव्यतिरेकिहेतोः केवलान्वय्यनुमानतया तत्र साध्यसहचाराग्रहदशायां केवलव्यतिरेकिलक्षणं तद्ग्रहदशायाञ्चाऽन्वयव्यतिरेकिलक्षणमतिव्याप्तं स्यादिति तदुभयलक्षणेऽपि साध्यनिवेशः ।

यद्यपि केवलान्वयिपदं केवलान्वयिसाध्यकार्थतया मूलकृतैव विवक्षणीयं मूलस्थाऽसद्विपक्षपदस्य तदर्थकताया असद्विपक्षं अत्यन्ताभावाप्रतियोगिसाध्यकमित्यनेन स्वयं व्याख्येयत्वात् । अत्यन्ताभावाप्रतियोगिसाध्यकत्वस्यैव केवलान्वयिसाध्यकत्वरूपत्वादित्येतद्व्याख्यानमनुपयुक्तम् । न च मूलकृतोऽव्याप्यवृत्त्यत्यन्ताभावादेरभावप्रतियोगितया केवलान्वयित्वासम्भव इत्याक्षिप्य वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति साध्यनिष्ठकेवलान्वयित्वनिरुक्त्या सिद्धान्तप्रणयनं केवलान्वयिपदेन साध्यविशेषणप्रतिपादने एव सङ्गच्छते इति तदर्थमेव तादृशव्याख्यानमुचितमिति वाच्यम् । केवलान्वयिपदेन साध्याविशेषणप्रतिपादनस्य मूलेऽभावाद्दीधितिस्थतत्पदार्थनिर्वचनस्य मूलकृतोऽसम्भवात्तादृशासङ्गतेर्दुष्परिहारतया तादृशासंगतिपरिहाराय च पूर्वपक्षे न केवलान्वयीत्यस्य न केवलान्वय्यनुमाने साध्यमित्यर्थकतया वृत्तिमदत्यन्ताभावाऽप्रतियोगित्वं केवलान्वयित्वमिति सिद्धान्तग्रन्थस्य च वृत्तिमदत्यन्ताभावाप्रतियोगित्वं साध्यविशेषणतया केवलान्वयिलक्षणघटकमित्यर्थपरतया व्याख्येयत्वादिति । तथाऽपि केवलान्वयिपदन्न मुख्यार्थपरं किन्तु भाक्तमेवेति सूचयितुं केवलान्वयिसाध्यकेतिशब्देन तदर्थो व्याख्यातः ।

सप्तम्या आधारार्थकत्वासम्भवान्निर्धारणार्थकत्वमाह । तेषु मध्य इति । तत्रेत्यस्य सप्तम्येकवचनान्तत्वे एकानुमानपरामर्शकत्वभ्रमेण वर्णनीयनिर्धारणार्थकत्वानुपपत्तिशंका स्यान्निर्धारणस्य समुदायगर्भत्वादित्यतो व्याचष्टे । तेष्विति ।

यद्यपि तत्रेत्यस्य तस्मिन्नित्येकवचनान्तत्वेन वर्णनमपि संगच्छते केवलान्वय्यादित्रयस्य तत्पदपरामर्शनीयस्यैकवचनार्थैकत्वविरहेऽपि तदविवक्षया सामंजस्यात् । अत एव घटादेरामद्रव्यस्य परमाणौ पाक इति भाष्ये षष्ठ्येकवचनस्य निर्धारणार्थकतया आचार्यव्याख्यानमपि संगच्छते । तच्चानुमानमिति प्रकृतमूलेऽपि एकत्वाविवक्षया एकवचनसंगतिः । तथापि तच्चाऽनुमानमित्यपेक्षया सन्निहितकेवलान्वय्यादिपदेन प्रत्येकमुपस्थापितस्याऽनुमानत्रयस्योपस्थापकं तत्पदमित्याशयेन बहुवचनादरः । उद्देश्यतावच्छेदकशून्ये सामान्यधर्मात्मकत्रितयत्वावच्छिन्ने केवलान्वयित्वव्यवच्छेदबोधकतयैव निर्धारणत्वसम्भवात् । त्रित्वार्थकबहुवचनं विना तादृशसामान्यधर्मानुपस्थितेः प्रत्येकपर्याप्तधर्मस्य सामान्यत्वाभावेन एकवचनासङ्गतेः । अत एव घटपटयोर्मध्ये घटो दण्डजन्य इत्यादौ निर्धारणानुरोधेन नियमतो द्विवचनापेक्षेति ।

असद्विपक्षमित्यत्र विपक्षेऽसत्त्वस्याऽप्रसिद्ध्या दुर्ग्रहत्वमाशङ्क्य व्याचष्टे । अत्यन्तेति । अत्यन्ताभावाप्रतियोगितत्तत्साध्यकानुमितिकरणं तत्तत्साध्यककेवलान्वय्यनुमानमित्यर्थः ।

यद्यपि विपक्षपदस्य साध्याभाववदर्थकतया तत्राऽभावाधिकरणत्वप्रवेशेन वृत्तिमदभावाप्रतियोगित्वमेव केवलान्वयित्वमिति लभ्यते । तथाऽव्याकाशरूपाभावप्रतियोगितयाऽऽकाशाभावस्य केवलान्वयित्वानुपपत्तेः पूर्वपक्षे शङ्कनीयतया तच्छंकाया विपक्षपदस्य साध्याभावमात्रपरत्वाभिमानमूलकतयैव संगमनीयतया तदाशयेनैव वृत्तिमत्त्वानन्तर्भावः । वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति च सिद्धान्तग्रन्थे मूलकृता तादृशाभिमानो निराकरिष्यते ।

असत्सपक्षं केवलव्यतिरेकीति व्यतिरेकिग्रन्थे वक्ष्यमाणकेवलव्यतिरेकिलक्षणस्याऽसन्सपक्षो निश्चितसाध्यवान् यस्येति यथाश्रुतार्थेऽपि अप्रसिद्धिमाशङ्क्य प्रसंगादधृत्वैव तद्विवृणोति । एवमगृहीतेति । अगृहीतस्तदाऽनिश्चितः, अन्वयो हेतुसहचारो यत्र एवंभूतं व्यतिरेकप्रतियोगि प्रकृतं साध्यं यत्र तत्कालावच्छिन्नप्रकृतहेतुसहचारनिश्चयविषयत्वाभाववद्यति·

रेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणमिति तु फलितार्थः । अयोगोलकमात्रे वह्निप्रसिद्धिदशायां धूमहेतुकतदनुमानस्य संग्रहाय निश्चये प्रकृतहेतुसहचारविषयकत्वनिवेशनम् । अन्वयसहचारनिश्चयदशायामपि कालान्तरीणतन्निश्चयविषयत्वाभावमादायाऽतिप्रसङ्गवारणायाऽभावे तत्कालावच्छिन्नत्वविशेषणम् । तत्कालीनहेतुसहचारनिश्चयस्य यो विषयस्तदन्यत्वस्य च न साध्यविशेषणत्वसम्भवः । यदा कुत्राऽपि प्रकृतहेतुसहचारनिश्चयो नास्ति तदाऽप्रसङ्गात् । निश्चये तत्पुरुषीयत्वमपि निवेशनीयम् अतो व्यतिरेकितादशायामप्यन्ततो भगवतः सहचारनिश्चयस्य सत्त्वेऽपि नाऽसंभवः । कालविशेषसाध्यविशेषैरिव पुरुषविशेषैरपि नियंत्रितं व्यतिरेकित्वमिष्यत एव । न चैवं यस्य पुंसः प्रकृतहेतुसहचारनिश्चयः क्वचिदपि कदाऽपि न प्रसिद्ध्यति तं प्रति तद्धेतुकं किमप्यनुमानं व्यतिरेकि न स्यादिति वाच्यम् । एवं सति तत्कालावच्छिन्नस्वविषयकतद्धेतुसहचारनिश्चयाभाववत्तत्पुरुषकत्वस्य साध्यविशेषणत्वोपगमात् । तादृशं च सदनुमाने साध्यमप्रसिद्धं यद्विषयकप्रकृतहेतुसहचारनिश्चयो न प्रसिध्यति, सर्वेषामेव साध्यानामन्ततो भगवतः प्रकृतहेतुसहचारनिश्चयस्यावश्यकत्वात् । एतत्कल्पे तत्कालीनतादृशनिश्चयवदन्यत्वेनापि पुरुषविशेषणं सम्भवति तत्कालीनतादृशनिश्चयस्याऽन्ततो भगवत्येव प्रसिद्धिः ।

साध्ये व्यतिरेकप्रतियोगित्वानिवेशश्चाऽन्वयसहचाराग्रहदशायामपि केवलान्वयिसाध्यकस्योक्तकेवलान्वय्यनुमानलक्षणाक्रान्ततयाऽत्राऽलक्ष्यत्वात्तद्वारणाय । न च यत्र व्यतिरेकसहचारमात्रेण व्याप्तिग्रहस्तत्केवलव्यतिरेक्यनुमानं तदुक्तं मणिकृता यत्र व्यतिरेकसहचारेण व्याप्तिग्रह इति । एवञ्च यदाऽन्वयव्यतिरेकसहचारयोर्द्वयोरेवाऽग्रहः तदाऽपि हेतोस्तज्ज्ञानस्य वा केवलव्यतिरेकितापत्तिरुक्तलक्षणसत्त्वादिति वाच्यम् । अगृहीतान्वयव्यतिरेकिसाध्यकेत्यनेनाऽन्वयसहचारग्रहानधीनव्यतिरेकिसाध्यकानुमितिफलोपहितकरणत्वस्य विवक्षणीयत्वात् । उक्तस्थले चाऽनुमित्यनुत्पत्त्या फलोपधायकताविरहेणाऽनतिप्रसङ्गात् । अनु मितेस्तद्ग्रहानधीनत्वं तद्ग्रहाधीनव्यापकताग्रहानधीनत्वम् । तेन केवलव्यतिरेकितादशोत्पन्नाया अप्यनुमितेः प्रकृतसाध्यसाधनसहचाररूपाऽन्वयसहचारगर्भव्याप्तिज्ञानप्रयोज्यत्वेऽपि न

क्षतिः। अन्वयसहचारनिश्चयः सर्वत्र सर्वज्ञस्यैव प्रसिद्धः। तदनधीनत्वं सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नजन्यताशून्यत्वम् अतोऽनुमितिमात्रस्येश्वरीयान्वयसहचारग्रहाधीनत्वेऽपि न क्षतिः। यत्साध्यसाधनसहचारो नास्मदादिज्ञानविषयस्तत्र परमेश्वरीयतत्सहचारज्ञाननिरूपितनिरुक्तजन्यत्वाप्रसिद्धावपि योगिज्ञानीयनिरुक्तताद‍ृशजन्यतायास्तदीयज्ञानांतरे प्रसिद्ध्या सामंजस्यात्। एवं च सहचारज्ञाने तत्कालीनत्वं न निवेशनीयं कालान्तरीयान्वयसहचारज्ञानस्य केवलव्यतिरेकिताद‍ृशाप्रभवानुमितावप्रयोजकत्वात्। ताद‍ृशानुमितिमादाय लक्षणसमन्वयस्य कालानिवेशेऽपि सम्भवात्। अन्वयव्यतिरेकसहचारज्ञानयोरनुगतरूपेण व्याप्तिग्रहहेतुत्वसम्भवे केवलव्यतिरेकसहचारज्ञानं यद्व्याप्तिग्रहोपधायकं तत्र कालान्तरीणान्वयसहचारग्रहस्य स्वरूपयोग्यत्वेऽपि न क्षतिः, फलोपधानरूपप्रयोजकताया निवेशनीयत्वाम्। ज्ञायमानलिङ्गकरणतामते तत्पुरुषीयत्वमप्यनुमितौ निवेश्यमन्यथा एकस्य पुंसोऽन्वयसहचारादन्यस्य च व्यतिरेकसहचारमात्राद्यत्रैकलिङ्गकानुमिमितिस्तत्र तल्लिङ्गस्य व्यतिरेकसहचारमात्राधीनानुमितिमादाय द्वावेव पुरुषौ प्रति केवलव्यतिरेकितापत्तेः। हेतुज्ञानस्यानुमानतामते तत्पुरुषीयत्वमपि न निवेश्यते। तत्साध्यकत्वेन तद्धेतुकत्वेन चानुमितिर्विशेषणीया अतो वह्निधूमसहचारज्ञानानधीनान्यसाध्यकान्यहेतुकानुमितिकरणेऽन्वय्यनुमाने नातिव्याप्तिः। फलोपधानस्य विशेषणत्वोपगमात् लिङ्गकरणतापक्षे कालान्तरीणानुमितिफलोपधानमादायान्वयिताद‍ृशायां तस्य हेतोर्न व्यतिरेकितापत्तिः। एवं च साध्ये व्यतिरेकित्वविशेषणं यदा केवलान्वयिसाध्यकस्थलेऽभावांशे साध्यीयत्वावगाहिभ्रमात्मकव्यतिरेकसहचारग्रहादनुमित्युपधानं तदाऽतिप्रसङ्गवारणायेति बोध्यम्।

अन्वयव्यतिरेकिलक्षणस्य मूलानुक्तत्वात्स्वयं तदाह। गृहीतेति। पूर्ववद्विग्रहेण तत्कालीनतत्पुरुषीयप्रकृतहेतुसहचारनिश्चयविषयव्यतिरेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणत्वमिति फलितार्थः। प्रकृतहेतुसाध्यसहचारनिश्चयाधीनव्यापकताग्रहप्रयोज्यव्यतिरेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणत्वमिति तु निष्कर्षः। अत्रापि केवलान्वय्यनुमानेऽतिव्याप्तिवारणाय व्यतिरेकप्रतियोगित्वं साध्ये

विशेषणम् ।

ननु व्यतिरेकसहचारमात्रेण यत्र व्याप्तिग्रहस्तस्य केवलव्यतिरेकित्वे तुल्ययुक्त्या यत्रान्वयसहचारमात्रेण व्याप्तिग्रहस्तस्यैव केवलान्वयिसाध्यकस्य व्यतिरेकिसाध्यकस्य च केवलान्वय्यनुमानत्वमुचितमिति मूलोपदर्शितकेवलान्वयिलक्षणं तथाविधकेवलव्यतिरेकिसाध्यकाव्यापकमेव । (१)[एवं साध्ये व्यतिरेकित्वघटितं केवलव्यतिरेकिलक्षणमपि भ्रमात्मकव्यतिरेकसहचारग्रहदशायां केवलान्वयिसाध्यककेवलव्यतिरेक्यादावव्यापकम् ।] एवमन्वयव्यतिरेकिलक्षणमपि व्यतिरेकिसाध्यकेऽन्वयसहचारमात्रग्रहदशायां केवलान्वयिन्यतिव्यापकमित्यन्यथैव केवलान्वयित्वादिकं निर्वक्तुमुपक्रमते । व्याप्तिग्राहकेति ।

(दी०) व्याप्तिग्राहकसहचारभेदाद्भेदे त्वन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वम् । तच्च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं तादृशसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वं वा । गृहीतव्याप्तिभेदाद्भेदे तु प्रकृतहेतुकप्रकृतसाध्यानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यान्वयव्याप्तित्वकत्वं तत्त्वम् । जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुतावच्छेदिका च व्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी, तद्विशिष्टपक्षधर्मताज्ञानेऽपि व्याप्त्यन्तरबोधं विना निर्गन्धत्वानुमित्यनुदयादिति नाव्याप्तिः ।

(गा०) सहचारभेदात् । सहचारस्यान्वयव्यतिरेकनिरूप्यत्वरूपवैलक्षण्यात् । भेदे । अनुमानस्यान्वयित्वव्यतिरेकित्वरूपवैलक्षण्ये । केवलान्वयितायां व्याप्तिग्राहकसहचारस्य व्याप्तेर्वाऽन्वयनिरूपितत्वाधीनत्वं मणिकारानभिमतं साध्यस्य केवलान्वयित्वनिर्वचनविरोधादिति तस्य तथात्वाभिधानं स्वातन्त्र्येणैवेत्यवधेयम् ।

अन्वयसहचारमात्रेति । लिङ्गकरणतापक्षेऽन्वयसहचारमात्रज्ञानजन्यव्याप्तिग्रहाधीनतदातनतत्पुरुषीयानुमितिकरणत्वं तदा तं पु-

(१) कुण्डलितः पाठः पुस्तकान्तरे नास्ति ।

रुषं प्रति केवलान्वयित्वमित्यर्थः । अन्वयव्यतिरेकिण्यतिव्याप्तिवारणाय मात्रपदम् । यत्र च पदार्थान्तरीयसहचारविषयकसमूहालंबनरूपप्रकृतसाध्यसाधनसहचारग्रहादन्यदीयव्याप्तिविषयकः प्रकृतव्याप्तिग्रहो व्यतिरेकसहचारग्रहं विनैव तत्राव्याप्तिर्नाशंकनीया प्रकृतसाध्यसाधनसहचारमात्रविषयताधीनव्याप्त्यवगाहिताप्रयोज्यतत्साध्यविषयकत्वावच्छिन्नतत्पुरुषीयानुमितिकरणत्वं तत्साध्यककेवलान्वय्यनुमानत्वमित्यस्य विवक्षितत्वात् । तत्साध्यतदितरसाध्यविषयकसमूहालम्बनानुमितिकरणत्वं यथा तत्साध्यककेवलान्वयिहेतोस्तथाऽन्यसाध्यकस्य व्यतिरेकिणः केवलान्वयिनो वा हेतोरिति तस्य तत्साध्यककेवलान्वय्यनुमानतावारणाय तत्साध्यविषयकत्वस्य करणत्वनिरूपकतावच्छेदकतया प्रवेशः ।

वस्तुतस्तु तत्साध्यीयत्वमिव तत्साधनीयत्वमपि सहचारे निवेश्यम्, तथा च तत्साधनघटितलक्षणे करणत्वविशेष्यतयाऽपि तत्साधनत्वप्रवेशादुक्तातिप्रसङ्गवारणसम्भवेन तत्साध्यकानुमानलक्षणे तत्साध्यविषयतावदनुमितिकरणमेव निवेशनीयम् । करणत्वविशेष्यतया सहचारनिरूपकतावच्छेदकतया च तत्साधनत्वनिवेश आवश्यकः । अन्यथाऽन्वयसहचारमात्रगृहीतव्याप्तिकेन हेतुना व्यतिरेकसहचारगृहीतव्याप्तिकेन हेत्वंतरेण च यत्रैकसाध्यानुमितिर्जनिता तत्र तत्साध्यविषयकत्वावच्छिन्नतदनुमितिकरणत्वमादाय व्यतिरेकिहेतावतिव्याप्त्यापत्तेः । व्याप्त्यवगाहिताप्रयोज्यविषयतायां तत्साध्यीयत्वानिवेशाद्यत्रान्वयसहचारमात्रग्रहाधीनवह्निधूमव्याप्तिग्रहाद् धूमेन वह्निव्याप्तिविशिष्टधूमस्यानुमितिर्न तु वह्नेस्तदनुमितौ व्याप्तिविशिष्टधूमविषयतायाः साध्यतावच्छेदकवह्निव्याप्तिविषयताप्रयोज्यत्वेऽपि च न तत्करणतामादाय तदानीं धूमस्य वह्निसाध्यककेवलान्वय्यनुमानता ।

व्याप्तिज्ञानस्यानुमानतापक्षे तत्साध्यसाधनसहचारमात्रविषयताप्रयोज्या या व्याप्तिविषयता तद्वत्त्वे सति तत्साध्यानुमितिकरणत्वं तत्साध्यकतद्धेतुककेवलान्वय्यनुमानत्वमित्यर्थः । फलानुपहितव्याप्तिज्ञानवारणाय विशेष्यदलम् । धूमधर्मिकवह्निव्याप्तिविषयकं यज्ज्ञानमन्यहेतुकान्यसाध्यकव्याप्तिविषयकसमूहालम्बनरूपं कारणान्तराभावेन न वह्न्यनुमितिमजीजनदपि तु अन्यानुमितिमेव तत्र

तस्य वह्निसाध्यककेवलान्वय्यनुमानतावारणाय तत्साध्यकत्वमनुमितिविशेषणम् ।

न चैवं धूमालोकयोर्वह्निव्याप्तिविषयकेण यज्ज्ञानेन सहकारिविशेषविरहाद् धूमपरामर्शो न जनितोऽपि त्वालोकलिङ्गकपरामर्श एव तस्यालोकलिङ्गकवह्न्यनुमितिकरणत्वमादाय धूमलिङ्गकानुमानत्वप्रसङ्गः। धूमलिङ्गकपरामर्शरूपव्यापारोपधायकस्यैव धूमलिङ्गकानुमानव्यवहारविषयतयेष्टापत्तेरयोगादिति वाच्यम् । स्वकरणकानुमितिनिष्ठतत्साध्याविषयकत्वप्रयोजकप्रकृतहेतुनिष्ठतादृशव्याप्त्यवगाहिताया एव निवेशनीयत्वात् । स्वमनुमानत्वेनाभिमतं ज्ञानम् । अनुमित्युपधानप्रयोजकव्याप्त्यवगाहिताकतृतीयलिङ्गपरामर्शवारणाय स्वकरणकत्वमनुमितिविशेषणम् ।

ननु मात्रपदेन व्यतिरेकसहचारत्वावच्छिन्नो यदि व्यवच्छिद्यते तदा केवलान्वयिवाच्यत्वादिसाध्यकानुमानासंग्रहः व्यतिरेकाप्रसिद्धेः । साध्यसाधनसहचारातिरिक्तसहचारत्वावच्छिन्नस्य व्यवच्छेदेऽपि प्रमेयवानभिधेयादित्याद्यनुमानाव्याप्तिर्दुर्वारैव । वस्तुमात्रसहचारस्यैव साध्यसाधनसहचारत्वात् ।

न च साध्यसाधनतावच्छेदकसम्बन्धघटितसाध्यसाधनसहचारातिरिक्तसहचारानधीनव्याप्तिग्राहकत्वविवक्षया न दोषः स्वरूपादिसम्बन्धेन प्रमेयादेः साध्यसाधनभावस्थले समवायादिना तत्सहचारस्यैव निरुक्तसहचारातिरिक्तस्य प्रसिद्धेरिति वाच्यम् । एवमपि सम्बन्धसामान्येन प्रमेयादेः साध्यतास्थले ऽतिरिक्तसहचाराप्रसिद्धेर्दुर्वारत्वात् ।

अथ यावत्सम्बन्धसाधारणं सम्बन्धतावच्छेदकं दुर्लभम्, अस्तु वा तावदन्यान्यत्वादिकं तथा, तथाऽपि व्यतिरेकसहचारघटकतावत्पदार्थानां परस्परोपरागेण या सहचारविषयता तदनधीनत्वस्य, यत्र प्रमेयाभावस्तत्राभिधेयत्वाभाव इति भ्रमासिद्धौ च साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नोपरागेण या सहचारविषयता तदन्यसहचारविषयतानधीनत्वस्यैव तदनुरोधेन विवक्षणीयतया नानुपपत्तिः । प्रमेयवानभिधेयादित्यादौ यत्र धूमस्तत्र वह्निरित्यादिसहचारज्ञानीयसहचारविषयताया एव निरुक्तसहचारविषयतातिरिक्तायाः प्रसिद्धेरिति चेत् ? एवमपि यत्र प्रथममन्वयस-

हचारधीजन्यैका व्याप्तिधीरनन्तरं च सहचारान्तरविषयकज्ञानाधीनाऽपरा व्याप्तिधीस्ततोऽनुमितिस्तत्रान्वयसहचारमात्रज्ञानाधीनव्याप्तिधियमादायानुमानस्य केवलान्वयित्वप्रसंगः। स्वप्रयोजकव्याप्त्यवगाहितात्वव्यापकताद्दशसहचारविषयतातिरिक्तसहचाराविषयत्वाप्रयोज्यताकानुमितिकरणत्वंविवक्षणेन तत्स्थलीयानुमितिप्रयोजकद्वितीयज्ञाननिष्ठव्याप्त्यवगाहितायां व्यतिरेकसहचाराविषयत्वाप्रयोज्यताविरहेण तस्याः स्वपदेनोपादानासम्भवादतिव्याप्तिवारणेऽपि गौरवमिति मात्रपदस्य तदतिरिक्तानधीनतार्थकतां परित्यज्य व्यापकत्वान्तर्भावेण समुदितमन्यथा व्याचष्टे। तत्त्वेति।

प्रकृतेति। स्वनिष्ठसाध्यविधेयकत्वप्रयोजक(१) प्रकृतव्याप्त्यवगाहिताप्रयोजकसहचारविषयतात्वव्यापकान्वयसहचारविषयतात्वकानुमितिकरणत्वमित्यर्थः, स्वमनुमितिः। प्रकृतसाध्यसाधनसहचारत्वेनान्यवस्तुज्ञानस्यापि व्याप्तिग्राहकत्वात्प्रमेयत्वादिना सहचारविषयकज्ञानस्य चातथात्वादन्वयसहचारादेर्विषयस्य न व्याप्तिभानप्रयोजकतेति सहचारस्थले तद्विषयतानिवेशः। साऽपि सहचारत्वावच्छिन्नविषयतात्वेन प्रवेश्या अन्यथा सहचारत्वेन वस्त्वंतरावगाहिभ्रमाधीनव्याप्तिग्रहस्थले वास्तवसहचाराविषयतायाः व्याप्तिभानाप्रयोजकतयाऽव्याप्त्यापत्तेः। अन्वयसहचारविषयतात्वमपि साध्यसाधनतावच्छेदकावच्छिन्नविषयतानिरूपितविषयतात्वरूपं बोध्यमन्यथा उक्तभ्रमस्थलस्यैवासंग्रहात्। यत्र च साध्यतावच्छेदकरूपेण साध्यादिभिन्नमेवावगाहमानात्सहचारग्रहाद्व्याप्तिधीस्तत्संग्रहानुरोधेन वास्तवसाध्यसाधनसहचारविषयतामुपेक्ष्य साध्यताद्यवच्छेदकावच्छिन्नविषयतापर्यन्तनिवेशः। अत एव सहचारघटकसम्बन्धविशेषानिवेशेऽपि समवायविषयित्वादिना प्रमेयाभिधेययोः साध्यहेतुभावस्थले व्यतिरेकसहचारे साध्यसाधनसहचारत्वसत्त्वेऽपि व्यतिरेकिणि नातिप्रसङ्गसम्भवः।

परं तु भावाभावसाधारणेनाभावत्वेन यत्र संयोगसमवायाभ्यां हेतुसाध्यभावस्तत्र व्यतिरेकिणि व्यतिरेकसहचारविषयतायामुक्तान्वयसहचारविषयतात्वसत्त्वेनातिव्याप्तेर्वारणायैव साध्यतावच्छे-

---

(१) स्वप्रयोजकेति पु० पा०।

दकसम्बन्धसाधनतावच्छेदकसम्बन्धयोरन्यतरः प्रवेशनीयः ।

अत्र साध्यतावच्छेदकावच्छिन्नसाधनतावच्छेदकावच्छिन्नयोरेकतरोपरागेण सहचारविषयताया निवेशादेव व्यतिरेकसहचारविषयतायाः प्रायशो वारणसम्भवेऽपि जन्यज्ञानविषयत्ववान् जन्यज्ञानविषयत्वाभावादित्यत्र यत्र जन्यज्ञानविषयत्वाभावस्तत्र जन्यज्ञानविषयत्वाभावाभाव इति स्वाभावरूपहेत्वभावत्वेन सहचारप्रतियोगिसाध्यविषयकव्यतिरेकसहचारग्रहात् गृहीतव्याप्तिके कपिसंयोगाभाववान् कपिसंयोगादित्यत्र यत्र कपिसंयोगाभावाभावस्तत्र कपिसंयोगाभाव इति स्वाभावरूपसाध्याभावत्वेन सहचारप्रतियोगिहेतुविषयकव्यतिरेकसहचारग्रहाद् गृहीतव्याप्तिके व्यतिरेकिण्यतिव्याप्तिवारणायोभयोपरक्तसहचारविषयता निवेश्या । उक्तातिव्याप्तिवारणमपि विषयतापर्यन्तनिवेशनफलम् । सहचारस्य निरूपकतावच्छेदकभेदेऽपि अभेदाज्जन्यज्ञानत्वावच्छिन्नविषयत्वाभावाभावत्वाद्यवच्छिन्ननिरूपितसहचारस्यापि जन्यज्ञानविषयतात्वाद्यवच्छिन्ननिरूपिततया यथाश्रुते सहचारनिवेशेनोक्तातिव्याप्तेर्दुर्वारत्वात् ।

अथ प्रतियोगिवैयधिकरण्यावच्छिन्नयोरेव व्यतिरेकयोस्सहचारस्य व्यतिरेकव्याप्तेरिवान्वयव्याप्तेरपि ग्राहकत्वादुक्तस्थले च तादृशविशेषणावच्छिन्नव्यतिरेकसहचाराप्रसिद्धेर्न व्यतिरेकितासम्भवः । न च प्रतियोगिवैयधिकरण्यावच्छिन्नव्यतिरेकयोरनुमित्यौपयिकव्यतिरेकव्याप्तिघटकतया तादृशयोस्सहचारस्तद्ग्राहकोऽस्तु व्यतिरेकसहचारादन्वयव्याप्तिग्रहमते तु तादृशविशेषणावच्छिन्नयोरेव व्यतिरेकयोस्सहचारग्रहस्य तद्ग्राहकत्वं निर्युक्तिकमिति वाच्यम् । व्यतिरेकव्याप्तेर्गमकतापक्षे यादृशसहचारग्रहस्यानुमित्यावपेक्षणीयता व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते इति मतेऽपि फलसाम्यानुरोधेन तादृशसहचारज्ञानापेक्षाया आवश्यकत्वात् । अधिकरणविशेषे व्यभिचारज्ञानविरोधिन एव सहचारज्ञानस्य व्याप्तिग्राहकतया प्रतियोग्यधिकरणे व्यतिरेकसहचारस्यातथाभूतस्य व्याप्तिग्राहकत्वासम्भवाच्चेति चेन्न । प्रतियोगिव्यधिकरणव्यतिरेकाप्रसिद्धावपि भ्रमात्मकतादृशव्यतिरेकसहचारग्रहाधीनज्ञानविषयव्याप्तिकतया व्यतिरेकित्वसम्भवात् ।

अत्र च साधननिष्ठसाध्यसहचारसाध्यनिष्ठसाधनसहचारान्य-

तरत्वस्य तदन्यतरविषयतात्वस्य वा व्यापकत्वं विवक्षणीयमन्यथा एकविधसहचारमात्रोपादाने ऽन्यविधसहचारगृहीतव्याप्तिकेऽव्याप्तेः।

यत्तु अन्वयव्याप्तिघटकसाधननिष्ठसाध्यसहचारस्यैवान्वयव्याप्ति-ग्राहकतोपेयते न तु साध्यनिष्ठसाधनसहचारस्येति साधननिष्ठ-साध्यसहचारत्वस्यैव व्यापकता विवक्षणीया । न च सह-चारग्रहस्य व्यापकताग्रहे स्वातन्त्र्येण हेतुतामत एवेदं लक्षणम-न्यथा व्यतिरेकसहचारस्यान्वयव्याप्त्यघटकतया तद्ग्रहस्य तद्ग्राहक-त्वानुपपत्त्या ऽतिप्रसङ्गापातात् । तथा च साधने साध्यसह-चारज्ञानमिव साध्ये साधनसहचारज्ञानमप्यविशेषेण व्यापकतां ग्राहयेदिति साध्यप्रतियोगिकसाधनप्रतियोगिकसहचारद्वयान्यतर-त्वेनानुगमस्यैवावश्यं निवेशनीयमिति वाच्यम् । उक्त-सहचारयोरनुगमकरूपस्यागुरोर्दुर्वचतया लाघवात्साध्यप्रतियो-गिकसहचारज्ञानत्वेनैव व्यापकताबुद्धेर्हेतुत्वोपगमात् । साध्यध-र्मिकसहचारग्रहस्य व्यापकत्वाग्राहकत्वात् अव्याप्त्यनवकाशात् । न च विनिगमनाविरहात्प्रत्येकमेव सहचारग्रहयोर्हेतुत्वं दुर्वार-मिति वाच्यम। व्याप्तिग्रहे तद्घटकसाध्यप्रतियोगिकसहचारग्रहस्या-वश्यापेक्षणीयत्वेन साधनप्रतियोगिकसहचारबुद्धेर्व्यापकताग्राहक-त्वेऽनुमितिपूर्वं नियमतो द्विविधसहचारज्ञानकल्पने गौरवाल्ला-घवस्यैव साध्यप्रतियोगिकसहचारबुद्धेर्व्यापकताग्राहकत्वे वि-निगमकत्वादिति। तन्न। व्यापकताग्रहे साधनधर्मिकसाध्यसहचार-ग्रहस्यैव हेतुत्वेऽपि यत्र साधनसामानाधिकरण्यविशिष्टसाध्यस्य क्वचिद्वैशिष्ट्यावगाही व्यापकताग्रहस्तत्र साधनधर्मिकसाध्यसह-चारग्रहस्य कल्पनीयतया विनिगमनाविरहस्य दुर्वारत्वात्।

नन्वन्वयव्याप्तिघटकाभावनिष्ठहेतुसहचारग्रहस्य तद्विशिष्टवै-शिष्ट्यावगाहिव्याप्तिबुद्धौ हेतुतया तादृशसहचारस्यापि व्याप्तिग्राह-कतया तत्र च प्रकृतसाधनसहचारत्वासत्त्वेन न तस्य व्याप्तिग्राह-कसहचारत्वव्यापकत्वम् । एवं यत्र साध्यतावच्छेदकं साधनताव-च्छेदकं वा पदार्थान्तरसहचारघटितं तत्र पदार्थान्तरसहचारस्यापि व्याप्तिग्राहकतया तत्साधारणव्याप्तिग्राहकसहचारत्वव्यापकत्व-नान्वयसहचारस्येत्यतो ऽभावनिष्ठसाधनसहचारसाधारणव्याप्ति-घटकसहचारत्वेनान्वयसहचारं निवेश्य लक्षणान्तरमाह। तादृशेति

यद्यपि पदार्थान्तरीयव्यापकताविषयकप्रकृतव्यापकताज्ञान-
जनकग्रहविषयपदार्थान्तरीयसहचारवारणाय प्रकृतव्यापकत्वभान-
प्रयोजकसहचारोऽवश्यं विवक्षणीयः। तत्त्वं च प्रकृतव्यापकताविष-
यकत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकाविषयताकत्वम्।एवं
चाभावादिनिष्ठहेतुसहचारमादायोक्तकल्पेऽपि न दोषावकाशस्ताद-
शसहचारविशिष्टवैशिष्ट्यबुद्धित्वस्यैव ताहशसहचारज्ञानजन्य-
तावच्छेदकत्वात् प्रकृतव्यापकत्वावगाहिताया अतथात्वात् । प्रकृत-
व्यापकत्वविशिष्टसाध्यवैशिष्ट्यावगाहिबोधादिनिष्ठप्रकृतव्यापकता-
विषयकत्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणतायां प्रकृतव्याप-
कताविषयकत्वावच्छिन्नायां तद्धटकाभावादिनिष्ठहेतुसहचारादिवि-
षयताया अवच्छेदकत्वेऽपि जन्यतायां प्रत्यक्षत्वावच्छिन्नत्वं निवेश्य
विशिष्टवैशिष्ट्यबोधत्वावच्छिन्ननिरूपितजनकतावच्छेदकाविषयता-
कोक्तसहचारवारणं सुकरमेव । तथाऽपि कालांतरीणप्रकृतव्या-
प्तिग्रहजनकज्ञानीयव्यतिरेकसहचारविषयताया अपि इदानींतना-
नुमितिप्रयोजकप्रकृतव्यापकत्वविषयताशालिप्रत्यक्षत्वावच्छिन्ननि-
रूपितजनकतावच्छेदकत्वं दुर्वारमेव कालान्तरीणव्याप्तिज्ञानवि-
षयताया इदानींतनव्याप्तिज्ञानविषयतातो भेदविरहात् ।

न च तदनुमितिव्यक्त्युपधायकग्रहनिष्ठा या व्यापकत्वविषयता-
शालिप्रत्यक्षत्वावच्छिन्नकार्यता तत्प्रातियोगिककारणतावच्छेदकत्व-
विवक्षया नायं दोषः। इदानींतनानुमित्युपधायकेदानींतनव्यापकता-
ग्रहेऽन्वयसहचारमात्रग्रहाधीने कालान्तरीणव्यतिरेकसहचारग्रहका-
र्यताया असत्त्वादिति वाच्यम् । अन्वयव्यतिरेकसहचारज्ञानयोः प्र-
त्येकमुक्तत्तत्सहचारज्ञानाव्यवहितोत्तरत्वं कार्यतावच्छेदकोटौ नि-
वेश्य हेतुताकल्पन एव व्यतिरेकसहचारज्ञानकार्यताया अन्वयसहचा-
रमात्रग्रहाधीनव्याप्तिग्रहावृत्तित्वोपपत्तेः । अव्यवहितोत्तरत्वानिवेशे
च व्यभिचारावारकव्यापकत्वविषयकत्वादीनां कार्यतावच्छेदके नि-
वेशस्याप्रामाणिकतया व्यापकत्वविषयकप्रत्यक्षत्वाद्यवच्छिन्नकार्यता-
घटितलक्षणेऽसम्भवात् । कार्यतावच्छेदकेऽव्यवहितोत्तरत्वमनिवेश्य
व्यभिचारवारणायान्वयव्यतिरेकसहचारविषयत्वान्यतरवत्त्वेन स-
हचारज्ञानस्य व्यापकताग्राहकत्वे व्यतिरेकसहचाराविषयताया

अन्वयसहचारमात्रग्रहाधीनव्याप्तिग्रहनिष्ठकार्यताप्रतियोगिककारणतावच्छेदकताया दुरपह्नवत्वात् अतः स्वापधानप्रयोजकस्य व्यापकत्वविषयतासम्बन्धस्य प्रयोजकं यादृशसहचारविषयकत्वं तादृशसहचारविषयतात्वव्यापकान्वयसहचारविषयतात्वकत्वमनुमितौ विशेषणम्, प्रयोजकत्वं च स्वरूपसम्बन्धविशेषः न तु पूर्वोनिरुक्तमित्युपगतव्यम्। एवं च कालान्तरीयज्ञाननिष्ठो व्यतिरेकसहचारविषयताप्रयोज्यो व्यापकत्वविषयतासम्बन्धो नेदानींतनानुमित्युपधानप्रयोजक इति सकलकेवलान्वय्यनुमानेऽप्युक्तलक्षणनिर्वाहः, स च न सम्भवति, व्यापकत्वविषयतांतर्गतसाधनसहचारविशिष्टाभाववैशिष्ट्यविषयतासम्बन्धप्रयोजकाभावनिष्ठसाधनसहचारादिविषयताया अपि अनुमित्युपधानप्रयोजकव्यापकत्वविषयतासम्बन्धप्रयोजकत्वादित्याशयेनान्वयसहचारत्वघटितलक्षणेऽनिर्भरः।

तादृशसहचारः। प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारः। यद्रूपावच्छिन्नप्रतियोग्यनुयोगिविषयतानिरूपितसहचारविषयता प्रकृतव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नविषयतांतःपातिनी तद्रूपावच्छिन्नप्रतियोग्यनुयोगिविषयतानिरूपितविषयतात्वस्य प्रकृतव्याप्तिग्राहकसहचारत्वावच्छिन्नविषयतात्वव्यापकत्वं विवक्षणीयमतो न पूर्वलक्षणोक्तदोषः। केवलान्वयिन्यपि व्याप्तिग्राहकसहचारादिज्ञानीयसाध्यविषयतायां निरुक्तविषयतात्वासत्त्वादसम्भव इति व्याप्यदिशि सहचारत्वांशनिवेशः।

यद्रूपावच्छिन्नसहचारविषयता व्याप्तिविषयतांतःपातिनी तद्रूपावच्छिन्नविषयतात्वस्य व्यापकत्वोक्तौ व्याप्तिघटकतावच्छेदकसहचारत्वस्य व्यतिरेकसहचारज्ञानीयसहचारविषयतावच्छेदकत्वादतिप्रसङ्ग इति व्यापकत्वदिशि प्रतियोग्यनुयोगिनोर्विषयताविशेषनिवेशः। प्रतियोग्यनुयोगिनोरेकतरमात्रनिवेशे जन्यज्ञानविषयत्ववान् जन्यज्ञानविषयत्वाभावादित्याद्युक्तव्यतिरेकिणि व्यतिरेकसहचारविषयतायाः साधनताद्यवच्छेदकैकतररूपावच्छिन्नविषयतानिरूपितत्वेनातिप्रसङ्गः स्यादिति उभयरूपावच्छिन्नविषयतानिवेशः।

(१) हेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसहचारविषय·

---

(१) पुस्तकान्तरे नास्त्येष पाठः।

दैवन्न सामानाधिकरण्यान्तर्व्याप्तिविषयतांतःपातिताविरहेऽपि न लिः हेतुतावच्छेदकविशिष्टविशेषणतापन्नतादृशप्रकृतव्याप्तिविषयांतःपातिताया एव निवेश्यत्वात् ।

व्यापकत्वदिशि सहचारत्वनिवेशो न कार्यः प्रयोजनविरहात् । तियोग्यादिनिष्ठविषयताविशेषानिरूपितविषयतात्वपर्यन्तानिवेशला‐र्थैव चात्र सहचारपदम् ।

अथात्र लक्षणे धूमाभाववान् वह्न्यभावादित्यत्र धूमप्रमाविषयत्वाभाववान् वह्निप्रमाविषयत्वाभावादित्यत्र वा साध्याभावत्वहेत्वभावत्वाभ्यां सहचारदर्शनगृहीतव्याप्तिके व्यतिरेकिण्यातिव्याप्तिर्दुर्वारैव । अन्वयव्याप्तावप्यभावत्वावच्छिन्नसहचारत्वेन सहचारस्य निवेशादुक्तसहचारज्ञानीयविषयताया अपि तद्रूपावच्छिन्नत्वात् । व्याप्तिघटकतानवच्छेदकरूपानवच्छिन्नतद्रूपावच्छिन्नप्रतियोग्यादिविषयतानिवेशे च महानसीयवह्नित्वादिना सहचारदर्शनगृहीतशुद्धवह्नित्वाद्यवच्छिन्नव्याप्तिके केवलान्वयिन्यव्याप्तिः । सहचारप्रतियोगिन्यधिकस्य महानसीयत्वादेर्भानेऽप्युक्तसहचारदर्शनस्याधिकं त्वित्यादिन्यायेनोक्तव्याप्तिग्राहकताया निर्विवादत्वात् । न च प्रकृतव्याप्तिग्राहकताप्रयोजकं यद्व्याप्तिघटकतानवच्छेदकरूपावच्छिन्नत्वं तच्छून्यविषयतानिरूपितविषयतात्वस्य व्यापकत्वं विवक्षणीयम् । महानसीयवह्नित्वादिना वह्न्यादेः सहचारग्रहाच्छुद्धवह्नित्वावच्छिन्नव्याप्तिग्रहस्थले प्रकृतव्याप्तिघटकतानवच्छेदकमहानसीयवह्नित्वाद्यवच्छिन्नत्वस्य व्याप्तिभानप्रयोजकसहचारप्रतियोगिविषयतानिष्ठस्य व्याप्तिग्राहकतायामनुपयोगाद्विशिष्टव्यतिरेकस्य तादृशविषयतायामक्षततयाऽव्याप्त्यनवकाशात् । दर्शिताभावसाध्यकव्यतिरेकिणि च व्याप्तिभानप्रयोजकसहचारप्रतियोगिविषयतानिष्ठस्याभावरूपसाध्यात्मकप्रतियोग्यवच्छिन्नत्वस्य व्याप्तिग्राहकतायामपेक्षणीयतया न तद्विषयतायां विशिष्टव्यतिरेक इत्यतिव्याप्तेरप्यनवकाश इति वाच्यम् । यद्रूपावच्छिन्नसाध्यसाधनयोः केवलान्वयिनोर्व्यतिरेकसहचारभ्रमः कस्यापि कदाऽपि न प्रसिद्धस्तद्रूपावच्छिन्नसाध्यसाधनकव्याप्तिग्राहकताप्रयोजकतद्व्याप्तिघटकतानवच्छेदकावच्छिन्नत्वस्याप्रसिद्ध्या तद्रूपावच्छिन्नसाध्यसाधनककेवलान्वयिन्यव्याप्तेरिति चेन्न । प्रकृतव्याप्तिघटकतानवच्छेदकरूपनिरूपितत्वप्रकृतव्या‐

प्तिग्राहकताप्रयोजकत्वोभयाभाववत्स्वनिष्ठावच्छेद्यतासामान्यकप्रतियोग्यनुयोगिविषयताया व्यापकदिशि निवेशेन सामंजस्यात्। प्रकृतव्याप्तिग्रहसामान्यनिष्ठप्रतिबंधकतावच्छेदकविषयतात्वस्य वा विवक्षणीयत्वात्। तादृशप्रतिबन्धकता च प्रतियोग्यनुयोग्यनुपरागेण सहचारविषयकज्ञानावृत्तित्वेनापि विशेषणीया, तेन धूमाभाववान् वह्न्यभावादित्यादौ यत्र धूमाभावाभावस्तत्र वह्न्यभावाभाव इत्यादिसहचारज्ञानीयसहचारविषयताया आधेयत्वं नाभावाधिकरणीयमित्यादिज्ञाननिरूपितव्याप्तिज्ञानसामान्यनिष्ठप्रतिबंधकतावच्छेदकत्वेऽपि नातिव्याप्तिः । अभावाधिकरणावृत्तिरभाव इति ज्ञानस्य चाहार्यतया तत्प्रतिबन्धकतावच्छेदकत्वं व्यतिरेकसहचारविषयताया असम्भावितमेव ।

ननु व्यतिरेकिणि व्यतिरेकसहचारादेवान्वयव्याप्तिर्गृह्यते तदेव च व्यतिरेकित्वप्रयोजकमिति मतं तन्न युक्तम्। व्यतिरेकसहचारस्य स्वातंत्र्येण व्याप्तिग्राहकत्वे मानाभावादधिकरणविशेषे व्यभिचारशंकानिवर्तनद्वारैव क्वचित्तदुपयोगादन्वयसहचारग्रहं विना तद्घटिताया अन्वयव्याप्तेर्दुर्ग्रहतया केवलव्यतिरेकिविलोपापत्तेश्च ।

न च विशिष्टसहचारानुपस्थितावपि तद्घटकपदार्थानां विशृंखलानामुपस्थित्याऽन्वयव्याप्तिधीर्विशेष्ये विशेषणमित्यादिन्यायेन सम्भवत्येवेति वाच्यम् । एवं सति व्यतिरेकसहचारान्वयसहचारयोरुभयोरप्यग्रहे उक्तरीत्या व्याप्तिग्रहसम्भवेन तदनुमानस्य तुरीयतापत्तेः ।

अस्तु वा ऽन्यतरसहचारस्य स्वातन्त्र्येणैव व्यापकताग्राहकत्वं तथाऽपि तत्प्रत्यक्ष एव तद्धेतुतया शब्दादिना व्याप्तिग्रहे तदपेक्षाविरहात् शब्दादिजन्यप्रत्येकपदार्थोपस्थितिमूलकग्रहाविषयव्याप्तिकानुमानस्य तुरीयतापत्तिर्दुर्वारैवेति व्यतिरेकिणि व्यतिरेकव्याप्तेरेव गमकता व्याप्तेरन्वयादिनिरूप्यत्वमेवान्वयित्वादिप्रयोजकमिति मणिकारीयमतमेव साधीयः तन्मतमेवावलम्बमानः केवलान्वयित्वं निर्वक्ति। गृहीतव्याप्तिभेदात् । तत्कालीनतत्पुरुषीयानुमित्यौपयिकव्याप्तेरन्वयादिनिरूप्यत्वरूपवैलक्षण्यात् । प्रकृतहेतुकेति। प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यविधेयकत्वघटितधर्मावच्छिन्नतत्कालीनतत्पुरुषीयानुमितिनिष्ठकार्यतानिरूपितकारणतायां यादृशरूपावच्छिन्नप्र-

कृतहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वमवच्छेदकं ता-दृशरूपनिष्ठविषयतात्वव्यापकप्रकृतसाध्यान्वयव्याप्तित्वावच्छिन्नवि-षयतात्वकानुमितिकरणत्वं तद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतु-कतत्कालीनतत्पुरुषीयकेवलान्वय्यनुमानत्वमित्यर्थः। यत्र व्यतिरेकिणि महानसवृत्तित्वादिना विशिष्टस्य हेतुता तत्र साध्याभावव्यापकाभावप्र-तियोगितावच्छेदकताद्दशहेतुतावच्छेदकरूपव्याप्तौ धूमव्यापकवह्नि-सामानाधिकरण्यत्वरूपप्रकृतसाध्यान्वयव्याप्तित्वसत्त्वादतो विषयता-पर्यन्तनिवेशः। हेतुतावच्छेदकावच्छिन्नस्य साध्याभावव्यापकाभावप्र-तियोगित्वस्य हेतुतावच्छेदकावच्छिन्नविशेषणतापन्नस्य वा तस्य व्या-प्तित्वमते एतद्दोषानवकाशेऽप्यखण्डव्याप्त्यप्रसिद्धिस्थले केवला-न्वय्यनुमानसङ्ग्रहाय विषयतानिवेशनं बोध्यम्। सदनुमानस्य प्र-मात्मकव्याप्तिविशिष्टलिङ्गज्ञानरूपस्यैव लक्ष्यत्वे च यथाश्रुतव्या-प्तिरेव निवेश्यते। तेजोविशेषत्वादिना वह्नेर्व्यतिरेकव्याप्तेर्वह्नित्वादि-ना च तस्यान्वयव्याप्तेर्ग्रहादुभयरूपेण यत्र वह्न्यनुमितिस्तत्र केव-लान्वयिनि वह्नित्वावच्छिन्नसाध्यकानुमाने यत्र च धूमत्वावच्छि-न्नान्वयव्याप्तेर्द्रव्यविशेषत्वावच्छिन्ने च व्यतिरेकव्याप्तेर्ग्रहादनुमिति-स्तत्र केवलान्वयिनि धूमत्वावच्छिन्नहेतुकानुमाने ऽव्याप्तेर्वारणाय प्रकृतसाध्यतावच्छेदकप्रकृतहेतुतावच्छेदकयोर्निवेशः।

ननु पृथिवीत्वादिव्यापकीभूताभावप्रतियोगित्वादिरूपहेतुताव-च्छेदकपुरस्कारेण गृहीतान्वयव्याप्तिके तद्रूपावच्छिन्नहेतुककेवला-न्वय्यनुमानेऽव्याप्तिः हेतुतावच्छेदकरूपव्यतिरेकव्याप्तावन्वयव्या-प्तित्वविरहात्। तादृशहेतुतावच्छेदकावच्छिन्नहेतुमत्तानिश्चयत्व-स्यापि तदनन्तरानुमितिजनकतावच्छेदकत्वात्तादृशहेतुतावच्छे-दके निरुक्तप्रकृतसाध्यकानुमित्यौपयिकव्याप्तित्वस्याक्षतत्वाच्चेत्य-त आह। जलमिति। तद्विशिष्टपक्षधर्मताज्ञानेऽपि। पक्षे तद्विशिष्टव-त्तानिश्चयेऽपि। व्याप्त्यन्तरबोधं विना। तद्रूपावच्छिन्नविशेषणतया निर्गन्धत्वव्याप्तिभानं विना। निर्गन्धत्वानुमित्यनुदयादिति।

अयं भावः। निरुक्तनिश्चयत्वस्यावच्छेदकत्वं न स्वरूपसम्ब-न्धविशेषः व्याप्तित्वेन पदार्थान्तरावगाहिनिश्चयस्याप्यनुमितिज-नकतया तदसङ्ग्राहकस्य व्याप्तिविशिष्टवत्तानिश्चयत्वस्य तादृशा-

वच्छेदकत्वासंभवात् किं त्वनतिरिक्तवृत्तित्वम् । एवं च निर्गन्धत्वव्याप्त्यनवगाहिज्ञानसाधारणस्य दर्शितहेतुतावच्छेदकविशिष्टवत्तानिश्चयत्वस्य निर्गन्धत्वानुमितिजनकतातिरिक्तवृत्तित्वात् तत्र च न निरुक्तव्याप्तित्वमिति ।

यद्यपि धूमत्वावच्छिन्नवत्तानिश्चयत्वस्य स्वरूपसम्बन्धरूपावच्छेदकत्वाश्रयत्वमादाय धूमत्वावच्छिन्नहेतुकान्वयिन्यपि लक्षणानुपपत्तेः व्यतिरेकव्याप्त्यवच्छिन्नहेतुकान्वयिपर्यन्तानुसरणमनुचितम् । तथाऽपि यत्किञ्चिद्व्यापकताघटितत्वरूपमन्वयव्यतिरेकव्याप्त्यन्यतरत्वरूपं वा व्याप्तित्वं यदि जनकज्ञानविषये निवेश्यते तदा धूमत्वादौ तद्विरहेण न तदवच्छिन्नहेतुकेऽनुपपत्तिरिति व्यतिरेकव्याप्त्यवच्छिन्नहेतुकस्थले दर्शितरीत्याऽनुपपत्त्युद्धारः ।

इदमुपलक्षणम् । प्रकृतसाध्यीयव्यतिरेकव्याप्त्यवच्छिन्नहेतुके तु केवलान्वयिन्यव्याप्तिवारणाय वक्ष्यमाणयाऽपि रीत्या एतद्दोषोद्धारो बोध्यः ।

ननूक्तरीत्या साध्यान्तरीयव्यतिरेकव्याप्तिहेतुतावच्छेदककेवलान्वयिन्यव्याप्तिपरिहारेऽपि वन्ह्यभाववान् वह्निव्यापकीभूताभावप्रतियोगिन इत्यादौ केवलान्वयिन्यव्याप्तिर्दुर्वारैव । तत्र हेतुतावच्छेदकरूपाया व्यतिरेकव्याप्तेरपि प्रकृतसाध्यकानुमित्यौपयिकत्वात् । तद्विशिष्टवत्ताज्ञानसत्त्वे व्याप्त्यन्तरबोधं विनाऽपि प्रकृतसाध्यकानुमित्युत्पादादत आह । वन्ह्यभाववानिति ।

(दी०) वन्ह्यभाववान् वह्निव्यापकीभूताभावप्रतियोगिमत्त्वादित्यादावन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नाप्रसङ्गः । अत एवेतरव्यापकाभावप्रतियोगित्वेनाभावप्रतियोगित्वेन वा यल्लिङ्गज्ञानं न प्रकृतसाध्यानुमितिहेतुस्तत् केवलान्वयीत्यपि वदन्ति । एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यम् । अभिधेयत्वं शब्दशक्यत्वम् । विपक्षत्वव्याघातो विपक्षत्वासिद्धिः ।

(गा०) न तु सैव । व्यतिरेकव्याप्तिरेव । प्रकृतसाध्यकानुमित्यौपयिकीत्यनुषज्यते । प्रकृतहेतुतावच्छेदकविशिष्टविशेषणतापन्नयद्धर्मविशिष्टवत्ताज्ञानत्वं प्रकृतानुमितिजनकतावच्छेदकं तत्त्वमनुमित्यौपयिकत्वं प्रकृते विवक्षणीयमिति भावः ।

अथ दर्शितव्यतिरेकव्याप्तिरूपहेतुतावच्छेदकविशिष्टविशेषणतापन्नमेयत्वादिविशिष्टवत्तानिश्चयत्वस्यापि प्रकृतानुमितिजनकतानतिरिक्तवृत्तित्वात् मेयत्वादौ च प्रकृतसाध्यव्याप्तित्वाभावादव्याप्तिर्दुर्वारैव । अनुमितिप्रयोजकविषयताश्रयत्वेन धर्मविशेषणे च व्यतिरेकव्याप्त्यवच्छिन्नान्वयव्याप्तेरप्यनुमित्यौपयिकत्वं दुर्घटं तदनवगाहिनोऽपि व्यतिरेकव्याप्तिविशिष्टवत्ताज्ञानादनुमित्युत्पत्त्या तद्विषयताया अनुमित्यप्रयोजकत्वात् । अन्वयव्यतिरेकव्याप्त्यन्यतरत्वेन यद्धर्मविशेषणे यत्र व्यतिरेकव्याप्तिरप्रसिद्धा तत्साध्यकानुमानाव्याप्तिरिति चेन्न । निरुक्तव्याप्तिविषयतात्वव्यापकव्यतिरेकव्याप्तिविषयतात्वाभावकत्वस्य विवक्षितत्वात् । व्यतिरेकव्याप्तेर्वाच्यतादिसाध्यकेऽप्रसिद्धावपि न क्षतिः । खण्डशः प्रसिद्ध्या तद्घटकपदार्थानां विषयताकूटस्य विवक्षणीयत्वात् ।

वस्तुतस्तु यद्रूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकनिश्चयत्वमनुमितिकरणतानातिरिक्तवृत्ति तत्त्वमेवानुमित्यौपयिकव्याप्तित्वमित्यस्य विवक्षितत्वात् । मेयत्वादिकं च न तथा मेयत्वाद्यवच्छिन्नवह्निव्यापकाभावप्रतियोगित्वावच्छिन्नप्रकारकस्यापि व्याप्त्यन्तरानवगाहिनोऽनुमित्यजनकत्वात् । यदवच्छिन्नाभावत्वेन व्यापकता व्यतिरेकव्याप्तिशरीरे प्रविष्टा प्रकारांशे तादृशहेतुतावच्छेदकाप्रकारकनिश्चयस्यानुमित्यजनकत्वात् तादृशनिश्चयत्वस्य जनकतातिरिक्तवृत्तित्वात् । वह्निव्यापकीभूताभावप्रतियोगित्वसहितस्य जलत्वत्वादेर्हेतुतावच्छेदकता यत्र तत्रान्वयव्याप्तेस्तदवच्छिन्नांशे भानस्यानुमितावनुपयोगात्तत्र केवलान्वयिताया एवानुपगमादपि तु जलत्वत्वाद्यवच्छिन्नलिङ्गकव्यतिरेकिताया एवोपगमात् । एवं च निरुक्तहेतुतावच्छेदकसहितवह्निव्यापकाभावप्रतियोगित्वप्रकारकनिश्चयस्यानुमित्यजनकत्वमित्याशयेनैव वह्निव्यापकाभावप्रतियोगित्वरूपहेतुतावच्छेदकस्यानुमित्यौपयिकव्याप्तित्वनिराकरणम् ।

न च धूमव्यापकवह्निसमानाधिकरणरासभवानित्यादिज्ञानाद्नुमितिवारणाय हेतुतावच्छेदकसहितस्यैव व्यापकसामानाधिकरण्यस्य हेत्वंशे भानमनुमितावुपयुज्यतां साध्याभावव्यापकाभावप्रतियोगित्वस्य च केवलस्यैव भानमुपयुज्यतामिति वाच्यम् । तथा सति द्रव्यत्वाभावव्यापकविशिष्टसत्तात्वावच्छिन्नाभावप्रतियोगिसत्तादिमत्ताज्ञानाद् गुणादौ बाधानवतारदशायां द्रव्यत्वाद्यनुमानापत्तेः । हेतुतावच्छेदकस्य च व्याप्तिधर्मितावच्छेदकतया भानं यदि नोपयुज्यते तदा नोपयुज्यतामिति ।

एतेन केषांचिद्व्यतिरेकव्याप्तिरनुमित्यौपयिकी । न तु सैव । अन्वयव्याप्तिरेव । एवकारोऽप्यर्थे । एवं च तत्र केवलान्वयिता नाभ्युपेयते एवान्वयव्याप्तिभानस्याकिञ्चित्करत्वादि(१)(त्यत्रालक्ष्यतया नाव्याप्तिरिति भावः) ति व्याकारोऽव्याकार एव । तन्मते उक्तानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुककेवलान्वय्यनुमानत्ववत्तद्वच्छिन्नहेतुकव्यतिरेक्यनुमानत्वमपि न सम्भवति तद्रूपावच्छिन्ने व्यतिरेकव्याप्तेरग्रहेण तस्य हेतुतानवच्छेदकत्वात् ।

न च तादृशानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नलिङ्गकव्यतिरेकित्वासम्भवेऽपि तद्रूपशरीरे यद्रूपावच्छिन्नाभावत्वावच्छिन्नव्यापकत्वं निविष्टं तद्रूपावच्छिन्नहेतुकव्यतिरेकित्वमव्याहतमिति तदेवोपगन्तव्यमिति वाच्यम् । तथा सति ग्रन्थकृतो वह्निव्यापकाभावप्रतियोगिमत्त्वादिति हेतुनिर्देशासङ्गतेरिति चिन्तनीयम् ।

सांप्रदायिकास्तु, जलं निर्गन्धमित्यादिकं प्रकृतसाध्यकेत्यस्य व्यावृत्तिप्रदर्शनपरम् वन्ह्यभाववानित्यादिकं तु प्रकृतहेतुकेत्यस्य व्यावृत्तिप्रदर्शनपरमिति वदन्ति । तदसत् । जलं निर्गंधमित्यादौ हेतुतावच्छेदकीभूतपृथिवीत्वाभावानुमित्यौपयिकव्याप्तेर्वह्न्यभावसाध्यके हेतुतावच्छेदकीभूतवह्निव्यापकाभावप्रतियोगित्वरूपव्याप्तेरिव प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्याप्तित्वाभावादेव वारणे तत्र प्रकृतसाध्यकत्वनिवेशव्यावृत्त्यसंगतेः ।

न च यदवच्छिन्नाभावत्वेन हेत्वभावनिष्ठा साध्याभावव्यापकता यादृशव्यतिरेकव्याप्तौ प्रविष्टा सा तद्धर्मावच्छिन्नहेतुका व्या-

---

(१) पुस्तकान्तरे नास्त्येष पाठः ।

प्तिः । एवं जलत्वत्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटित-व्याप्तेः पृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुकत्वविरहेऽपि पृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्याप्तेस्तादृशाभावप्रतियोगित्वावच्छिन्नहेतुकतया ता-दृश्याः पृथिवीत्वव्यापकताघटितव्याप्तेरेव प्रकृते विवक्षणान्न प्रकृत-हेतुकेत्यनेन तद्व्यावृत्तिरिति वाच्यम् । एवं सति पृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नाभावत्वरूपपृथिवीत्वव्यापकतावच्छेदकस्य पृथिवीत्वव्यापकताघटितत्वेनात्माश्रयादवच्छेद्यावच्छेदक-भावानुपपत्तेः ।

अवच्छेदकप्रविष्टा पृथिवीत्वव्यापकता जलत्वत्वावच्छिन्नाभा-वत्वावच्छिन्ना अवच्छेद्यीभूतपृथिवीत्वव्यापकाभावप्रतियोगित्वा-वच्छिन्नाभावत्वावच्छिन्नपृथिवीत्वव्यापकतातो भिन्नैवेति नात्मा-श्रय इति चेत्तर्हि हेतुतावच्छेदकीभूतपृथिवीत्वव्यापकाभावप्रतियो-गित्वात्तादृशाभावप्रतियोगित्वावच्छिन्नाभावत्वावच्छिन्नव्यापकता-घटितात्तद्व्यापकतावच्छेदककोटिप्रविष्टजलत्वत्वावच्छिन्नाभावत्वाव-च्छिन्नव्यापकताघटितं पृथिवीत्वव्यापकाभावप्रतियोगित्वमन्यदेवेति कथं हेतुतावच्छेदकीभूतव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्न-हेतुकव्याप्तित्वम् । तथा च प्रकृतहेतुतावच्छेदकगर्भे तदवच्छिन्ना-भावत्वाद्यवच्छिन्नव्यापकतायास्तद्रूपघटितत्वेन कथंचिदपि नि-वेशासम्भवात् । प्रकृतहेतुतावच्छेदकरूपव्याप्तेः प्रकृतहेतुतावच्छे-दकावच्छिन्नहेतुकव्याप्तित्वं दुर्घटमेव ।

अन्ये तु वह्न्यभाववान् वह्निव्यापकीभूताभावप्रतियोगिमत्त्वादि-त्यादिका प्रकृतहेतुकत्वव्यावृत्तिप्रदर्शनपरा फक्किकैव प्राथमिकी त-दुपरि जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादिकं प्रकृतहेतुकेत्यस्य व्यावृत्तिस्थलं किमर्थमुपेक्षितमित्याकांक्षायां चरमा, जलं निर्गन्धमित्यादिफक्किका जलं निर्गन्धमित्यादौ हेतुतावच्छेदक-व्यतिरेकव्याप्तेः प्रकृतसाध्यकानुमित्यौपयिकत्वाभावादेव वारणे प्रकृतहेतुतावच्छेदकेत्यस्य न तद्वारणप्रयोजनकत्वमिति तदर्थं इ-त्याहुः । तदपि न सम्यक् । वह्निमान् धूमादित्यादेः केवलान्वय्यनुमा-नस्यैव तद्व्याक्तित्वादिना धूमादेर्व्यतिरेकितादशायां सङ्ग्रहाय प्रकृतहे-तुकेत्यस्यावश्योपादेयतया तद्व्यावृत्तिस्थलान्तरानुसरणानौचित्यात् ।

गृहीतव्याप्तिभेदाद्भेदे प्राचीनसंवादमाह । अत एवेति । यल्लिङ्गज्ञानम् । यद्रूपावच्छिन्नलिंगविषयता । न प्रकृतसाध्यानुमितिहेतुः । न प्रकृतसाध्यानुमितिजनकतावच्छेदकीभूता तथा चेतरव्यापकाभावप्रतियोगित्वप्रकारतानिरूपितयद्रूपावच्छिन्नलिङ्गविषयतासामान्यमभावप्रतियोगित्वप्रकारतानिरूपितयद्रूपावच्छिन्नलिङ्गविषतासामान्यं वा तत्कालीनतत्पुरुषीयप्रकृतसाध्यानुमितिजनकतावच्छेदकत्वशून्यं तादृशानुमितिकरणं तद्रूपावच्छिन्नतत्पुरुषीयतत्कालीनप्रकृतसाध्यककेवलान्वय्यनुमानमित्यर्थः ।

इतरत्वमुपलक्षणमतो वन्ह्यभावव्यापकाभावप्रतियोगित्वरूपव्याप्तिग्रहेणेतरत्वानवगाहनेऽपि न क्षतिः ।

यद्यपि यत्र साध्याभावातिरिक्तयत्किञ्चिद्व्यापकाभावप्रतियोगित्वस्यान्वयव्याप्तेश्च विशेष्यविधया लिङ्गतावच्छेदकावच्छिन्नस्यैकधैव समूहालंबनवैलक्षण्येन भानं तत्र केवलान्वयिन्यव्याप्तिस्तत्र तादृशाभावप्रतियोगित्वप्रकारतानिरूपिताविशेष्यताया एव अन्वयव्याप्तिप्रकारतानिरूपिततया प्रकृतानुमित्यौपयिकत्वात् । केवलान्वयिसाध्यके साध्याभावाप्रसिद्ध्या प्रकृतसाध्याभावव्यापकीभूताभावप्रतियोगित्वपर्यन्तानिवेशासम्भवात् । तथाऽपि तादृशप्रतियोगित्वप्रकारतानिरूपितलिङ्गविषयतास्थले लिङ्गविषयतानिरूपिततादृशप्रतियोगित्वप्रकारताया विवक्षणान्न दोषः । एवं चाभावप्रतियोगित्वप्रकारतामात्रनिवेशेनाप्युपपत्तेरभावविशेषणव्यापकताप्रवेशनमनर्थकमित्याशयेनाभावप्रतियोगित्वेन वेत्युक्तम् । साध्यसामानाधिकरण्यरूपाया अन्वयव्याप्तेरपि साध्यसम्बन्धिनिष्ठसम्बन्धप्रतियोगित्वरूपतयाऽसम्भव इत्यतोऽभावोपादानम् । केवलान्वयिमेयत्वादिहेतुकस्थले चाभावप्रतियोगित्वेन लिङ्गतावच्छेदकावच्छिन्नविषयताभ्रम एव प्रसिद्ध इति नाव्याप्तिरिति सर्वत्र भ्रमस्याप्रामाणिकतया स्वयमन्यथा केवलान्वयित्वं निरुक्तमिति बोध्यम् ।

एवं केवलव्यतिरेकित्वादिकमिति । यथायथमन्वयसहचारान्वयव्याप्तिस्थले व्यतिरेकसहचारव्यतिरेकव्याप्ती निवेश्य केवलव्यतिरेकित्वमुभयव्याप्तिं निवेश्य चान्वयव्यतिरेकित्वं निर्वाच्यमित्यर्थः ।

केवलान्वयिनोऽभिधेयत्वस्य न विपक्ष इत्यभिधेयत्वसाध्यककेवलान्वय्यनुमानलक्षणसंगमनपरे मूलग्रंथे ऽभिधेयत्वं यदि श-

शब्दबोध्यत्वरूपं विवक्षितं तदा यथा आकाशशब्दाच्छब्दाश्रयत्व-मनभिधेयमप्युपातिष्ठत इत्यग्रिमग्रंथविरोधः । प्राचीनमते शब्दा-श्रयत्वस्याकाशपदाशक्यत्वेऽपि शब्दबोध्यत्वरूपाभिधेयत्वेऽवि-घातात् । अन्यथा शब्दादुपातिष्ठते इत्यस्यैव व्याघातादित्यतो व्याचष्टे। अभिधेयत्वमिति । अनभिधाने । अभिधेयत्वशून्यत्वात्म-केऽभिधेयत्वशून्यत्वरूपाभिधेयत्वविपक्षताविरहप्रसंजकत्वरूपं त-द्व्याघातकत्वं न सम्भवतीति व्याघातपदमन्यथा व्याचष्टे । वि-पक्षत्वासिद्धिरिति । विपक्षादिपदेन विपक्षतयाऽभिमतस्यानभिधाने तत्र शब्दप्रमाणाप्रवृत्तेस्तदप्रवृत्तौ च न्यायसाध्यपरार्थानुमानस्या-नावकाशात् परं प्रति तस्य विपक्षत्वासिद्धेरसम्भव इति भावः ।

(चि०) अथ यथा आकाशशब्दाच्छब्दाश्रयत्व-मनभिधेयमप्युपतिष्ठते तथाऽभिधेयत्वाविपक्षस्यान-भिधेयत्वेऽपि पदादुपस्थितिः स्यात् । एवं चाभिधेय-त्वं कुतोऽपि व्यावृत्तं धर्मत्वात् गोत्ववदिति चेन्न । व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्वयि, व्यावृत्तत्वे यत एव व्यावृत्तं व्यावृत्तत्वं तदेव केव-लान्वयीति धर्मत्वस्यानैकान्तिकत्वात् । एवमत्यन्ता-भावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वेऽत्यन्ता-भावप्रतियोगित्वमेव केवलान्वयि, अत्यन्ताभावप्र-तियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोगि अत्यन्ता-भावप्रतियोगित्वं तदेव केवलान्वयि । न चात्यन्ता-भावप्रतियोगित्वं व्यावृत्तत्वं च नानेति वाच्यम् । अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः ।

(दी०) ननु व्यावृत्तत्वमन्योन्याभावप्रतियोगितावच्छे-दकत्वं तच्च लघुगुरुसाधारणं गगनादिनिष्ठान्योन्याभावप्र-तियोगितावच्छेदकं चेति न व्यभिचार इत्यत आह । एवमिति ।

(गा०) मूलेऽनभिधेयमिति । तच्छब्दानभिधेयमित्यर्थः । उपतिष्ठत

इति । संबन्धिस्मृतौ प्रकारांशे संबन्धग्रहस्यानपेक्षिततया शब्दाश्रयत्वस्याशक्यत्वेऽपि तत्प्रकारेण धर्मिणि शक्तिग्रहादेव तत्प्रकारेण धर्मिस्मरणस्य तद्धर्मांशे द्रव्यत्वादिव्यावर्तकानतिप्रसक्तत्वरूपशक्यतावच्छेदकत्वग्रहादेव तत्प्रकारकशाब्दबोधस्य च सम्भवादिति भावः।

एतच्चोपलक्षणम्, लक्षणयाऽनभिधेयस्योपस्थितावपि दृष्टान्तत्वसम्भावात् शब्दादनभिधेयस्य विपक्षस्योपस्थितावपि तत्र विपक्षत्वे मानाभावः, शब्दस्य परं प्रति आप्तोक्तत्वासिद्धेः, अनुमानं च साध्याद्यप्रसिद्ध्या न सम्भवतीत्याशंक्याभिधेयत्वविपक्षसिद्धिपर्यवसायिसाध्याप्रसिद्ध्याद्यनास्कंदितमभिधेयत्वपक्षकमनुमानमाह । एवं चेति । अनाभिधेयत्वेऽपि । शब्दादुपस्थितिसम्भवे चेत्यर्थः ।

एतेन विपक्षस्योक्तानुमानेऽपि सामान्यतः साध्यघटकतया शब्दादनुपस्थितौ शब्देन साध्यादेः प्रतिपादनासम्भवात्परार्थानुमानासम्भवो निराकृतः ।

प्रकृतानुमानेनैव विपक्षत्वधर्मिपर्यन्तस्य सिद्धये धर्मिणमन्तर्भावयति । कुतोऽपीति । इत्यनुमानात् । विपक्षसिद्धिरिति शेषः । अव्यावृत्तत्वे । सार्वत्रिकत्वे । केवलान्वयि । व्यावृत्तत्वरूपसाध्यविरहि । एवमग्रेऽपि ।

ननु व्यावृत्तत्वस्यात्यन्ताभावप्रतियोगित्वरूपत्वे "एवमत्यन्ताभावप्रतियोगित्वस्ये"त्यादिना सह व्यावृत्तत्वस्येत्यादेः पौनरुक्त्यमतो व्यावृत्तत्वमन्यथा व्याचक्षाण एव व्यावृत्तत्वस्येत्यादिना दर्शितं व्यभिचारमुद्धृत्यात्यन्ताभावप्रतियोगित्वे व्यभिचारप्रदर्शनपरमेवमित्यादिग्रंथमवतारयति दीधितौ । नन्विति । अन्योन्याभावेति । अन्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वमित्याशयेन निरुक्तव्यावृत्तत्वसाधनमित्याशयः ।

लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽन्योन्याभावप्रतियोगितावच्छेदकत्वरूपव्यावृत्तत्वसाध्यकानुमाने कंबुग्रीवादिमत्त्वादावेव धर्मत्वहेतोर्व्यभिचार इत्यतस्तन्निराकरणाय गुरोरप्यवच्छेदकत्वमंगीकरोति । लघ्विति ।

व्यावृत्तत्वं यतो व्यावृत्तं तस्य केवलान्वयित्वनिबंधनमुक्तव्यभिचारं निरस्यति । गगनेति । इति न व्यभिचार इत्यत्रेतिना अत-

इत्यर्थकेनोक्तोभयमेव परामृश्यते प्रथमे साध्यसत्त्वात् । गगनादौ च धर्मत्वरूपहेतुविरहाद्व्यभिचारनिरासो बोध्यः ।

मूले केवलान्वयीति । अत्यंताभावाप्रतियोगिनोऽन्योन्याभावप्रतियोगितावच्छेदकत्वरूपव्यावृत्तत्वाप्रसक्तेरिति भावः ।

नानेति । तथाचैकधर्मनिष्ठं व्यावृत्तत्वादिकं तद्रूपवद्धर्मांतराद्यावृत्तं तस्य च न केवलान्वयित्वसम्भव इत्यतो न व्यभिचार इति भावः । तयोः । अनुगतयोः । सिद्धिः ।

(चि०) तत्र न तावदव्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी, तस्य प्रतियोग्यवच्छिन्नेऽप्यत्यन्ताभावात्, अत्यन्ताभावाप्रतियोगिनश्च केवलान्वयित्वात्, नापि आश्रयनाशजन्यगुणनाशात्यन्ताभावः तस्य नाशस्य सर्वत्रात्यन्ताभावादिति वाच्यम् । यत्र हि प्रतियोगिप्रागभावो वर्त्तते तत्र न तदत्यन्ताभावो वर्त्तते, तथा च नाशस्य प्रागभावो यत्र नाशप्रतियोगिसमानदेशो वर्त्तते तत्र कथं नाशात्यन्ताभावो वर्त्तताम् । तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेन्न । पूर्वं तत्र नाशप्रागभावस्यैव सत्त्वादुत्तरकाले आश्रयस्यैवाभावात् । नाप्याकाशात्यन्ताभावः केवलान्वयी, तस्यापि प्रतियोगिरूपात्यन्ताभावप्रतियोगित्वात् । अभावात्यन्ताभावस्य भावत्वात् ।

(दि०) नन्वभावप्रतियोगित्वादिकमभावादिव्यक्तिभेदान्नानैव, अनुगतव्यवहारस्तु कथं चिद्विशेषणतावच्छेदकधर्मानुगमादेवं च लक्ष्याप्रसिद्ध्या लक्षणासम्भव इत्याशंकते । तत्रेत्यादि । यत्र हीत्यादिरभ्युपगमवादः । वस्तुतस्तु भूतलादिदेशे समये च तस्य वर्त्तमानत्वादाकाशाभावतुल्यत्वाच्च ।

(गा०) ननु अव्याप्यवृत्त्यभावादेः केवलान्वयित्वाकथनात्तन्निरा-

करणं मूलेऽयुक्तम् । यदि च लक्ष्याप्रसिद्ध्या लक्षणासम्भवं दर्शयितुं यस्य यस्य केवलान्वयित्वं सम्भावितं तस्यैव तथात्वं निराकर्तुमयमुद्यमस्तथाऽपि अभावप्रतियोगित्वादेस्तथात्वस्य प्रदर्शितत्वात्तदनिराकरणेन न्यूनतेत्यत आह दीधितौ । नान्विति । प्रतियोगित्वादिकमित्यादिनाऽन्योन्याभावप्रतियोगितावच्छेदकत्वपरिग्रहः । अभावादीत्यादिनाऽवच्छेदकपरिग्रहः । विशेषणतावच्छेदकेति । स च धर्मोऽभावत्वादिकः । एवं चोक्तरीत्या ऽभावप्रतियोगित्वादेर्यन्निष्ठात्यन्ताभावप्रतियोगित्वं तस्य च न केवलान्वयित्वमिति भावः । एवं चेति । अत्यन्ताभावप्रतियोगित्वादेः केवलान्वयित्वासम्भवे चेत्यर्थः । अभ्युपगमवादः । ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वाभ्युपगमेनोक्तिः ।

ताद्दशविरोधस्य स्वयमनभ्युपगमात्प्रकारांतरेणाश्रयनाशजन्यगुणनाशात्यंताभावस्य केवलान्वयित्वं निराकरोति । वस्तुत इति । तुल्यत्वाच्चेत्यनंतरं नोक्ताभावः केवलान्वयीति पूरणीम् । देशः । स्वप्रतियोगिसमवायिघटाद्याश्रयो बोध्यः । स्वप्रतियोग्याश्रयसत्त्वदशायामुत्पन्नस्य नाशस्य स्वप्रतियोगिसमवायिनो वाऽऽश्रयनाशाधीनगुणनाशस्य स्वप्रतियोगिसमवायिनोऽधिकरणे प्रत्ययस्यानुभवविरुद्धतया तत्र वर्तमानतेति भावः ।

ताद्दशप्रत्यये विवादसंभवात्समये च कालिकविशेषणताया एव सम्बन्धतया दैशिकविशेषणतासंबंधेन ताद्दशनाशाभावस्य केवलान्वयित्वाक्षतेराह । आकाशाभावतुल्यत्वाच्चेति । यथा आकाशाभावस्यावृत्तिप्रतियोगिकत्वेऽपि प्रतियोगिस्वरूपाभावप्रतियोगितया न केवलान्वयित्वं तथा तन्नाशस्यावृत्तित्वेऽपि तदभावस्य तदात्मकाभावप्रतियोगित्वान्न केवलान्वयित्वमित्यर्थः ।

(दी०) अथाभावात्यन्ताभावो न प्रतियोगिरूपस्तथा सत्यन्योन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगिसमानदेशोऽन्योन्याभावो न स्यादिति चेन्न । अत्यन्ताभावात्यन्ताभावः प्रतियोग्येव, अन्योन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधारणो धर्म इति ।

(दी०) अभावाभावस्येति सावधारणम् । भावत्वात्, यदाहुराचार्याः 'स्वाभावविरहात्मत्वं वस्तुनः प्रतियोगिता' इति । प्रतियोग्येवेति । प्रागभावादेरत्यन्ताभावाभावरूपत्वनयेऽपि न क्षतिः, तन्मतेऽत्यन्ताभावस्यापि तदभावरूपतया तस्यापि प्रतियोगित्वात् । असाधारण इति । प्रतियोगितावच्छेदक इति तु तत्त्वम् ।

(गा०) प्रतियोगिनोऽभावाभावत्वनियममंतरेणाकाशस्य प्रतियोगितया स्वाभावाभावत्वव्यवस्थापनं न संभवतीति अभावाभावस्येति मूलमभावाभावस्यैवेत्यर्थकतया वर्णयति । अभावेति । वाच्यत्वादेः किंचिद्विशिष्टस्वाभावाभावत्वेऽपि भावत्वस्याभावाभावत्वव्याप्यत्वं निर्युक्तिकमतो भावपदं प्रतियोगिपरतया व्याचष्टे। भावत्वादिति। प्रतियोगित्वस्याभावाभावत्वानियतत्वं निष्प्रत्यूहमेवाभावाभावत्वस्यैव प्रतियोगितारूपत्वात् । अत्रैवाऽऽचार्यसंवादमाह । यदाहुरिति ।

ननु ध्वंसप्रागभावयोरत्यंताभावविरोधितामते प्रागभावदशायामपि तदधिकरणेऽत्यंताभावविरहसत्त्वात्तस्य च प्रतियोगिरूपत्वासंभवात्प्रागभावादेरेव तद्रूपता तथा चात्यन्ताभावाभावः प्रतियोग्येवेति मूलासंगतिरत आह । प्रागभावादेरिति । तदभावरूपतया । प्रागभावाद्यभावरूपतया । तस्यापि । प्रागभावादेरपि । प्रतियोगित्वात् । अत्यंताभावप्रतियोगित्वात् । घटाद्यसाधारणधर्मरूपादिविशेषकंबुग्रीवादिमत्त्वादेर्भेदाभावत्वाविरहादसाधारणो धर्म इति मूलस्य यथाश्रुतार्थासंगतेराह । प्रतियोगितावच्छेदक इति ।

(दी०) अथान्योन्याभावात्यन्ताभावसाधारणः प्रतियोगितावच्छेदकसम्बन्ध एवाभावाभावः, स च क्वचित्तादात्म्यं क्वचिच्च संयोगादिरिति चेत् ? यद्वत्त्वे हि ज्ञाते यद्वत्त्वं न प्रतीयते तदभाववत्त्वं च व्यवह्रियते तस्यैव तदभावात्मकत्वमुपेयते, प्रतियोगितदभाववत्त्वबुद्ध्योश्च मिथस्तथात्वमानुभविकम् । न च तत्सम्बन्धवत्त्वं च तद्विषयः सम्बन्धसम्बन्धवत्त्वबुद्धिवत्

क्वचित् सम्बन्धवत्त्वबुद्धिर्विशेषदर्शनतयोपयुज्यते न च स्वतो मानाभावात् । अथ सम्बन्धान्तरावच्छिन्नाभाववति सम्बन्धान्तरेण प्रतियोगिनो वृत्तेर्न तदभावविरोधित्वमिति चेत् ? प्रतियोगितावच्छेदकसम्बन्धस्याभाववति सम्बन्धान्तरेण वृत्तेर्न तथात्वम् सम्बन्धविशेषेण च विरोधित्वं तुल्यमेव । अनतिप्रसक्तये च स्वप्रतियोगितावच्छेदकसम्बन्धत्वेनाभावत्वकल्पने क्वानुगमसम्भावनाऽपीति । व्यधिकरणसम्बन्धस्यापि प्रतियोगितावच्छेदकत्वात् तद्वत्यभावविलयप्रसङ्गो भवतां तदभावविलोपप्रसङ्गो वेति ।

(गा०) प्रतियोगितावच्छेदकसंबंध एवात्यंताभावान्योन्याभावसाधारणोऽभावाभाव इति योजना । अन्योन्यात्यंताभावसाधारणः। अन्योन्यात्यंताभावयोः साधारणः । स च संबंधाविधयाऽवच्छेदकः। क्वचित् । भेदप्रतियोगितायाम् । क्वचित् । संसर्गाभावप्रतियोगितायाम् । प्रतियोगिसंबंधवत्ताज्ञानस्याभाववत्ताज्ञानाप्रतिबंधकतया न प्रतियोगिसंबंधस्याभावाभावत्वमिति समाधत्ते । यद्वत्वे हीति । ज्ञात इत्यतं न प्रतीयत इति व्यवह्रियत इत्युभयान्वयि । तथा च यदभावव्याप्यत्वादिनाऽगृहीतयद्धर्मवत्ताज्ञानं यत्प्रतीत्यनुत्पादे यदभाववत्ताव्यवहारे वा प्रयोजकमित्यर्थः । यदधिकरणे कदापि कस्यापि तदभावभ्रमो न जातस्तदभावप्रतीतेः प्रतियोगिमत्ताप्रतीत्यनुत्पादे अप्रयोजकत्वात्तस्यैव तदभावात्मकत्वमिति नियमासम्भवः अतोऽभावव्यवहारस्यापि निवेशः । व्यवहारश्च सामान्यतः सर्वत्र संभवतीति न व्यवहारविषयत्वाभावे नियमभंग इति शंकापि ।

मिथस्तथात्वमिति । परस्परप्रतीत्यनुत्पादप्रयोजकत्वं परस्पराभाववत्ताव्यवहारप्रयोजकत्वं चेत्यर्थः । तथा च न प्रतियोग्यभावयोः परस्पराभावत्वानुपपत्तिरिति भावः । तत्संबंधवत्त्वम् । प्रतियोगिसंबंधवत्त्वम् । तद्विषयः । अभावप्रतीत्यनुत्पादादिप्रयोजकधीविषयः । ननु प्रतियोगिसंबंधप्रकारकसिद्धिसत्त्वेऽपि अभावप्रत्ययानुत्पादस्यानुभाविकतेत्यत आह । क्वचिच्चेति । विशेषदर्शनतया व्यावर्तकधर्मदर्शनतया । न स्वतः । न व्यावर्तकधर्मदर्शनमपुरस्कृत्य । न तस्याभा-

चविरोधित्वम् । किं तु तत्संबन्धस्यैवेति शेषः । तत्संबंध एव तद्भावाभावः विरोधिन एवाभावाभावत्वादिति भावः । प्रतियोगितावच्छेदकसंबंधस्य । घटसंयोगादेः । अभाववति । घटाद्यभाववति कर्मादौ । संबंधान्तरेण । कालिकादिना । न तथात्वम् । न संबंधसामान्येन विरोधित्वम् । तुल्यमेव । प्रतियोगिसाधारणमेव ।

क्वचित्प्रतियोगिनः क्वचित्तदवच्छेदकस्याभावाभावत्वकल्पने कल्पनाभेद इति कल्पनैक्यानुरोधात्संबंधस्याभावाभावत्वमित्युक्तं दूषयति । अनतिप्रसक्तये चेति । अनतिप्रसक्तये । घटसंयोगादेः पटाद्यभावाभावत्ववारणाय । अनुगमसंभावनाऽपि । अनुगमस्यैककल्पनापि । स्वान्तर्भावादिति शेषः । तद्वति । गुणाद्यभावप्रतियोगितावच्छेदकसंयोगादिसम्बन्धवति । अभावविलयप्रसङ्गः । स्वाभावसत्त्वेन तद्भावासत्त्वप्रसङ्गः । प्रतियोगिनिरूपिततादृशसम्बन्ध एवाभावाभाव इति यदुच्यते तदाह । भवतामिति । भवताम् । प्रतियोगिरूपाभावप्रतियोगितया व्यधिकरणसम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वं खण्डयताम् । तदभावेति । व्यधिकरणसम्बन्धावच्छिन्नगुणाद्यभावाभावेत्यर्थः । विलोपप्रसङ्ग इति । प्रतियोगिनिरूपिततादृशसम्बन्धाप्रसिद्धेरिति भावः । तादृशगगनाद्यभावस्याभावाप्रतियोगित्वं स्वमते इष्टमेवेति भवतामित्युक्तम् ।

(चि०) उच्यते—वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्, आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी तथाऽपि न स वृत्तिमान् इत्याकाशात्यन्ताभाव एव केवलान्वयी तथा प्रमेयत्वाभिधेयत्वादि केवलान्वयि वृत्तिमतो ऽत्यन्ताभावस्याप्रतियोगित्वात् ।

(दी०) लक्षणं परिष्कुरुते । वृत्तिमदित्यादि । आकाशस्य तद्भावाभावत्वमित्यभ्युपगममात्रम्, भाववति तदभावासत्त्वप्रतीत्या हि भावस्य स्वाभावाभावत्वं कल्प्यते न चेह तथा, अभावप्रतियोगित्वं स्वरूपसम्बन्ध एवेत्युक्तमधस्तात् । अभावप्रतियोगित्वं

चाप्रयोजकम् । एवं च यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वं यस्य तस्य तेन सम्बन्धेन केवलान्वयित्वमिति सूचयितुं वृत्तिमदिति । अत एव ज्ञानस्य ज्ञानत्वस्य च समवायेन ज्ञानाविषयत्वादेश्च व्यधिकरणसमवायादिना सम्बन्धेनाभावप्रतियोगित्वेऽपि विषयतया परम्परासम्बन्धेन स्वरूपसम्बन्धेन च केवलान्वयित्वम् । संयोगाद्यभावोपसङ्ग्रहाय च प्रतियोग्यसमानाधिकरणत्वेनाभावो विशेष्यः । आकाशाभावोऽपि च यथा प्रतियोग्यसमानाधिकरणस्तथोक्तमधस्तात् । वृत्तिमतस्तादृशाभावाप्रतियोगित्वमिति वाऽर्थः । व्याप्यवृत्तित्वार्थकं वृत्तिमत्पदमभावविशेषणमित्यपि कश्चित् । तादात्म्येनाभिधेयस्य केवलान्वयित्वसम्पत्तये व्याप्तिवदखिलमालोकनीयम् ।

(गा०) पूर्वपक्षिणा लक्ष्याप्रसिद्ध्या लक्षणासम्भवस्योक्तत्वात् लक्ष्यप्रदर्शनमेवोचितं न तु लक्षणाभिधानं लक्षणस्य प्रागेवोक्तत्वादत आह । लक्षणमिति । गगनाभावादिसाध्यकानुमानानां लक्ष्यतानिर्वाहाय लक्षणे विशेषणांतरं प्रक्षिपतीत्यर्थः । आकाशादेः स्वाभावाभावत्वस्य निर्युक्तिकतया आकाशाभावादिसंग्रहायाभावे वृत्तिमत्त्वविशेषणदानमयुक्तमित्यालोच्य तत्र मूलकृतोऽनिर्भरमाह । आकाशस्येति । घटादेरिवाकाशस्यापि स्वाभावाभावत्वमविशेषात्स्यादित्याशङ्क्य तद्विशेषं दर्शयति । भाववतीति । भावो घटादिरूपः प्रतियोगी । तदभावासत्त्वप्रतीत्या । तदभावाभाववत्त्वप्रतीत्या । इह । अवृत्तिस्थले । न तथा । न प्रतियोगिमत्यत्यन्ताभावाभाववत्त्वप्रत्ययः सम्भवतीति शेषः । प्रतियोगिमत एवाप्रसिद्धेरिति भावः । अधिकरणविनिर्मोकेण च नञुल्लेखी प्रत्ययो न सम्भवति अभावादिपदोल्लेखी सम्भवन्नपि प्रकृतेऽसिद्ध इति नाधिकरणानुपरक्तगगनाभावाभावप्रत्ययबलाद्गगनस्य तथात्वमिति शंकावसरः ।

ननु गगनस्य स्वाभावाभावत्वानुपगमे तस्य स्वाभावप्रतियोगित्वानुपपत्तिरित्याशंकायामाह । अभावप्रतियोगित्वं च स्वरूपसम्बन्ध एव न तूक्ताभावाभावत्वम् । अधस्तात् । व्याप्तिवादे ।

ननु प्रतियोगित्वमभावाभावत्वानात्मकमपि तद्व्याप्यतया तत्सा-धयेदेवेत्यत आह । अभावप्रतियोगित्वं चेति । आकाशादेः स्वाभा-वाभावत्वविरहेऽपि प्राचां केवलान्वयिलक्षणे वृत्तिमत्पदोपादानं सम्बन्धविशेषनिवेशसूचकतया सङ्गमयति । एवं चेति । सम्बन्धवि-शेषनिवेशप्रयोजनमाह । अत एवेति । ज्ञानस्य । सर्वगोचरज्ञानस्य । समवायेनेति । सम्बन्धेनाभावप्रतियोगित्वेऽपीत्यग्रिमेणान्वयः । अवच्छेदकत्वघटितलक्षणमनुसृत्याह । ज्ञानविषयत्वादेश्चेति । विष-यतया ज्ञानस्य । परंपरासम्बन्धेन । स्वसमवायिविषयत्वरूपेण ज्ञान-त्वस्य, स्वरूपसम्बन्धेन च ज्ञानविषयत्वादेः । केवलान्वयित्वम् । तेषां केवलान्वयिताघटकतत्तत्सम्बन्धावच्छिन्नाभावाप्रतियोगित्वादिति भावः । प्रतियोगितायां केवलान्वयिताघटकसम्बन्धावच्छिन्नत्वनिवे-शनं च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकर-ण्यस्य निवेशाभिप्रायेण । तत्र प्रकृतसम्बन्धनिवेशने च प्रतियो-गितायां सम्बन्धावच्छिन्नत्वं न निवेश्यम् ।

ननु प्रतियोग्यसामानाधिकरण्यं यदि स्वप्रतियोगिसमाना-धिकरणो यस्तदन्यत्वं तदा संयोगादेरपि केवलान्वयित्वापत्तिः सं-योगाभावस्य द्रव्ये प्रतियोगिसमानाधिकरणतया तदन्यत्वाभा-वात् । नापि तत्तदभावनिष्ठं यत्तत्तदभावप्रतियोगिसामानाधिकरण्यं तदत्यन्ताभाववत्त्वम्, तत्सामानाधिकरण्यस्याव्याप्यवृत्तित्वानुपगमे तद्दोषस्यैव दुर्वारत्वात् । किं तु स्वप्रतियोग्यनधिकरणवृत्तित्वमेव एवं च तद्विशेषणकस्याभावस्यैव स्वपदार्थतया गगनाद्यभावप्रति-योग्यधिकरणाप्रसिद्ध्या न तदभावस्य तत्त्वमिति तथाविधाभावान्त-राप्रतियोगित्वमादाय गगनादेः केवलान्वयित्वापत्तिरत आह । आकाशेति । अधस्तात् । व्याप्तिवादे । केवलान्वयितावच्छेदक-सम्बन्धसामान्ये यदभावप्रतियोगिप्रतियोगिकत्वयत्किञ्चिदधिक-रणानुयोगिकत्वोभयाभावस्तत्त्वम्, यत्किञ्चिदधिकरणवृत्तितान-वच्छेदकावच्छिन्नप्रतियोगिताकत्वरूपप्रतियोगिवैयधिकरण्यं वा वि-वक्षणीयं तच्चाकाशाभावादिसाधारणमिति भावः ।

मूलोक्तविशेषणस्याप्रतियोगिविशेषणतयैव गगनादिवारणे उ-भयाभावघटितप्रतियोगिवैयधिकरण्यप्रवेशो गौरवादयुक्त इत्याशये-नाह । वृत्तिमत इति । वृत्तिमत्त्वं प्रकृतसम्बन्धेन बोध्यं तेन संयो-

गादिना संयोगादेर्न केवलान्वयित्वम्। तादृशाभावेति। प्रतियोग्यनधिकरणवृत्त्यभावेत्यर्थः। यादृशप्रतियोगिताश्रयानाधिकरणं किंचिद् वृत्तिमत्त्वे सति तच्छून्यत्वमिति फलितार्थः। अतो जगत एव किंचिद्देशकालादिवृत्तित्वविशिष्टतदभावात्मकप्रतियोगिमत्तया स्वरूपसम्बन्धस्य केवलान्वयिताघटकत्वस्थले प्रतियोगिवैयधिकरण्याप्रसिद्धिरिति दोषानवकाशः।

प्रकारांतरेण संयोगाद्यभावस्य केवलान्वयित्वमुपपादयत आकाशादिकं च वारयतो वृत्तिमत्पदमपि सार्थकं कुर्वतोऽन्यस्य मतमाह। व्याप्यवृत्तित्वार्थकमिति। अभावविशेषणम्। अभावविशेषणबोधकम्। व्याप्यवृत्तित्वं चेदं यदवच्छिन्नवृत्तिकान्यत्वं तदा संयोगाद्यभावस्यातथात्वात्संयोगादावतिप्रसंगः यद्यनवच्छिन्नवृत्तिकत्वं तदा कालिकसंबंधावच्छिन्नप्रतियोगिताकघटत्वाद्यभावस्य तद्वति कालेऽपि तदनधिकरणदेशाद्यवच्छेदेन वर्तमानतया केवलान्वयिनोऽसंग्रहप्रसंगः। तदभावस्य घटत्वादेः समवायेन व्याप्यवृत्तित्वात्। येन सम्बन्धेनाभाववत्ताज्ञानं यत्प्रतियोगिमत्ताज्ञानविरोधि तेन सम्बन्धेन व्याप्यवृत्त्यभावीयतत्प्रतियोग्यन्यत्वानिवेशे च गौरवमित्यस्वरसः।

ननु तादात्म्यसम्बन्धेन प्रतियोग्यधिकरणतायाः वृत्तिमत्त्वस्य चाप्रसिद्ध्या तेन सम्बन्धेनाभिधेयत्वाद्यवच्छिन्नस्य केवलान्वयित्वानुपपत्तिरत आह। तादात्म्येनेति। अभिधेयस्य अभिधेयत्वावच्छिन्नस्य। व्याप्तिवदिति। यथा व्याप्तिशरीरेऽधिकरणत्वादिस्थले सम्बन्धित्वमात्रं निवेशितं तथाऽत्रापि तन्निवेशनीयमित्यर्थः।

(दी०) ननु प्रमेयत्वं प्रमाविषयत्वं तच्च न केवलान्वयि प्रमाया विषयत्वस्य चाननुगमादिति वाच्यम्। प्रमात्वमेव हि परम्परासम्बन्धाद्धटादौ प्रमेयत्वमनुगतं प्रमाजातीयविषयत्वं वा। तथापि केवलान्वयिनि संशयाभावात् कथमनुमितिः? प्रमेयत्वमत्र वर्तते न वेति संशयश्च न प्रमेयपक्षकः किं तु प्रमेयत्वपक्षको भिन्नविषयकः। प्रमेयत्वपक्षके चास्ति-

त्वसाध्यस्यान्वयव्यतिरेकित्वम् । तथा च घटः प्रमेयो न वेति संशयो श्रूयते स च नास्त्येव ।

(दी०) प्रमाजातीयेति । तथा च तादृशाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमर्थः । इत्थं च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यमेवाभावविशेषणं तेन द्रव्यगुणभेदयोर्द्वित्वादिना न केवलान्वयित्वम् । न चैवं विरुद्धयोर्धर्मयोर्द्वित्वेन केवलान्वयित्वापत्तिः, तदवच्छिन्नाधिकरणाप्रसिद्धया तदवच्छिन्नाभावे प्रतियोग्यसामानाधिकरण्यस्यासम्भवादिति वाच्यम् । तादृशधर्मावच्छिन्नस्य यत्किञ्चिदधिकरणवृत्तिताया विवक्षितत्वात् क्वचिदपि तादृशोभयवत्त्वाप्रतीतेस्तस्यातथात्वात् । सन्दिग्धसाध्यवत्त्वं पक्षत्वमित्याशयेनाशङ्कते । तथाऽपीति । अस्तित्वसाध्यस्य । घटवृत्तित्वसाध्यस्य ।

(गा०) ननु प्रमाजातीयविषयत्वरूपत्वेऽपि प्रमेयत्वस्य केवलान्वयितानुपपत्तिर्दुर्वारैव अनुगतधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽपि तदवच्छिन्नव्यक्तीनां विशेषरूपेणाभावप्रतियोगित्वापत्तेरतोऽनवच्छेदकत्वघटिततया लक्षणं परिष्कार्यमिति मूलाशयं प्रकाशयति । तथा चेति । अनवच्छेदकं यद्रूपं तेन रूपेण केवलान्वयीति विवक्षणीयं तेन घटादेर्न घटत्वादिना केवलान्वयित्वं किं तु मेयत्वादिनैवेति नियमोपपत्तिः। इत्थं च । अप्रतियोगित्वस्थाने प्रतियोगितानवच्छेदकत्वनिवेशने च । अप्रतियोगित्वघटितलक्षणे द्रव्यगुणभेदयोः प्रतियोगिव्यधिकरणद्रव्यभेदत्वावच्छिन्नाभावप्रतियोगित्वेन केवलान्वयित्वापत्तिविरहात् प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यपर्यन्तनिवेशवैयर्थ्यमित्युपष्टंभसंगतिः।

द्वित्वादिना न केवलान्वयित्वमिति । उभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि तदवच्छिन्नासामानाधिकरण्येन लक्षणघटकत्वादिति भावः । अन्यतरत्वेन केवलान्वयित्वस्येष्टत्वाद्द्वित्वादिनेत्युक्तम् । आदिना धर्मान्तरसाधारणत्रित्वादिपरिग्रहः । इदमुपलक्षणम् । गगनाभावादेर्घटाद्वृत्तित्वविशिष्टत्वे-

न न केवलान्वयित्वमित्यपि द्रष्टव्यम् ।

तादृशधर्मावच्छिन्नस्य । प्रतियोगितानवच्छेदकधर्मावच्छिन्नस्य । अधिकरणवृत्तितायाः । अधिकरणसम्बन्धितायाः । विवक्षितत्वादिति । तथा च तादृशाभावप्रतियोगितानवच्छेदकं यत्किंचिदधिकरणनिष्ठकेवलान्वयिताघटकसम्बन्धप्रतियोगितावच्छेदकं तद्रूपवत्त्वं तेन रूपेण केवलान्वयित्वमिति लक्षणं करणीयमिति भावः । तादृशोभयेति । विरुद्धोभयेत्यर्थः । तस्यातथात्वात् । विरुद्धयोरुभयत्वस्य सम्बन्धप्रतियोगितानवच्छेदकत्वात् । सिद्ध्यभावरूपपक्षतामते साध्यसंदेहस्यानपेक्षणात् तथापीत्याक्षेपासंगतेराह । संदिग्धेति । मूले-न प्रमेयपक्षकः । न प्रमेयधर्मिकः । तर्हि किंधर्मिक इत्याशंकायामाह । किंत्विति । भिन्नविषयकः । प्रकृतानुमितिविलक्षणविषयतावान् । तथा चाविलक्षणविषयताशालिसाध्यसंदेहस्यैवानुमितिहेतुतया सोऽनुपयुक्त इत्यभिमानः । प्रमेयत्वसाध्यकानुमानासम्भवेऽपि प्रमेयत्वपक्षकास्तित्वसाध्यकानुमानमेव केवलान्वय्यनुमानं निष्प्रत्यूहमेवेति शंकां निरस्यति । प्रमेयत्वपक्षकेति । अस्तित्वस्य पदार्थसाधर्म्यरूपस्य केवलान्वयितया तत्साध्यकानुमानस्यान्वयव्यतिरेकित्वाभिधानं न घटत इत्यत आह दीधितावस्तित्वेति । घटास्तित्वम् । घटवृत्तित्वम् । केवलान्वयिनोऽस्तित्वस्य यत्र साध्यता तत्र संशयानुपपत्त्याऽनुमित्यनिर्वाहतादवस्थ्यादिति भावः ।

(चि०) अथ पक्षः साध्यवान्न वा पक्षे साध्यमस्ति न वेति संशयौ समानविषयकावेव तदस्यास्त्यस्मिन्निति मतुपो विधानादिति चेन्न । विशेषणविशेष्यभावभेदेनार्थभेदात् । मैवम् । य एव हि संशयः पक्षे साध्यसिद्धिविरोधी स एवानुमानाङ्गमावश्यकत्वात् लाघवाच्च, न तु समानविषयकत्वमपि तत्र तन्त्रं गौरवात् । प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्यसिद्धिविरोधी भवत्येव । यद्वा संशययोग्यतैवानुमानांगं सं-

शयस्य तदानीं विनाशात् । न च साऽपि साधकबाधकप्रमाणाभावः, प्रमेयत्वाभावासिद्धौ तत्प्रमाणासिद्धेस्तदभावासिद्धिरिति वाच्यम् । पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव योग्यतात्वात् । प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः संशय इत्यन्ये । नन्वेकरूपविकलमिदं कथं गमकं तत्त्वे वा व्यतिरेकविकलवद्रूपान्तराविकलमपि गमकं स्यादिति चेन्न । अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानुमित्यनुभवात् । युगपदुभयव्याप्त्युपस्थितौ विनिगमनाभावेनोभयोरपि प्रयोजकत्वे व्यतिरेकोपासना । व्यतिरेकश्च विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते, अत्र तु विपक्षाभावेन शङ्कैव नोदेति ।

इति केवलान्वयिचिन्तामणिः ।

(दि०)साध्यसिद्धिविरोधी । साध्यसिद्धिनिवर्त्यः । विशेषणविशेष्यभावभेदेऽपि विरोधिविषयतामात्रेण प्रतिबन्धकत्वमनुभवबलादास्थीयते, न हीदं साध्यवदत्र वा साध्यमित्येकतरनिश्चयेऽत्र साध्यं न वेदं साध्यवन्न वेति अन्यतरः सन्देह इति । पक्षनिष्ठेत्यादि । पक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिज्ञानस्य साध्यसाधकत्वेन । कथंचित् साध्यसिद्ध्यनुगुणत्वेन पक्षनिष्ठाभावप्रतियोगित्वज्ञानाभावस्य वा साध्यस्य साधकत्वेन । तदभावस्य । तस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वावगाहिज्ञानत्वेन साध्यविशिष्टपक्षज्ञानविरोधित्वेन वा रूपेणाभावस्य योग्यतात्वात् । व्यतिरेकः । वि-

पक्षे हेतोरभावः । व्यतिरेकव्याप्तौ । साध्याभावहेत्वभावयोर्यौ व्यतिरेकौ साध्यहेतू तयोर्व्याप्तौ ।

(गा०) विषयावैलक्षण्ये विषयत्वावैलक्षण्यमित्याशयेनाशंकते । मूलेऽथेति । समानविषयकावेवेति । तथा चैकस्यानुमित्यविलक्षणविषयताकत्वेऽन्यस्यापि तथात्वमावश्यकमिति प्रमेयत्वधर्मिकसंशयादपि तत्साध्यकानुमितिर्निष्प्रत्यूहैवेति भावः । अर्थभेदात् । विषयतावैलक्षण्यात् । ग्राह्यसंदेहस्याप्रतिबंधकतया विरोधिपदं प्रतिबध्यपरतया व्याचष्टे दीधितौ । साध्यसिद्धीति । साध्यं पक्षनिष्ठाभावप्रतियोगि न वेत्यसमानविशेष्यकः संशयः कथं साध्यवत्तानिश्चयप्रतिबध्य इति शङ्कायामाह । विशेष्येति । विरोधिविषयतामात्रेणेति । ग्राह्यविरोधिधर्मे प्रकृतधर्मिसम्बन्धविषयतामात्रपुरस्कारेणानुभवं द्रढयति । न हीति । तदभावस्येत्यत्र तत्पदेन पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य परामर्शार्थमप्रतियोगित्वज्ञानान्तं प्रतियोगित्वज्ञानान्तर्भावेण व्याचष्टे । पक्षेति । तज्ज्ञानप्रतिबन्धकत्वरूपं तद्विरोधित्वमेवात्राप्रतियोगित्वमित्यत्र नञर्थ इति भावः । अथ वा प्रतियोगित्वपदमेव प्रतियोगित्वज्ञानपरं प्रतिबन्धकत्वमेव नञर्थ इत्याशयः । अतस्तत्पदस्य नञर्थविरोधिप्रविष्टज्ञानपरामर्शकत्वासम्भवेऽपि न दोषः ।

अबाधितत्वज्ञानस्यानुमित्यहेतुतया साधकपदस्य सिद्धिकारणपरता न सम्भवतीत्यतस्तद्व्याचष्टे । साध्येति । कथंचित् । तादृशविरोधिनिश्चयाभावसंपादनेन । साधकपदस्य सिद्धिकारणपरत्वमुपपादयितुमन्यथा व्याचष्टे । पक्षनिष्ठेत्यादि । तत्पदस्य विशेष्यीभूताभावपरतया कर्मधारयोपगमेऽभावपदवैयर्थ्यमतः षष्ठीतत्पुरुषाभिप्रायेण व्याचष्टे । तदभावस्येति ।

केचित्तु तस्येत्यग्रिमेऽभावस्येत्यत्र सामानाधिकरण्येनान्वयि । तथा च स्वकल्पाभिप्रायेण कर्मधारय एवावलम्बनीयस्तच्छब्दस्य विशेषणपरामर्शकताया अपि बहुशो दर्शनात्तच्छङ्कानिरासायाभावपदमित्याहुः ।

अभावप्रतियोगित्वप्रकारकज्ञानत्वेन तज्ज्ञानाभावस्य पक्षताघटकत्वे साध्याभाववान्पक्ष इति निश्चयदशायां पक्षताव्यवहारप्रसङ्ग

इत्यतस्तत्साधारणप्रतियोगितावच्छेदकं दर्शयति । साध्येति । साध्य-विषयतानिरूपितताद्दशप्रतियोगित्वविषयताशालिनिश्चयत्वेनेत्यर्थः।

प्रतियोगित्वानुयोगित्वयोस्तुल्यवित्तिवेद्यत्वानुपगमे साध्या-भाववान्पक्ष इति ज्ञानस्य न साध्यांशे प्रतियोगितावगाहित्वं किं त्वभावांश एव तदनुयोगितावगाहित्वमतो नोक्तरूपेण तत्सङ्ग्रहः। एवं साध्यांशे कालिकादिसम्बन्धेन प्रतियोगित्वप्रकारकधीवार-णाय साध्यांशे प्रतियोगित्वप्रकारकधियः सम्बन्धविशेषावगाहित्वे-नैव निवेशनीयतया प्रतियोगितासंसर्गकबुद्धौ च तदीयसंसर्गा-भानादपि न तयोरुक्तरूपेणानुगमसम्भवः । एवमभावसाध्यके प्र-तियोगिमत्त्वावगाहिबाधबुद्धेरसङ्ग्रहश्चेत्यतः प्रकृतपक्षधर्मिकप्रकृत-साध्यविशिष्टबुद्धिप्रतिबन्धकत्वेन तदुभयमनुगमयति । साध्यविशि-ष्टेति । तत्प्रतिबन्धकतावच्छेदकं चागत्याऽननुगतमेव वाच्य-मिति ध्येयम् ।

सपक्षसत्त्वादिरूपगमकतौपयिकगणने व्यतिरेकपदेन विपक्षा-सत्त्वस्यागणनाद्व्यतिरेकाविकलवदित्यत्र व्यतिरेकोपासनेत्यत्र व्य-तिरेकश्चेत्यत्र च व्यतिरेकपदस्य तद्रूपार्थकतां स्फुटयति । व्यतिरेक इति । व्यतिरेकव्याप्तेरनुमितिप्रयोजकतां व्यवस्थाप्य व्यतिरेकस्य सहचारविधया ताद्दशव्याप्तिग्राहकत्वेनानुमित्युपयोगित्वं व्यतिरेको-पासनेत्यनेनाभिहितमतः पुनर्विपक्षवृत्तित्वशंकानिरासमात्रद्वारा व्यतिरेकव्याप्तिग्रहोपयोगिताभिधानं विरुध्यते व्यतिरेकव्याप्तेर्वि-शिष्योपादानेनैवान्वयव्याप्तिग्रहे तदनपेक्षालाभात् केवलान्वयिन्यु-क्तशंकानुदयेन तदनपेक्षाभिधानमप्यसंगतमतो व्यतिरेकव्याप्ताविति मूलस्यान्वयव्याप्त्यर्थकतामाह । व्यतिरेकेति ।

(दी०) अत्र वदन्ति—साध्याभाववदवृत्तित्वमेव व्याप्ति-र्लाघवात् प्रायशः साधनभेदेऽप्यभेदाच्च । यत्सम्बन्धावच्छिन्न-साध्याभाववति हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन साध्यसिद्धिः फलम् । साध्याभाववति येन सम्बन्धेन हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन पक्षधर्मताधीः कारणमिति नातिप्रसङ्गः । आकाशादेस्त-थात्वेऽपि पक्षधर्मताज्ञानविरहान्नानुमितिः । निर्विशतां वा तत्र सा-

ध्यसामानाधिकरण्यं वृत्तिमत्त्वं वा । अथ साध्याभाववदवृत्ति-
त्वं तद्वृत्तिभिन्नत्वादिरूपं व्यभिचारज्ञानविरोधिज्ञानविषयत्वेना-
नुगमनीयं तच्च व्यापकसामानाधिकरण्यसाधारणमिति चेत् ? स्या-
देवं यदि व्यापकताज्ञानं व्यभिचारबुद्धिं विरुन्ध्यात् । न चैवम्,
वह्न्यभाववद्वृत्तिर्धूम इति ज्ञाने हि वह्नित्वं स्वरूपेण प्रतियोगित्वं
तदवच्छेदकत्वं च सम्बन्धमर्यादया भासते । धूमसमानाधिकर-
णात्यन्ताभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यत्र च वह्नित्व-
त्वेन वह्नित्वे प्रतियोगितात्वविशिष्टतदवच्छेदकत्वत्वाविशिष्टाभाव
इति विषयविरोधविरहात् । विशिष्टस्य वह्नित्वस्यावच्छेदकत्वेन
प्रकारान्तरानुसरणे च सुतराम् । मणिमन्त्रादिन्यायेन च प्रतिबन्ध-
कतायां मानाभावात् ।

(गा०)केवलान्वय्यनुमानं स्वातंत्र्येण खंडयितुमुपक्रमते । अत्र वदं-
तीति । व्याप्तिः । अनुमित्यौपयिकीत्यर्थः । एवकारेण केवलान्वयिसा-
ध्यकसाधारणव्यापकसामानाधिकरण्यस्यानुमित्यौपयिकत्वव्यवच्छे-
दः । लाघवादिति । व्यापकसामानाधिकरण्यापेक्षया लघुशरीरत्वा-
दित्यर्थः । व्यापकतागर्भव्याप्तौ वह्नित्वादिरूपसाध्यतावच्छेदकाविशे-
षणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाभावस्य हेतुविशेषणसा-
ध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वाभावतुल्यशरीर-
त्वेऽपि अनवच्छेदकत्वधर्मितावच्छेदकवह्नित्वत्वादेः साध्यसामाना-
धिकरण्यस्य चाधिकस्य निवेशेन गौरवं बोध्यम् । एवं च तादृश-
व्याप्तिविशिष्टहेतुमत्ताज्ञानहेतुतामतेऽधिकविषयविषयतानां द्विधा
हेतुविषयतायाश्च निवेशात्कारणतावच्छेदकगौरवान्न विनिगमना-
विरहेणोभयव्याप्त्योरनुमितिप्रयोजकतेति भावः

एतन्मतेऽवच्छेदकलाघवमुक्त्वा कल्पनालाघवमाह । प्रायश
इति । साधनभेदेऽपीति । साधनतावच्छेदकभेदादिति भावः । तथा च
धूमत्वालोकत्वावच्छिन्नालिंगकबहुविधपरामर्शानां वह्न्यभाववदवृ-
त्तित्वावच्छिन्नप्रकारकपक्षनिश्चयत्वेन एकमेव हेतुत्वं कल्प्यते व्या-
पकसामानाधिकरण्यरूपव्याप्तेर्हेतुतावच्छेदकविशेषघटिततया तद-

वच्छिन्नप्रकारकज्ञानहेतुतायाश्च हेतुतावच्छेदकधूमत्वादिभेदेन भेद इति गौरवम् ।

न च व्यापकताया हेतुतावच्छेदकधूमत्वाद्यवच्छिन्नघटितत्वेऽपि व्यापकताघटकपदार्थानां विषयताकूटे निवेश्यमाने हेतुतावच्छेदकावच्छिन्नविषयतायाः सामान्यतः किंचिद्धर्मावच्छिन्नविषयतात्वेनैव कारणतावच्छेदककोटौ निवेशनीयतया व्यापकताज्ञानहेतुतामतेऽपि न धूमत्वालोकत्वादिभेदेन तद्भेद इति वाच्यम् । धूमव्यापकवह्निसमानाधिकरणद्रव्यवानित्यादिज्ञानवारणाय तद्धर्मावच्छिन्नव्यापकसामानाधिकरण्येन तद्धर्मेण चावच्छिन्ना या प्रकारता तद्रूपेण हेतुतायाः कल्प्यतया ऽनुगमासम्भवात् ।

स्वावच्छिन्नव्यापकसाध्यसामानाधिकरण्यावच्छिन्नत्वस्वावच्छिन्नत्वोभयसम्बन्धेन सामान्यतो धर्मविशिष्टत्वेन निविष्टपरामर्शप्रकारतानामनुगमः संभवतीति तु न सम्यक् । तादृशपरंपरायाः सम्बन्धत्वे मानाभावात् जातिविशेषत्वादिना धूमत्वावगाहिनो जातिविशेषवद्व्यापकवह्निसमानाधिकरणधूमवानित्यादिज्ञानादनुमित्यापत्तिश्चेति भावः ।

वह्न्यभाववति धूमादेः समवायादिना वृत्तेः साध्याभाववदवृत्तित्वरूपव्याप्तावपि हेतुतावच्छेदकीभूतसंयोगादिना ऽवृत्तित्वस्य प्रवेशनीयतया एकसम्बन्धेन साध्याभाववदवृत्तित्वमपरसम्बन्धेन पक्षधर्मत्वमवगाहमानज्ञानादनुमित्यापत्तेर्वारणाय विशिष्य सम्बन्धौ निवेश्य एकसम्बन्धघटितव्याप्तिपक्षधर्मताविषयकज्ञानस्य हेतुतायाः कल्पनीयतया विभिन्नसम्बन्धेन व्याप्येषु धूमरूपविशेषादिषु व्याप्तेर्भेदस्तद्विषयकपरामर्शकारणताभेदश्चावश्यक इति प्रायश इत्युक्तम् ।

अथ हेतुतावच्छेदकमनिवेश्य व्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे व्यभिचारज्ञानकालेऽपि निर्धर्मितावच्छेदकव्याप्तिज्ञानोत्पत्त्याऽनुमित्युत्पत्तेरावश्यकतया व्यभिचारस्य हेतुदोषतानुपपत्तिरिति चेन्न । किंचिद्धर्मावच्छिन्नहेतुप्रकारक (१)निश्चयत्वेन हेतुत्वात् । वस्तुतः पक्षवृत्तित्वेन निश्चीयमानधूमत्वाद्यवच्छेदेनाव्यभिचारानिश्चयं विना

(१) किञ्चिद्धर्मावच्छिन्नधर्मिताक-इति पु० पा० ।

पक्षवृत्तित्वावच्छेदेन व्यभिचारसंशयस्यानिवृत्तेः पक्षेऽप्यव्यभिचारिसामान्याभावकोटिकसंशयस्यौचित्यावर्जितस्य सम्भवेनाव्यभिचारांशे निर्धर्मितावच्छेदककस्यापि पक्षेऽव्यभिचारिनिश्चयस्यासम्भवेन धूमत्वादिविशिष्टे व्यभिचारग्रहस्यानुमित्युत्पत्तिविरोधित्वात्

अथ धूमालोकादिपरामर्शानामेकरूपेण हेतुत्वे धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावरूपपक्षता धूमलिंगकपरामर्शस्यैव सहकारिणी नालोकलिंगकपरामर्शस्येति नियमानुपपत्तिः । तथा च सिद्धिकाले धूमलिंगकानुमितीच्छासत्त्वे धूमपरामर्शसत्त्वे च यद्यत्कारणतावच्छेदकावच्छिन्नस्तोमात्मिका सामग्री फलं जनयति तस्यास्तदानीमसति धूमपरामर्शे सति चालोकपरामर्शेऽप्यावश्यकतया ऽनुमितेर्दुर्वारत्वादिति चेन्न । एतन्मते हि पक्षता लिंगविशेषनियंत्रिता नोपेयते अपि तु तत्तल्लिंगकपरामर्शविशिष्टतत्तल्लिंगकानुमितीच्छाविरहकूटविशिष्टसिद्ध्यभावरूपा एकैव पक्षता नानालिंगकपरामर्शसहकारिणी तत्र च नातिप्रसङ्गशंकापि । न चैवमेकत्रानंतानां परामर्शविशिष्टेच्छाभावानां निवेशे तेषां मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण बहुतरकारणताधिक्यप्रसङ्ग इति वाच्यम् । सिद्धिकाले विनाऽपि धूमलिंगकेच्छामालोकलिंगकेच्छाबलाद् धूमालोकोभयलिंगकसमूहालंबनपरामर्शाद् धूमलिंगकानुमित्युत्पत्त्या व्यभिचारेण तत्तल्लिंगकानुमितौ तत्तल्लिंगकानुमितीच्छाविरहविशिष्टसिद्ध्यभावत्वेन हेतुत्वासम्भवादुक्तरीतेः सर्वैरेवादरणीयत्वात् ।

तत्तल्लिङ्गकपरामर्शविशिष्टतत्तल्लिङ्गकानुमितीच्छानां स्वीयव्याप्तिपक्षधर्मत्वविषयतानिरूपितविषयतावच्छेदकधर्मावच्छिन्नलिङ्गकत्वप्रकारकत्वसम्बन्धेन परामर्शविशिष्टानुमितीच्छात्वेनानुगमय्यैक एवाभावः सिद्धौ विशेषणतया निवेश्य इत्यप्याहुः ।

वस्तुतस्तु यत्पक्षकयत्साध्यकस्थले सिद्धिकाले कदाऽप्यनुमितिर्न जाता तत्रेच्छाविरहाविशेषितसिद्ध्यभावस्यैव पक्षतात्वम् । यत्र वा सिद्धिकाले एकलिङ्गकपरामर्शमात्रसत्त्वेऽन्यलिङ्गकानुमित्सासाधारणरूपेणैवेच्छा जाता तत्र तत्त्वेनैवेच्छाया उत्तेजकत्वसम्भवाल्लिङ्गभेदेन न पक्षताभेद इति तत्रैव परामर्शस्य साधनभेदेन कारणत्वाभेद इत्यभिप्रायेण प्रायश इत्याद्यभिहितम् । अत एव लिङ्गविशेषणा-

पीत्यादिपूर्वग्रन्थाविरोधः । (१)

ननु धूमालोकादिपरामर्शानामेकरूपेण हेतुत्वे तदवच्छेदकनिश्चयत्वशरीरे धूमत्वालोकत्वाद्यवच्छिन्नकोटिकसकलसंशयानामनुगतेनाननुगतेनैव वा भेदस्य एकत्र निवेशनीयतया वह्निव्याप्यधूमवानयं वह्निव्याप्यालोकवांश्च वेत्यांशिकसंशयादनुमित्यनुदयापत्तिः । न च संशयत्वघटकव्याप्यविषयताभिन्नत्वमनुमितिजनकतावच्छेदकव्याप्यविषयतायां निवेशनीयमित्युक्तज्ञानीयधूमादिविषयतायाः संशयत्वाघटकतया तत्संग्रह इति वाच्यम् । प्रत्येककोटिनिश्चयीयविषयतातिरिक्तविषयतायाः संशयेऽप्रामाणिकतया निश्चयीयव्याप्तिविषयताया एव विपरीतकोटिविषयतासहितायाः संशयत्वघटकत्वात् । स्वनिष्ठसंशयत्वघटकीभूतविषयतान्यव्याप्यविषयताशून्यं यद्यत्तदन्यव्याप्यवत्त्वज्ञानत्वेन हेतुत्वोपगमे तत्तत्संशयव्यक्तीनां प्रातिस्विकरूपेण भेदकूटपर्यवसानात्तावतां भेदानां विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताया बाहुल्यप्रसङ्गादिति चेन्न । व्याप्यत्वावच्छिन्नाभावकोटिकसंशयभेद एव निवेशनीयो न तु धूमत्वालोकत्वाद्यवच्छिन्नाभावकोटिकसंशयानां तत्तद्रूपेण भेदकूटं धूमत्वाद्यवच्छिन्नाभावकोटिकव्याप्यान्तरनिश्चयानात्मकव्याप्यवत्तासंशये उपस्थितव्याप्यत्वावच्छिन्नाभावविषयकत्वमपि कल्प्यते तादृशाभावभानविरोधिनो व्याप्यवत्तानिश्चयस्य व्याप्यव्याप्यवत्तानिश्चयस्य वा प्राक् सत्त्वे तदुत्तरं जायमानो धूमत्वाद्यवच्छिन्नाभावकोटिकोऽपि संशयो व्याप्यत्वपर्याप्तप्रकारतावच्छेदकताकनिश्चयरूप एवेति तादृशानिश्चयसामग्र्यास्तत्राक्षतत्वादिति ततो जायत एवानुमितिरिति न कश्चिद्दोष इति ।

केचित्तु विरोधानुपस्थितिकालीनभावाभावसंशयस्य, तदुभयसमुच्चयवैलक्षण्यनिर्वाहो न विरोधिविषयकतया सम्भवति अनुपस्थितविरोधस्य प्रकारत्वासम्भवात् तत्संसर्गतायाश्चाप्रामाणिकत्वात् । एतदनुरोधेन तदुपगमे संशये कोटिविषयताया एव विलक्षणाया उपगंतुमुचितत्वात् । तथा च संशयत्वघटकविलक्षणकोटिविषयताभिन्नत्वमेवानुमितिजनकतावच्छेदकव्याप्यविषयतायां

---

(१) वस्तुतस्त्वित्यादिः पाठः पुस्तकान्तरे न दृश्यते ।

निवेशनीयम् । वैलक्षण्यं च तस्याः पदार्थान्तररूपं कल्पनान्तर्गतं वेत्यन्यदेतत् । न च विरोधानुपस्थितिदशायां न भावाभावयोः संशयोऽपि तु तदुभयसमुच्चय एवेति विरोधस्य निखिलसंशये प्रकारतयैव भानमिति वाच्यम् । भावाभावयोरविरोधज्ञानमन्तरेण तदुभयसमुच्चयस्यानुभवविरुद्धत्वात् । न च तदानीं संशयसमुच्चयौ द्वावेव नाभ्युपगन्तव्याविति वाच्यम् । प्रत्येकं स्वकार्यजनने बाधकाभावात् तुल्यबलसामग्र्योः परस्परफलाप्रतिबन्धकत्वात् । अन्यथा संशयोच्छेदात् इत्याहुः ।

अन्ये तु संशये भावाभावोभयप्रकारतानिरूपिता एका विशेष्यता समुच्चये तु प्रकारताभेदेन तद्भेद इत्युभयोर्वैलक्षण्यमेवं चाभावत्वावच्छिन्नप्रकारत्वानिरूपितव्याप्यप्रकारतानिरूपितविशेष्यताकत्वमेव सर्वसाधारणव्याप्यवत्तानिश्चयत्वम् । भावद्वयकोटिकः संशयो न प्रामाणिकः धूमवान् जलत्ववान्वा ऽयमित्यत्राभावद्वयस्यापि भानोपगमात् अभावभासकसामग्र्यसत्त्वे विरोधाग्रहे समुच्चयस्यैवोपगमात् । विरोधग्रहदशायां तस्यैव विरोधिप्रकारकनिश्चयसामग्रीसहितस्य तत्प्रकारकालौकिकविषयताशालिज्ञानप्रतिबन्धकतयोभयप्रकारकज्ञानस्यैवासम्भवात् । निश्चयसामग्री च तदभावप्रकारकज्ञानसामग्र्यसमवहिततत्प्रकारकज्ञानसामग्री न तु निश्चयत्वावच्छिन्नसामग्री निश्चयत्वस्य जन्यतानवच्छेदकत्वात्तदसिद्धेः पीतत्वशङ्खत्वयोर्विरोधित्वेन ज्ञायमानयोर्दोषविशेषलौकिकसामग्रीवशादेकधर्मिण्येकनिश्चयाविषयतयाऽभावद्वयकोटिकज्ञाने संशयत्वासम्भवात् । असति दोषविशेषे लौकिकसन्निकर्षादौ च उपनयवशात् एकधर्मिणि तादृशयोर्निश्चयासम्भवेन च तादृशप्रतिबध्यप्रतिबन्धकभावस्य प्रामाणिकत्वादिति वदन्ति । तदसत् । अभावत्वघटितधर्मावच्छिन्नहेतुमत्तापरामर्शस्य व्याप्यप्रकारतानिरूपितविशेष्यतायामभावत्वावच्छिन्नप्रकारतानिरूपितत्वसत्त्वेन तादृशपरामर्शस्य निश्चयत्वानुपपत्तेः । न च व्याप्यत्वावच्छिन्नप्रकारताभिन्नप्रकारतात्वेन विरोधिप्रकारतानिवेशान्नायं दोष इति वाच्यम् । यत्र विरोधिकोटेरपि साध्यव्याप्यतया भानं तादृशसंशयस्य दुर्वारत्वात् ।

एवं शुद्धपर्वतत्वावच्छेदेनाभावप्रकारकस्य नीलपर्वतत्वादिवि-

शिष्टे व्याप्यवत्तावगाहिनस्संशयस्य न्यूनाधिकधर्मावच्छिन्नयोर्भावा-भावोभयप्रकारतानिरूपितविशेष्यतयोरैक्यासम्भवात्। नीलरू-पवत्त्वावच्छेदेन वह्निव्याप्यवत्तानिश्चयदशायामपि तादृशसंशयो-त्पत्त्या तत्र नीलपर्वतत्वावच्छिन्नविशेष्यताया वह्निव्याप्याभावप्र-कारतानिरूपितत्वाभ्युपगमासम्भवात्। न च तादृशसंशय एवा-सिद्धः। एकधर्मपर्याप्तकोटिद्वयधर्मितावच्छेदकताकबुद्धेरेव संशय-त्वादिति वाच्यम्। यदंशभानप्रयुक्तं संशयत्वं तद्भानेऽधिकस्य एकतरकोटिधर्मितावच्छेदककोटौ भानेऽप्यधिकं त्विति न्यायेन संशयत्वस्यावश्यकतया तुल्यबलसामग्रीभ्यां तादृशज्ञानजनने बाधकविरहेण तथाविधज्ञानमेव न जायत इत्युक्त्यसम्भवात्।

संशये कोटिद्वयप्रकारतानिरूपितविशेष्यतयोरवच्छेद्यावच्छे-दकभावः समुच्चये तु न तथा एवं चाभावप्रकारतानिरूपितविशेष्य-तानवच्छिन्नतत्प्रकारकविशेष्यताकत्वं निश्चयत्वमित्यपि न युक्तम्। अविरुद्धतया ज्ञायमानद्वंद्वोपस्थितभावाभावोभयविशिष्टधर्मिविष-यकज्ञाने विशृंखलधर्मिविषयताद्वयोपगमे ज्ञानस्य समूहालंबनतया एकवाक्यताविरहेण समासानुपपत्त्या धर्मिविषताद्वयस्यावच्छेद्याव-च्छेदकभावध्रौव्येण तादृशज्ञानस्य निश्चयत्वानुपपत्तेरिति दिक्।

भावद्वयमात्रकोटिकोऽपि संशयोऽभावभानसामग्र्यसत्त्वेऽनुभव-सिद्धः. समानबलसामग्रीसंवलनासिद्धेश्च उक्तसामग्रीप्रतिबन्धकताया अप्रामाणिकत्वात्। संशयत्वे च कोट्यंशे लौकिकविषयताविरहस्य प्रयोजकतया कथितदोषविशेषजनितनिश्चये तदभावानिर्वाहात्। लौकिकविषयता च साक्षात्त्वजातिव्यंजकविषयता सा च दोषविशे-षजन्यज्ञानेऽप्यस्ति, शङ्खः पीत इत्यादिभ्रमानन्तरं पीतिमानं साक्षा-त्करोमीत्यनुव्यवसायोदयात्। एवं चाभावप्रकारत्वानिरूपितत्वादि-ना व्याप्यप्रकारकविषयताया निश्चयत्वघटकत्वेऽतिप्रसंगो दुर्वार एवेत्यपि वदन्ति।

इदं तु बोध्यम्। संशयसमुच्चययोर्वैलक्षण्याय संशये कोटिद्वय-प्रकारितयोरवच्छेद्यावच्छेदकभावः स्वीक्रियते एवं च किञ्चित्प्रकार-कत्वानवच्छिन्नव्याप्यप्रकारकज्ञानत्वमेव व्याप्यवत्तानिश्चयत्वं धूमा-लोकादिपरामर्शसाधारणमनुमितिजनकतावच्छेदकम् तत्र च न का-चिदनुपपत्तिः। अभेदेऽवच्छेद्यावच्छेदकभावविरहान्न तत्प्रकारक-

त्वस्य तत्प्रकारित्वावच्छिन्नत्वशंकाऽपि । संशयत्वं वा मानसत्व-व्याप्यजातिरव्याप्यवृत्तिः सर्वत्र संशयस्य मानसतया एवोपगमात् । चक्षुःसन्निकर्षादिमद्धर्मिकसंशयदशायां पर्वतं पश्यामीत्यनुव्यवसायश्च संशयस्य पूर्वं परतो वा जायमानतद्विषयकचाक्षुषादिज्ञानस्य कल्पने तद्विषयकतयैवोपपादनीयः । संशयत्वस्य चावच्छेदकं तत्तद्धर्मिविषयकत्वावच्छिन्नतत्कोटिविषयकत्वमेव । एवं च पक्षविशेष्यकत्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारकत्वावच्छेदेन(१)-संशयत्वाभाववत्त्वमेव पक्षे व्याप्यवत्तानिश्चयत्वं वाच्यम् । वह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्यालोकवान्न वा पर्वतो वह्निव्याप्यधूमवान् भूतलं वह्निव्याप्यधूमवन्न वेत्यादिसंशये च पर्वतविशेष्यकत्वावच्छिन्नधूमप्रकारकत्वावच्छेदेन संशयत्वाभावोऽनुभवसिद्ध एव, पर्वते धूमं न सन्देह्मीति प्रतीतिस्तत्र सर्वानुभवसिद्धत्वादिति नानुपपत्तिः । चाक्षुषादिज्ञानस्यापि संशये सङ्करभयेन नानैव संशयत्वानि स्वीक्रियंते तदभावकूटवत्त्वमेव निश्चयत्वघटकमनंतहेतुतावच्छेदकभेदेनानंतकारणत्वकल्पनापेक्षया कतिपयसंशयत्वजात्यभावघटितनिश्चयत्वेन सर्वसाधारणकारणताकल्पने लाघवात् । जातेरव्याप्यवृत्तिता च मिश्रादिभिरपि स्वीकृतेति नापसिद्धांतभीतिः ।

भवतु वा संशयत्वजातिर्व्याप्यवृत्तिरेव तद्विशिष्टनिरूपितत्वं संशये कोटिविषयताया एवोपेयते । भवतु वा संशयनिश्चययोर्विषयताभेदः तं विना संशयसमुच्चययोर्वैलक्षण्यानुपपत्तेरुक्तत्वात् । एवं च संशयत्वविशिष्टानिरूपितत्वस्य पक्षविषयतानिरूपितव्याप्यविषयतायां निवेशात्सर्वसामंजस्यमित्यादिकमालोचनीयम् ।

धूमत्वालोकत्वाद्यवच्छिन्नाभावघटितभ्रमत्वज्ञानाभावादीनां पृथक् पृथक् परामर्शविशेषणतायाः सहकारितया वा अनुरोधात् साधनतावच्छेदकभेदेन परामर्शकारणताभेद आवश्यक इति केचिद्दीधितिकारानाक्षिपन्ति । तत्र विषयतासम्बन्धेन तत्तदप्रामाण्यग्रहाविशिष्टधूमादिप्रकारताभेदकूटविशिष्टत्वेन व्याप्यविषयतानां कारणतावच्छेदकत्वम् । आलोकादिविषयताया धूमाभावादिघटि-

(१) पक्षविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वावच्छेदेन—इति क्वचित्पाठः ।

तभ्रमत्वग्रहे स्वातन्त्र्येण भानेऽपि तादृशभ्रमत्वग्रहविशिष्टधूमादिविषयताभेदसत्त्वात्तदानीमालोकादिपरामर्शादनुमितिः । अप्रामाण्यग्रहासत्त्वे च कालान्तरीणतद्ग्रहविषये तद्विशिष्टभेदोपगमाज्ञानुपपत्तिः ।

वस्तुतस्तु कारणतावच्छेदकव्याप्यप्रकारतायां किञ्चिद्धर्मविशिष्टविषयताविशिष्टान्यत्वं निवेशनीयम् । विषयतायां धर्मवैशिष्ट्यं च स्वावच्छिन्नत्वप्रकारतानिरूपितत्वस्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितत्वोभयसम्बन्धेन । विषयतावैशिष्ट्यं च स्वनिरूपकज्ञानसमानाधिकरणज्ञाननिरूपितत्व-स्वनिरूपकज्ञानविशेष्यीभूतज्ञाननिरूपितत्व-स्वाश्रयप्रकारतावच्छेदकावच्छिन्नत्वैतत्त्रितयसम्बन्धेन वाच्यम् । तादृशी च विषयता धूमाद्यप्रामाण्यज्ञानीयधूमादिप्रकारतानिष्ठेति ज्ञानभेदेन विषयताभेदमते न कश्चिद्दोष इति केचित्समादधति ।

परे तु जनकतावच्छेदकप्रकारतायां यद्धर्मावच्छिन्नत्वं फलोत्पादाप्रयोजकं तदवच्छिन्नाभावघटितभ्रमत्वज्ञानमकिञ्चित्करम्, एवं च हेतुतावच्छेदकानवगाहिज्ञानहेतुतावादिनां व्याप्यप्रकारतायामवच्छेदकतया धूमत्वाद्यभानेऽपि व्याप्यवानयमिति ज्ञानादनुमित्युत्पत्त्या वह्निव्याप्यधूमवानयमित्यादिज्ञानाद् धूमाभाववति धूमप्रकारकमिदं ज्ञानमित्यप्रामाण्यग्रहदशायां वह्निव्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वाग्रहे जायत एवानुमितिः, यत्र नानुमितिस्तत्र तादृशभ्रमत्वग्रह एव कल्प्यते व्याप्यधर्मान्तरानिश्चयस्थले व्याप्यधूमादिनिश्चयेऽप्रामाण्यग्रहसत्त्वे व्याप्यत्वावच्छिन्नाभावस्य धर्मिणि संशयसंभवेन तद्धर्मिविशेष्यकज्ञाने तादृशाभावघटितभ्रमत्वसंशयस्यौचित्यावर्जिततया प्रायशः संभवात् । एवं च व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वज्ञानाभाव इति परामर्शस्य विशेषणं सहकारी वा न तूदासीनधूमत्वाद्यवच्छिन्नाभावघटितभ्रमत्वज्ञानाभाव इति न किञ्चिदनुपपन्नम् । यत्साध्यपक्षकस्थले व्याप्यतावच्छेदकधर्मविशेषावच्छिन्नाभावघटितभ्रमत्वग्रहदशायामितरानुमितिकारणसमुदायसत्त्वे व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वग्रहनियमस्तत्साध्यपक्षकस्थलाभिप्रायकमेवैतल्लाघवाभिधानमिति वदन्ति ।

ननु सामानाधिकरण्यघटितव्याप्तिपक्षे सामानाधिकरण्यप्रविष्टसाध्यसम्बन्धत्वमेवानुमितौ विधेयतावच्छेदकसम्बन्धताप्रयोजकं

तद्घटितोक्तव्याप्तेरनुमितिहेतुत्वे च सम्बन्धभाननियामकस्य दुर्वचतेत्याशंकां निरस्यति यत्सम्बन्धेति। उक्तव्याप्तिघटकसाध्याभावप्रतियोगितायामवच्छेदकतया भानमेव विधेयतावच्छेदकतया सम्बन्धभाननियामकमित्यर्थः।

ननु व्याप्तेः साध्यसाधनसामानाधिकरण्याघटितत्वे पक्षे कदाचित्संयोगेन हेतुमत्ताज्ञानादेवानुमितिः कदाचित्समवायादिनेत्यत्र किं नियामकम्? व्याप्तेस्तद्घटितत्वे च तादृशसामानाधिकरण्यघटकसाधनीयसम्बन्धेन पक्षे साधनवत्ताज्ञानस्यानुमितिहेतुतया तन्नियम इत्यत आह साध्याभाववति येन सम्बन्धेनावृत्तित्वमिति। यत्सम्बन्धावच्छिन्नवृत्तेरभाव इत्यर्थः। नातिप्रसङ्गः—नाभ्रान्तस्य समवायेन धूमादिमति वह्न्याद्यनुमितिप्रसंगः।

ननूक्तव्याप्तेरवृत्तिसाधारणतया तद्धेतुकाऽप्यनुमितिरभ्रान्तस्य स्यादित्यत आह आकाशादेरिति। तथात्वेपि—साध्याभाववदवृत्तित्वेपि। अभ्रान्तस्य तत्र पक्षधर्मताज्ञानविरहान्नानुमितिः।

नन्वेवमपि व्याप्तिभ्रमं विना नावृत्तिहेतुकानुमितिरित्यनुभवो व्याहन्येतैवेत्यत आह निविशतां वेति। वाशब्दोऽनास्थायाम्, उक्तानुभवस्य सविवादत्वात्। तत्र—तादृशव्याप्तावपि। साध्यसामानाधिकरण्यमिति। तथापि दर्शितलाघवाक्षतेरिति भावः।

वृत्तिमत्त्वनिवेशेनैवोक्तानुमितिवारणसंभवे साध्याधिकरणांशनिवेशो निरर्थकः, हेतोः साध्यासामानाधिकरण्यनिश्चयदशायामनुमित्यापत्तेर्व्यापकतापरामर्शहेतुताविचारोपदर्शितरीत्या निराससंभवादित्याशयेनाह वृत्तिमत्त्वं वेति। वृत्तिमत्त्वं—व्याप्यताघटकसम्बन्धेन संबंधित्वम्, अतस्तादात्म्यसंबंधेनाकाशादेरपि द्रव्यत्वादिव्याप्यतोपपत्तिः।

साध्याभाववद्वृत्तित्वात्यन्ताभावसाध्याभाववद्वृत्तिभेदरूप—साध्याभाववदवृत्तित्वस्य प्रत्येकं हेतुत्वेऽननुगमः। एकतरस्यैव हेतुत्वं विनिगमनाविरहात् दुर्वचम्। साध्याभाववद्वृत्तिभिन्नत्वशरीरेऽधिकस्याधिकरणस्य निवेशेन गौरवेऽपि तदहेतुत्वेऽनुभवविरोधः, अनुमितिहेतुताप्रयोजकस्य व्यभिचारज्ञानविरोधित्वस्याविशेषादिति, तादृशव्याप्त्योस्तद्विषयधियोर्वाऽनुगमे व्यापकसामानाधिकरण्यस्य तद्धियो वाऽनुगतरूपाक्रान्ततया व्यापकसामानाधिकरण्यधीर-

नुमितिहेतुः स्यादित्याशंकते अथेति । व्यभिचारधीरिति । साध्या-भाववद्वृत्तित्वधीरित्यर्थः। विरोधिधीविषयत्वेनेति । उक्तरूपेण व्याप्ति-द्वयमनुगमय्य तद्विषयकत्वेन ज्ञानानुगमः शिरोवेष्टनेन नासिकास्पर्श-तुल्य इति व्यभिचारज्ञानविरोधित्वेन ज्ञानानुगमकरूपेण हेतुतायां-मेव तात्पर्यम् । व्यभिचारबुद्धिम्—साध्याभाववद्वृतित्वबुद्धिम् । नचै-वमिति । व्यापकताधियः साध्याभाववद्वृत्तित्वधीप्रतिबन्धकत्वमेव नेत्यर्थः, मानाभावादिति भावः ।

ननु वन्ह्यभाववद्वृत्तिर्धूम इति ज्ञाने तुल्यवित्तिवेद्यतया वह्नित्वे धूमवद्वृत्त्यभावप्रतियोगितावच्छेदकत्वभानाद्वह्नित्वधर्मिकताद्दशाव-च्छेदकत्वाभावरूपव्यापकतावच्छेदकत्वावगाहिनो ज्ञानस्य ग्राह्याभा-वावगाहितया विरोधित्वमविवादमेवेत्याशंक्य ग्राह्याभावावगाहि-नोऽपि ज्ञानस्य विशेष्यांशे समानप्रकारकस्यैव विरोधिता, जातित्वादिना भासमानवह्नित्वादौ अवच्छेदकत्वावगाहिबुद्धिं प्रति वह्नित्वत्वाद्यवच्छिन्नं तत्रानवच्छेदकत्वधियोऽप्रतिबन्धकत्वात्, एवं प्रतियोगितावच्छेदकसम्बन्धावगाहिप्रतियोगिज्ञानं प्रत्येवाभावज्ञानं विरोधि अन्यथाऽतिप्रसंगादित्याशयेन प्रतिबध्यप्रतिबंधकभावाभिम-तज्ञानयोरसमानप्रकारकत्वं व्यभिचारज्ञाने ग्राह्यस्यावच्छेदकत्वस्य सम्बन्धताप्रदर्शनेन तत्संबंधानवगाहित्वं च दर्शयति वह्न्यभाववद्वृ-त्तिरिति। वह्नित्वं स्वरूपेणेति। भासते इत्यग्रिमेणान्वयः। स्वरूपेण भानं निष्प्रकारकभानं न तु सप्रकारकभानं वह्नित्ववदभाववृत्तिर्धूम इति वह्नित्वत्वावच्छिन्नविषयकधीविरोधित्वेनानुगमे च स्वरूपतो वह्नित्वावगाहिनो वह्न्यभाववद्वृत्तिर्धूम इति ज्ञानस्यासंग्रहो बोध्यः। सम्बन्धमर्यादयेत्यनेन तदंशे निष्प्रकारकत्वमपि दर्शितम् ।

विषयविरोधिविरहादिति। विरोधिताप्रयोजकविषयताविरहादि-त्यर्थः। अवच्छेदकत्वतदभावरूपविषययोर्विरोधस्य निर्विवादतया य-थाश्रुतासंगतेः। विशिष्टस्य-महानसीयत्वादिरूपविशेषणान्तरधर्मिता वच्छेदकतापन्नस्य। अवच्छेदकत्वेन—धूमसमानाधिकरणाभावप्रतियो गितावच्छेदकत्वेन, ताद्दशप्रतियोगितानवच्छेदकत्वानुपपत्त्या। प्रका-रान्तरानुसरणे—अवच्छेदकतापर्याप्त्यवच्छेदकानवच्छिन्नकिञ्चिद्धर्म-पर्याप्तिमत्त्वविवक्षणे। महानसीयत्वादिसहितवह्नित्वादिपर्याप्तावच्छे-दकतायाः पर्याप्त्यवच्छेदको न शुद्धवह्नित्वादिमात्रवृत्तिधर्मः न्यूनवृ-

तित्वात्। तथा च तादृशधर्मानवच्छिन्नबुद्धिविशेषविषयत्वावच्छेदकत्वादिधर्ममादाय वह्नित्वादेर्धूमादिव्यापकतावच्छेदकत्वमिति भावः। वह्नित्वादिरूपसाध्यतावच्छेदकदितरानवच्छिन्नप्रतियोगितानिवेशो वा।

न च विशिष्टपर्याप्त्यवच्छेदकतायाः वह्नित्वे प्रत्येकं द्वित्वादिवदभावसौलभ्येन यथाश्रुतमेव साध्विति वाच्यम्। एवं सति महानसीयवह्निभिन्नवह्निमान् धूमादित्यादावतिव्याप्तेः।

साध्यतावच्छेदकघटकयोर्महानसीयवह्निभिन्नत्ववह्नित्वयोः प्रत्येकमवच्छेदकत्वपर्याप्तिविरहेण तदनातिरिक्तस्य विशिष्टस्याप्यनवच्छेदकताया दुर्वारत्वात्। सुतरामिति। विषयविरोधविरहादित्यनुषज्यते। उक्तव्यभिचारज्ञाने दर्शितरीत्या परिष्करणेऽपि व्यापकताप्रविष्टाभावस्य धर्मितत्प्रतियोगितानवच्छेदकावच्छिन्नवत्त्वाभानादिति भावः।

ननु व्यभिचारव्यापकताज्ञानयोर्मणिमंत्रादिन्यायेन परस्परविरोधिता न तु ग्राह्याभावावगाहित्वेनेति समानप्रकारकत्वमनपेक्षितमत आह मणीति। इदमुपलक्षणम्—व्यापकताज्ञानस्य व्यभिचारधीविरोधित्वेऽपि सामानाधिकरण्यविषयतायास्तन्निरूपितहेतुविषयतायाश्च प्रतिबंधकतानवच्छेदकतया पक्षविषयतानिरूपितहेतुविषयतायाः तादृशधीप्रतिबन्धकतावच्छेदकत्वेन परामर्शकारणतावच्छेदके निवेशासंभवाद्वह्निव्याप्यो धूमो धूमवान् पर्वत इत्यादिसमूहालम्बनरूपाद्व्यभिचारधीविरोधिज्ञानादनुमित्यापत्तिर्दुर्वारेत्यपि बोध्यम्।

(दी०) व्यापकताज्ञानादेवानुमितिरिति च नानुभाविकं न वा यौक्तिकम्। ज्ञानत्वत्वादिना ज्ञानत्वादेर्व्यापकतावच्छेदकत्वग्रहे ज्ञानादिमानित्यनुमितेरयोगात्। अन्यथा जातित्वेनाऽनुभवत्वव्यापकगुणत्वव्याप्यजातित्वादिना वा तथात्वग्रहेऽपि तत्प्रसङ्गात्। एतेन केवलान्वयिसाध्यकत्वज्ञानमेवानुमितिहेतुरित्यपि परास्तम्। सर्वजनानुभवसिद्धानुमितिभावे धूमादिदर्शनानन्तरं जायमाने गृह्यमाणव्यतिरेकवह्न्यादिज्ञानेऽसम्भवाच्च।

प्रमेयत्वादेश्च घटादिवृत्तित्वं केवलान्वयित्वेन कथञ्चित्तद्वृत्ति-धर्मव्यापकत्वेन वाऽनुमेयम्, न तु ज्ञेयत्वादिहेतुका तदनुमिति-रानुभविकी ।

(गा०) ननु केवलान्वयिसाध्यकानुमितेर्भ्रमं विनोपपादनाय गुरुशरीरापि व्यापकसामानाधिकरण्यरूपा व्याप्तिरेवानुमितिप्रयो-जिका वाच्येत्यत आह व्यापकतेति । ज्ञानादिमानित्यनुमितेरिति । स्वरूपतो ज्ञानत्वादिविधेयतावच्छेदकावगाह्यनुमितेरित्यर्थः । अयो-गादिति । यद्धर्मावच्छिन्ने साध्यतावच्छेदके व्यापकतावच्छेदक-त्वग्रहस्तेन रूपेण साध्यतावच्छेदकमनुमितिविषय इति नियमस्य भवताऽभ्युपगन्तव्यत्वादिति भावः । व्यतिरेकिसाध्यकस्थले सा-ध्याभाववदवृत्तित्वज्ञानम् केवलान्वयिसाध्यकस्थले तु व्यापकसामा-नाधिकरण्यज्ञानं हेतुरित्युक्तौ वह्न्यभाववदवृत्तित्वाज्ञानात्स्वरूपतो वह्नित्वादिविषयिण्या वह्निमानयमित्याद्यनुमितेर्निर्वाहात् विषयतया केवलान्वयिनो ज्ञानस्य साध्यतानुसरणम् । वाच्यत्वत्वादेरखंडधर्म-त्वाभावेन स्वरूपतोऽभानात्तदवच्छिन्नसाध्यकोपेक्षा । निर्धर्मितावच्छेदकव्यापकतावच्छेदकत्वग्रहस्य व्यभिचारग्रहाप्रतिबध्यतया सधर्मितावच्छेदकस्य स्वरूपतो ज्ञानत्वानवगाहितया च न तस्य ज्ञानवानित्यनुमितिहेतुतासंभव इति ध्येयम् ।

रूपान्तरेण व्यापकतावच्छेदकत्वावगाहिपरामर्शस्य स्वरूपतो विधेयतावच्छेदकभासकत्वोपगमे बाधकमाह अन्यथेति । तन्मात्र-वृत्तिधर्मपुरस्कारेण तत्र व्यापकतावच्छेदकत्वग्रहस्य स्वरूपतस्तद्ध-र्मभासकत्वोपगमे । जातित्वेन-जात्यन्तरसाधारणेन, व्यापकताव-च्छेदकतावच्छेदकत्वग्रहान्नातिप्रसंग इत्याशयेनाह अनुभवत्वव्या-पकेति । प्रत्यक्षत्वानुभवत्वसाधारण्यवारणायानुभवत्वव्यापकेति अनुभवतदन्यवृत्तीत्यर्थकम् । स्मृतित्वव्यावर्तनायानुभववृत्तित्वनि-वेशः । सत्तागुणत्वव्यावर्तनाय गुणत्वव्याप्येति किञ्चिद्गुणावृत्त्यर्थ-कम् । तथात्वग्रहेऽपि-व्यापकतावच्छेदकत्वग्रहेऽपि । तत्प्रसंगात्-स्वरूपतो ज्ञानत्वविषयकानुमितिप्रसंगात् । न चोक्तरूपेण व्यापक-तावच्छेदकत्वग्रहस्य स्वरूपतो ज्ञानत्वप्रकारकज्ञानानुमित्यजनकत्वे-ऽपि ज्ञानत्वत्वेन तद्ग्रहस्य तादृशानुमितिजनकत्वमविरुद्धमिति

वाच्यम्, तथासत्यसति सिद्धिविशेषादिरूपताद्दशानुमितिप्रतिबंधके ज्ञानत्ववत्वानयमित्येतावन्मात्राकारिकाया अनुमितेर्विलोपप्रसंगात् ।

यत्तु–स्वरूपतो यत्र ज्ञानत्वादिकं सामानाधिकरण्यनिरूपकतावच्छेदकतया भासते ताद्दशाद्व्यापकतावच्छेदकत्ववज्ज्ञानसमानाधिकरणहेतुमानयमित्यादिपरामर्शाज्ज्ञानवानयमित्याद्यनुमितिः, यत्र च ज्ञानत्वत्वादिनैव तत्तथा भासते ताद्दशाद्व्यापकतावच्छेदकज्ञानत्ववत्समानाधिकरणहेतुमानयमिति परामर्शाज्ज्ञानत्ववद्वानयमित्याकारानुमितिरिति–कैश्चिदुच्यते । तदसत्—व्यापकतावच्छेदकजातिविशेषवज्ज्ञानसमानाधिकरणहेतुमानयमित्यत इव ताद्दशज्ञानत्ववज्ज्ञानसमानाधिकरणहेतुमानयमित्यतोऽपि ज्ञानवानयमित्यनुमितेरयोगात् । ताद्दशपरामर्शयोरविशेषेणैकस्मादेव ताद्दशानुमितिर्नान्यस्मादिति फलवैषम्यस्यानुभवविरुद्धत्वात्, अन्यथा वैपरीत्यस्यापि सुवचत्वात् । ज्ञानत्ववज्ज्ञानवानयमित्याकारानुमितिर्द्विधा-ज्ञानत्वविषयिणी कदाचित् कदाचिज्ज्ञानवानयमित्यनुमितिरिति नियमस्य तावताप्यनिर्वाहाच्च ।

तद्धर्मावच्छिन्नेतरावृत्तित्वेन व्यापकतावच्छेदकत्वज्ञानात्तद्धर्मप्रकारेण साध्यानुमितिस्तत्रेतरत्वप्रतियोगितावच्छेदकतया तद्धर्मस्य याद्दशं भानमनुमितावपि तस्य ताद्दशं भानमिति नियमः । अतो व्यापकतावच्छेदकज्ञानत्ववदितरावृत्तिधर्मवत्समानाधिकरणहेतुमानयमित्यादिज्ञानात् ज्ञानत्ववानयमित्यनुमितिः, व्यापकतावच्छेदकज्ञानेतरावृत्तिधर्मवत्समानाधिकरणहेतुमानयमित्यादिपरामर्शाच्च ज्ञानवानयमित्याद्यनुमितिरिति तु सूक्ष्मदर्शिनः ।

प्रतियोगिताधर्मिकसाध्यतावच्छेदकावच्छिन्नत्वघटितोभयाभाववज्ज्ञानमनुमितिहेतुः, तत्र साध्यतावच्छेदकस्य स्वरूपतोऽपि भानसंभवात्तदीयसाध्यतावच्छेदकतुल्यानुमितौ तद्विषयतेति नियमान्न किञ्चिदनुपपन्नमित्यपि वदन्ति ।

तत्तद्वह्नित्वरूपेण प्रतियोगित्वेऽपि वह्नित्वरूपेण प्रतियोगित्वाभावमभ्युपगच्छतः प्रगल्भस्य मते साध्यतावच्छेदकावच्छिन्नऽप्रतियोगित्वज्ञानमेवानुमितिहेतुः तत्र स्वरूपतोऽपि साध्यतावच्छेदकभानसंभवात्सर्वसामंजस्यमिति ध्येयम् ।

ननु साध्याभाववदवृत्तित्वज्ञानमात्रस्यानुमितिहेतुत्वे भ्रमं विना केवलान्वयिसाध्यकमनुमानं नोपेयम् , तथा च केवलान्वयिसाध्यकहेतुमत्तापरामर्श एवानुमितिहेतुरास्ताम् व्यतिरेकिसाध्यके केवलान्वयित्वभ्रमादेवानुमितिरिति विपरीतं कुतो न स्यादित्यत आह—अत एवेति । ज्ञानत्वत्वावच्छिन्ने केवलान्वयित्वावच्छेदकत्वज्ञानात् स्वरूपतो ज्ञानत्वादिप्रकारकज्ञानाद्यनुमितेरनुपपद्यमानत्वादेवेत्यर्थः । उक्तरीत्या तदुपपत्तिमाशंक्य दूषणान्तरमाह—सर्वेति । गृह्यमाणव्यतिरेकवह्न्यादीनां न मानसमेवेति शंकानिरासाय सर्वजनानुभवसिद्धानुमितित्वकथनम् । केवलान्वयित्वभ्रमासंभवाय गृह्यमाणव्यतिरेकेति ।

नन्वेवं केवलान्वयितया गृह्यमाणवाच्यत्वादेरनुमितिनिर्वाहाय व्यापकज्ञानहेतुताकल्पनमपि दुर्वारमेव । न च वाच्यत्वत्वमभावप्रतियोगितानवच्छेदकमिति ज्ञानकालेऽपि सम्बन्धविशेषाऽभावे वाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वावगाहि असमानप्रकारकं व्याप्तिज्ञानं संभवत्येवेति न व्यापकताधीहेतुतेति वाच्यम् । अभावत्वावच्छेदेनानुयोगितात्वावच्छेदेन वा स्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नप्रतियोगिताकाभावज्ञानदशायां साध्याभाववदवृत्तित्वरूपव्याप्तिग्रहस्य दुरुपपादत्वात् समानप्रकारविरोधिज्ञानसत्त्वात् । स्वरूपसंबंधावच्छिन्नवाच्यत्वत्वाद्यवच्छिन्नप्रतियोगिताकत्वाप्रसिद्धावपि भ्रमात्मकबाधज्ञानसंभवात् । अभावबुद्धौ प्रतियोगितावच्छेदकस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रकारत्वे तादृशव्यधिकरणसंबंधावच्छिन्नवाच्यत्वाभावविषयकप्रमात्मकविरोधिज्ञानस्यापि सुलभत्वात् ।

वस्तुतस्तु स्वरूपसंबन्धेन वाच्यत्वत्वावच्छिन्नप्रकारकज्ञानादिनिष्ठवाच्यत्वविषयतायामेव तादृशप्रतियोगिताकत्वं प्रसिद्ध्यति। न च विषयतानिष्ठं सप्रतियोगिकत्वमभावादिनिष्ठन्ततोऽन्यजातीयमेव न त्वेकजातीयमिति वाच्यम्, मिथो वैलक्षण्यस्याप्रामाणिकतया एकजातीयताया आवश्यकत्वात्। अत एव संयोगसाधारण्यात्सप्रतियोगिकत्वमेवाभावत्वमित्यस्यासंभवं वक्ष्यति विरोधग्रन्थे ।

यत्तु—अभावत्वाविषयकं साध्यरूपप्रकारांशे निर्धर्मितावच्छेदककं दर्शितविपरीतज्ञानाप्रतिबध्यं साध्यीयवदवृत्तिमानित्याकारकं व्याप्ति-

ज्ञानं तदापि संभवतीति–कस्यचिन्मतम्। तदशुद्धम्–तावताप्यभ्रान्तस्य केवलान्वयिसाध्यकानुमितिर्दुरुपपादैव व्यापकताधीहेतुत्वमन्तरेण। एवं तद्वत्ताज्ञानं प्रति तदीयत्वसहिताभावत्वेनाभावविषयकमतिप्रसक्तेन तदीयत्वसहितानुयोगिताविशेषत्वेनानुयोगिताविशेषरूपाभावत्वविषयकं वा तन्नास्तीत्याकारकज्ञानमेव यथा विरोधि न तु विषयितादिसाधारणतयाऽतिप्रसक्तेन तदयित्वादिनाऽभावमनुयोगिताविशेषं वावगाहमानं तथा हेतुमति साध्यं नास्तीत्याकारकं साध्यीयत्वाभावत्वाभ्यामभावविषयकं तदीयत्वानुयोगिताविशेषत्वाभ्यामनुयोगिताविषयकं वा व्यभिचारज्ञानमेवानुमितिजनकज्ञानविरोधि न त्वतिप्रसक्ततदीयत्वमात्रेणाभावादिविषयकम्। एवं चाभावत्वानवच्छिन्नेऽनुयोगिताविशेषत्वानवच्छिन्नानुयोगितायां वा तदीयत्वावगाहि-अभावत्वावच्छिन्नेऽनुयोगिताविशेषत्वरूपेणानुयोगितायां वाऽतदीयत्वज्ञानाप्रतिबध्यं ज्ञानं नानुमितिहेतुः संभवति तदीयत्वमात्रेणाभावविषयकसाध्याभावधर्मिकहेतुसामानाधिकरण्यज्ञानदशायामनुमित्यनुपपत्तेरिति उपदर्शितकेवलान्वयित्वग्रहेऽनुमितिर्दुरुपपादैवेत्याशंक्य तत्र केवलान्वयित्वग्रहदशायां तत्साध्यकानुमित्यसंभवेऽपि तत्र पक्षवृत्तित्वानुमित्यैव तत्कार्यस्य पक्षे साध्यसंशयनिवृत्त्यादेः संभव इत्याशयेनाह प्रमेयत्वादेरिति।

ननु केवलान्वयित्वस्य प्रमेयत्वादावग्रहदशायां घटादौ तत्संशयनिवर्तिकाऽनुमितिः कथमभ्रान्तस्योपपाद्यतामित्यत आह कथञ्चित्तद्वृत्तिधर्मव्यापकत्वेनेति। लिङ्गेनेति शेषः। व्यापकताज्ञानाद्घटादौ मेयत्वादिसाध्यकानुमितिवादिमते प्रमेयत्वादौ घटादिवृत्तित्वानुमापकोक्तलिङ्गज्ञानस्यावश्यकत्वादिति भावः।

ननु यत्र स्थले यत्र घटवृत्तिज्ञेयत्वादिर्हेतुस्तत्र प्रमेयत्वमित्यादिसहचारज्ञानाभावात् घटवृत्तित्वाद्यवच्छिन्नव्यापकता मेयत्वादौ न पूर्वं गृहीताऽपि तु यत्र ज्ञेयत्वादिहेतुस्तत्र प्रमेयत्वमित्यादिसहचारज्ञानात् ज्ञेयत्वमेयत्वाद्यवच्छिन्ननिरूपितव्यापकतामात्रं तत्र सिद्धान्तिमते घटादौ प्रमेयत्वानुमितिः संभवति न तु प्रमेयत्वादौ घटादिवृत्तित्वानुमितिरुक्तलिङ्गग्रहादित्यत उक्तं कथञ्चिदिति। व्यापकत्वनिरूपकतया भासमाने ज्ञेयत्वत्वाद्यवच्छिन्ने उपलक्षणविधया घटादिवृत्तित्वग्रह इति रीत्याऽभावप्रतियोगिकोटावुपलक्षणतया भानस्याप्रामा-

णिकत्वे तु विशिष्टव्यापकताघटकप्रत्येकयावत्पदार्थोपस्थितौ विशिष्टव्यापकताव्यावर्तकविशेष्यव्यापकत्वे निश्चीयमाने विशिष्टस्य सहचारग्रहमनपेक्ष्यैव विशिष्टव्यापकतानिश्चयस्य संभवेन तद्वृत्तिधर्मव्यापकत्वरूपलिङ्गस्य प्रमेयत्वादौ निश्चयोपपत्तेरित्यर्थः ।

(१)व्यापकताज्ञानाद्धटादौ प्रमेयत्वसाध्यकानुमितिवादिमते प्रमेयत्वादौ घटादिवृत्तित्वानुमापकोक्तलिङ्गज्ञानस्यावश्यकत्वादिति भावः । ननु प्रमेयत्वादावुक्तलिङ्गसम्भवेऽपि तादृशलिङ्गे घटादिवृत्तित्वसहचारग्रहासत्त्वे तद्व्याप्तेर्दुर्ग्रहात्तदनुमित्यसम्भवेन केवलान्वयिसाध्यकानुमितेरावश्यकतेत्यतः कथंचिदिति । उक्तलिङ्गे विशिष्य घटवृत्तित्वादिव्याप्तिग्रहासम्भवेऽपि यद्वृत्तितावच्छेदकावच्छिन्नव्यापकं तत्तद्वृत्तीति सामान्यमुखव्याप्तिग्रहः सुलभ एव । घटवृत्तितावच्छेदकावच्छिन्नव्यापकमपि घटावृत्ति स्यादित्यप्रयोजकत्वशङ्कया च नोक्तलिङ्गे घटवृत्तित्वव्याप्तिग्रह इति तु न शंक्यम् । घटवृत्त्यधिकरणघटनिष्ठाभावप्रतियोगित्वसत्त्वेन निरुक्तलिङ्गस्यैव व्याघातादिति भावः ।

इदमत्रावधेयम् । केवलान्वयिसाधारणव्याप्तेः साध्यसामानाधिकरण्यरूपाधिकांशघटिततया गौरवेण तत्साध्यकानुमानाभ्युपगमोऽनुचितः । पक्षवृत्तिहेतुव्यापकं साध्यमिति ज्ञानादेवानुमितेः स्वीकरणीयत्वात् । यदि च व्यापकताज्ञाने प्रतियोगित्वादिकं प्रकारः साध्याभाववद्वृत्तित्वज्ञाने तु संसर्ग इत्यतः किमपि लाघवं स्यादिति मन्यते, तदा पक्षीयहेतुमत्तावच्छेदेन साध्यवत्तावगाहिनः साध्यांशे व्यापकतारूपसंसर्गावगाहित्वेन हेतुता किं नोपेयते ? व्यापकताज्ञाने वह्नित्वत्वादिविषयतानिवेशेन गौरवाद्बेद्बिभेषि, तदा प्रमादिरूपसाध्यतावच्छेदकांशे प्रमात्वादिरूपविशेषणावच्छिन्नव्यापकतावच्छेदकत्वावगाहिज्ञानस्य प्रमेयत्वादिसाध्यकानुमितिहेतुतां किमुपेक्षसे प्रमात्वविषयतानिवेशस्योभयमते तुल्यत्वात् । एकरूपेणावच्छेदकत्वेऽपरान्यरूपावच्छिन्नेऽवच्छेदकत्वाभावस्य सुवचत्वात् । असर्वविषयकप्रमाव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि प्रमा-

---

(१) इत आरभ्य भाव इत्यन्तः पाठः पुस्तकान्तरे नास्ति ।

त्वाद्यवच्छिन्ने व्यापकतावच्छेदकतायाः सुघटत्वात् । केवलान्वयि-हेतुकस्थलेऽपि सर्वविषयकेश्वरीयप्रमायाः,व्यतिरेकिहेतुकस्थले तु हेतुमद्यावद्विषयकान्यतमप्रमायाश्च केनाऽपि रूपेण हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वासम्भवाच्च प्रमात्वसामानाधिकरण्येन व्यापकतावच्छेदकत्वस्याक्षतेः । विशिष्य हेतुविषयतामनन्तर्भाव्य कारणताकल्पनं व्यापकतापरामर्शहेतुतावादिनाऽपि शक्यमिति केवलान्वयिव्यावृत्तव्याप्तेः साधनभेदेऽप्यभेदोऽकिञ्चित्करः । व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्य प्रामाणिकत्वे साध्याभाववदवृत्तित्वज्ञानहेतुत्वमतेऽपि केवलान्वय्यनुमानं निराबाधमेव । साध्यतावच्छेदकविशिष्टसाध्याभावस्याप्रामाणिकत्वेऽपि [१] व्यधिकरणसमवायित्वाद्यवच्छिन्नवाच्यत्वादिमद्भेदवत् व्यधिकरणवाच्यत्ववत्वविशिष्टावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकाभावरूपव्याप्तेः प्रसिद्धिसम्भवात् । न च व्यधिकरणसाध्यावच्छिन्नाभाववदवृत्तित्वाभावस्य व्याप्तित्वे व्यभिचारिहेतावपि साध्यावच्छिन्नान्यदीयाभाववद्वृत्तित्वाभावमादाय सल्लिङ्गकपरामर्शसम्भव इति वाच्यम् । साध्यतावच्छेदकविशिष्टसहिताभावत्वमात्रावच्छिन्नाभावनिष्ठावच्छेदकताया एव व्याप्तिघटकत्वात्, धूमीयत्वादिना घटाभावादिमद्वृत्तित्वाभावीयप्रतियोगितायां अभावनिष्ठावच्छेदकतायां व्यधिकरणतया धूमादेरिव समानाधिकरणतया घटादेरप्यवच्छेदकत्वात् व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकतावदतदभावप्रतियोगितावच्छेदकतावच्छेदकताया व्यधिकरण इव समानाधिकरणेऽपि स्वीकारादिति नवीनः पन्थाः ।

अथ समवायित्वेन वाच्यत्ववान्नायमिति प्रतीतिबलाद्भेद एव व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताको न त्वत्यन्ताभावोऽपि तथा, अतएव दीधितिकृता प्रमेयत्वादिकेवलान्वयिधर्मावच्छिन्नहेतुकस्थले तद्रूपस्य व्यधिकरणतया प्रतियोगिताया अवच्छेदकत्वासम्भवेन साध्याभावसजातीयतद्व्यापकाभावप्रतियोगि-

---

[१] व्यधिकरणसमवायित्वाद्यवच्छिन्नवाच्यत्ववत्वाविशिष्टावच्छिन्नाभावनिष्ठप्रतियोगितावच्छेदकताकाभावरूपव्याप्तेः—इतिपुस्तकान्तरे पाठः ।

तावच्छेदकत्वं निराकृत्य यथाश्रुतमिश्रलक्षणदूषणमपि सङ्गच्छते, अन्यथा समवायित्वादिना प्रमेयत्वादेरपि तादृशप्रतियोगितावच्छेदकत्वसम्भवेन तल्लक्षणनिर्वाहात् । न च तादृशाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताक एव न तु तादृशप्रतियोगिताकत्वेन साध्याभावसजातीय इति न तल्लक्षणघटक इति वाच्यम् । समनियताभावैक्येन व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्यापि स्वसमनियततादृशप्रतियोगिताकाभावरूपत्वादिति चेन्न, समवायितया वाच्यत्ववान्नायमिति प्रतीतिवत् समवायितया वाच्यत्ववान्नात्रेति प्रतीतेरपि दुर्वारत्वात् ।

माभूद्वा व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकोऽभावस्तथाऽपि साध्यवदनिरूपितत्वावच्छिन्नाधेयत्वाभाव एव व्याप्तिः । केवलान्वयिनि साध्यवदनिरूपितत्वं किञ्चिदनिरूपितघटादौ प्रसिद्धं तदवच्छिन्नाधेयत्वाभावस्तत्र व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एव प्रसिद्धः । व्यभिचारिणि व्यभिचारनिरूपकाधिकरणाधेयत्वे प्रतियोगिनि साध्यवदनिरूपितत्वसत्त्वेन तद्रूपावच्छिन्नाधेयत्वाभावः समानाधिकरणधर्मावच्छिन्नाभाव एव तस्य हेतावसत्त्वान्नातिव्याप्तिः ।

सत्तादिनिष्ठद्रव्यगुणादिनिरूपिताधेयताः स्वस्वनिरूपकद्रव्यगुणादिरूपाधिकरणभेदाद्भिद्यन्त एव, अत एव द्रव्याद्याधेयतायाः गुणाद्यन्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नत्वाद्गुणाद्याधेयतायाश्च तदनवच्छिन्नत्वात्तेन रूपेण सत्तादेर्गुणाद्यवृत्तित्वादतः सत्तादिनिष्ठगुणाद्याधेयत्वं द्रव्यत्वादिसाध्यवदनिरूपितमेव ।

परे तु साध्याभाववद्वृत्तितायाः साध्यवद्वृत्तित्वान्यवृत्तित्वत्वेन निवेशः, अन्यथाऽव्याप्यवृत्तिसाध्यकाव्याप्तेः अव्याप्यवृत्तिधर्मावच्छिन्नभेदस्याव्याप्यवृत्तितानये साध्याभावस्थले साध्यवद्भेदनिवेशेऽपि तदप्रतीकारात् । एवञ्च केवलान्वयिसाध्यकेऽप्रसिद्धिनिबन्धनाव्याप्तिवारणाय साध्यवन्निरूपितवृत्तौ हेतुनिष्ठत्वं निवेशनीयं, तथाच वाच्यं ज्ञेयत्वादित्यादौ ज्ञेयत्वादिहेतुनिष्ठं यत्साध्यवद्वृत्तित्वं तदन्यवृत्तिराकाशाभावादौ प्रसिद्ध्यति तदभावस्य ज्ञेयत्वादौ सत्त्वेन लक्षणसमन्वयः । न च तथाऽपि वाच्यं प्रमेयादित्यादौ साध्यवन्निरूपितप्रमेयनिष्ठवृत्तिभिन्नवृत्त्यप्रसिद्ध्याऽव्याप्तिर्दुर्वारैवेति वाच्यम् ।

स्वनिष्ठं यत्साध्यवद्वृत्तित्वं तद्भेदनिवेशनेन सामंजस्यात् । यदा यत्र हेतुव्यक्तौ लक्षणं संगमनीयं तदा स्वपदेन तस्यैवोपादेयतया तत्प्रमेयव्यक्तौ साध्यवन्निरूपिततत्तन्निष्ठवृत्तिभिन्नप्रमेयान्तरनिष्ठवृत्तिशून्यत्वमादाय लक्षणसमन्वयात् । अवच्छेदकभेदेनाधेयताभेदे हेतुनिष्ठत्वस्थाने हेतुतावच्छेदकावच्छिन्नत्वं निवेशनीयम्, एवं चोक्तस्थले रूपान्तरावच्छिन्नसाध्यवद्वृत्तित्व एव विशिष्टान्यत्वप्रसिद्धिः । हेतौ हेतुतावच्छेदकावच्छिन्नसाध्यवद्वृत्तित्वान्यरूपान्तरावच्छिन्नसाध्यवद्धोक्तवृत्तित्वसत्त्वेऽपि न क्षतिः तादृशसाध्यवद्वृत्तित्वान्या या वृत्तिस्तदनवच्छेदकहेतुतावच्छेदकत्वस्य विवक्षणीयत्वात् । अवच्छेदकभेदेऽप्याधेयताया अभेदे हेतुतावच्छेदकनिष्ठं यत्साध्यवद्वृत्तितावच्छेदकत्वं तदन्यवृत्तितावच्छेदकताशून्यत्वं हेतुतावच्छेदके निवेशनीयमित्याहुः ।

केचित्तु साध्यतावच्छेदकत्वशून्यत्वं हेतौ निवेश्यम् । स्वावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यसम्बन्धानवच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकाभाववत्त्वमेव स्वावच्छिन्ननिरूपिता व्याप्तिः । वाच्यत्ववत्त्वस्यैव तादृशसम्बन्धावच्छिन्नाभावस्तु व्यधिकरणसम्बन्धावच्छिन्नाभाव इति वदन्ति ।

(दी०) एवं साध्याभावव्यापकाभावप्रतियोगित्वमपि नानुमित्यौपयिकं गौरवात्, व्यभिचारज्ञानाविरोधित्वाच्च । वह्न्यभावसमानाधिकरणाभावाप्रतियोगी धूमाभाव इति ज्ञानं धूमाभावाभावत्वेन तत्र वह्न्यभावसामानाधिकरण्यबुद्धिं कदाचिद्विरुन्ध्यात्, न तु धूमत्वेन भिन्नप्रकारकत्वात् । व्यतिरेकव्याप्तिग्रहाधीना च धीर्नानुमितिस्तत्त्वेनाननुभवात्, क्लृप्तकारणाभावात्, सामग्रीभेदकल्पनायाश्चानुभवैकाधीनत्वात्, किन्तु विजातीया । तत्करणमपि प्रमाणान्तरमर्थापत्तिरेव । क्लृप्तप्रमाणद्वयसमाहारसमशीलं च युगपदन्वयव्यतिरेकिधमद्वयप्रतिसन्धानम् ।

(गा०)अर्थापत्तेः प्रमाणान्तरत्वं व्यवस्थापयिष्यन् व्यतिरेकव्याप-

कताया अप्यनुमित्युपयोगितां खण्डयति एवमिति । गौरवादिति । अस्य साध्याभाववद्वृत्तित्वापेक्षयेत्यादिः। तादृशप्रतियोगित्वज्ञानस्य विजातीयप्रमितिहेतुताया भवतोऽप्यावश्यकत्वाच्छरीरगौरवमकिञ्चित्करमत आह व्यभिचारज्ञानेति । व्यभिचारज्ञानघटितसामग्र्या अनुमितिप्रयोजकत्वे आकांक्षादिज्ञानघटितसामग्र्या अपि तथात्वापातेन शब्दादीनामपि स्वतन्त्रप्रमाणताभङ्गप्रसङ्ग इति भावः ।

ननु हेत्वाभावाभावे हेतौ साध्याभावसामानाधिकरण्यग्रहरूपव्यभिचारज्ञाने हेत्वभावे साध्याभावव्यापकताधीर्विरोधिन्येव व्यापकाभिमतस्याभावे व्याप्याभिमतसामानाधिकरण्यग्रहे व्यापकताज्ञानस्य प्रतिबन्धकत्वादित्यत आह वन्ह्यभावेति । तत्र-धूमे । कदाचिद्विरुन्ध्यादिति । धूमाभावाभावत्वेन वन्ह्यभावसामानाधिकरण्यग्रहे तुल्यवित्तिवेद्यतया वन्ह्यभावसमानाधिकरणाभावप्रतियोगिताया धूमाभावे भानात्तत्र तादृशाभावाप्रतियोगित्वज्ञानस्य ग्राह्याभावावगाहित्वादिति भावः । प्रतियोगित्वस्य संसर्गविधया ज्ञाने प्रतियोगित्वाभावज्ञानस्य प्रतिबन्धकत्वं न वास्तवमित्याशयेन कदाचिदित्युक्तम् । न तु धूमत्वेनेति । तत्र वह्न्यभावसामानाधिकरण्यबुद्धिं विरुणद्धीति विपरिणतमनुषज्यते । भिन्नप्रकारकत्वादिति । धूमाभावाभावत्वप्रकारकत्वेन तुल्यवित्तिवेद्यतयाऽपि धूमाभावे प्रतियोगित्वानवगाहनादित्यर्थः ।

ननु व्यतिरेकव्याप्तिज्ञानादपि पक्षे साध्यनिर्णयो भवति, तस्य च प्रत्यक्षादिरूपत्वासम्भवेनानुमितित्वमावश्यकमित्यत आह व्यतिरेकेति । तत्त्वेन—अनुमितित्वेन । अननुभवादिति । अर्थापद्यामीत्यनुव्यवसायस्यैव तत्रोत्पत्तेरिति भावः ।

ननु तत्रानुमितित्वानुभवस्य सविवादत्वेऽपि अनुमितिसामग्रीजन्यतयाऽनुमितित्वमावश्यकमित्यत आह क्लृप्तेति । साध्याभाववदवृत्तित्वज्ञानस्यैव लाघवेनानुमितिहेतुतायाः क्लृप्तत्वादिति भावः । ननु व्यतिरेकव्याप्तिज्ञानघटितसामग्रीजन्यत्वमपि पृथगनुमितित्वप्रयोजकं वाच्यमित्यत आह सामग्रीभेदेति । एतस्या अपि अनुमितिसामग्र्यन्तरत्वकल्पनायाश्चेत्यर्थः । अनुभवेति । अनुमितित्वानुभवेत्यर्थः । न तु तद्वदवृत्तित्वज्ञानाजन्यस्यानुमितित्वमित्येवा-

ह किन्त्वित्यादिना। विजातीयेति। अनुमितित्वविरुद्धजातिमतीत्यर्थः। अनुमिनोमीत्यनुव्यवसायात्प्रत्यक्षविजातीयाऽनुमितिप्रमावत् शाब्दयामीत्यादिप्रतीतिबलात् शाब्दाख्यप्रमित्यन्तरवच्चार्थापयामीत्यनुव्यवसायबलादपि विजातीयप्रमासिद्धेर्दुर्वारत्वात्। तस्या अनुमितित्वाननुभवेऽपि अनुमितित्वे शाब्दादिबुद्धेरपि तथात्वप्रसङ्गाद्व्यतिरेकव्याप्तिज्ञानघटिताया इवाकांक्षादिज्ञानादिघटिताया अपि सामग्र्या अनुमितिप्रयोजकतासम्भवादिति भावः।

नन्वेवं तत्करणस्य प्रमाणान्तरत्वप्रसङ्ग इत्यत्रेष्टापत्तिमाह तत्करणमपीति। अर्थापत्तिः प्रमाणान्तरमेवेति योजना। अर्थापत्तिः-अनुपपद्यमानो योऽर्थस्तज्ज्ञानम्।

नन्वेवमन्वयव्याप्तिप्रकारेण साध्याभावव्यापकाभावप्रतियोगित्वप्रकारेण च पक्षे हेतुमत्ताज्ञाने ज्ञानयौगपद्यानुगमे उभयजातीयमेकज्ञानमेव स्वीकरणीयमिति जातिसंकरप्रसङ्ग इत्यत आह कलप्तेति। कलप्तप्रमाणद्वयसमाहारः-शाब्दानुमानादिरूपप्रमाणद्वयसंस्वलनम् तत्समशलिं, युगपदन्वयव्यतिरेकिधर्मद्वयप्रतिसन्धानम्-अर्थापत्त्यनुमानयोः संवलनम् तथा च यथा तत्रैकसामग्र्या बलवत्त्वान्नैकदा मिथो विजातीयद्वयसामग्रीसमावेश इति न कलप्तानुमितित्वशाब्दत्वादीनां सङ्करस्तथा प्रकृतेऽपि सामग्र्या बलवत्त्वकल्पने चानुभवानुरोध एव विनिगमकः। फलसन्देहे च या सामग्री गुरुशरीरा तस्या एव बलवत्त्वं कल्प्यते, तस्या दुर्बलत्वे स्वीयफलेच्छाविशिष्टत्वेन तत्प्रतिबन्धकतायाः कल्पनीयतया इच्छया समं तत्प्रविष्टकारणानां विशेष्यभावे विनिगमनाविरहेण गुरुसामग्र्याः प्रतिबन्धकताबाहुल्येन गौरवात्। न चोभयेच्छासत्त्वे स्वभावतो बलवत्सामग्र्यैव फलजननात्तदानीमुत्तेजकबलेन स्वभावदुर्बलसामग्रीफलवारणाय स्वफलेच्छाविरहविशिष्टाया दुर्बलसामग्रीफलेच्छाया एव बलवत्सामग्र्यामुत्तेजकत्वं वाच्यं, दुर्बलसामग्र्यां च बलवत्सामग्रीफलेच्छाविरहविशिष्टा स्वफलेच्छा विशेषणं वाच्यम्, तथाच दुर्बलसामग्र्यां नाधिकप्रवेश इति किं तस्या गौरवेणेति वाच्यम्। इच्छाविरहविशिष्टाया इच्छाया यत्र विशेषणत्वं तत्रेच्छातद्विरहयोर्मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्धकताधिक्यम्, यत्र चेच्छाविशेषविरहविशिष्टेच्छाया उत्तेजकत्वं

न तु विशेषणत्वं तत्र तयोरेव मिथस्तथात्वे विनिगमनाविरह इ-ति प्रतिबन्धकत्वस्याल्पतात्वमिति गुरुसामग्र्या एव बलवत्त्वौचित्यात् ।

वस्तुतो बलवत्याः सामग्र्याः प्रतिबन्धकतायामिच्छाविरह-विशिष्टाया इच्छाया नोत्तेजकत्वं किन्तु विनिगमनाविरहभयेनेच्छा-मुत्तेजकीकृत्य एकप्रतिबन्धकत्वं स्वफलेच्छावैशिष्ट्यं निवेश्य चा-न्यप्रतिबन्धकत्वं कल्प्यते तावतैव उभयदिशीच्छादशायां दुर्बल-सामग्रीफलप्रतिबन्धोपपत्तिरिति दुर्बलसामग्र्यामिच्छातद्विरहयो-रेकत्र निवेशेन प्रतिबन्धकताबाहुल्यमतिस्फुटमेव । प्रकृते च व्यति-रेकव्याप्तिज्ञानघटिता सामग्री गुरुशरीरा एतादृशव्याप्तेरधिकपदार्थ-घटितत्वात् अधिकपदार्थांशे भ्रमत्वज्ञानाभावादिनिवेशाच्चेति दिक् ।

(दी०) अथ निर्णीतिं विना सिद्धीच्छामथार्पत्तेरनु-त्पादात् पक्षताजन्यत्वात् साऽप्यनुमितिर्लाघवेन पक्षताजन्यत्व-स्यैवानुमितित्वे प्रयोजकत्वात् । न चैवं पक्षताप्रत्यक्षस्यापि तथा-त्वापत्तिः । इच्छासत्त्वेऽपि कालान्तरे वा तद्विरहसत्त्वेनैककाली-नत्वाद्यतीन्द्रियघटितप्रतियोगित्वेन तस्या अतीन्द्रियत्वादिति चे-न्न । अनुमिताविव पक्षताया हेतुत्वस्य निरस्तत्वात् साध्यादिभे-देनाननुगतत्वात् तज्जन्यत्वस्याप्रयोजकत्वाच्च । प्रयोजकत्वं च न जनकत्वमसम्भवात्, न व्याप्यत्वं मानाभावादित्यादेरसकृदावे-दितत्वाच्च । एतेन व्याप्तिज्ञानादिजन्यत्वमनुमितित्वे प्रयोजक-मित्यपि परास्तम् ।

साध्याभावव्यापकाभावप्रतियोगिधर्मत्वेन व्याप्यत्वानुमानात् प्रसिद्धसाध्यकैवानुमितिरसपि केचित् ।

(गा०) साऽपि—अन्यथानुपपत्तिज्ञानजन्यधीरपि । अनुमितिरिति । तथाच न तत्करणं प्रमाणान्तरमित्यर्थः ।

नन्वन्वयव्याप्तिज्ञानाजन्यतया पक्षताजन्याऽपि सा न प्रकृतानु-मितिसामग्रीजन्येति न तत्रानुमितित्वप्रयोजकरूपवत्त्वमित्यत आह लाघवेनेति । सामग्रीजन्यत्वापेक्षयेत्यादिः । परामर्शजन्यत्वस्य व्या-

प्यवत्पक्षवैशिष्ट्यप्रत्यक्षादिसाधारणतयाऽनुमितित्वप्रयोजकत्वासम्भवात् पक्षताजन्यत्वनिवेशस्यावश्यकत्वादिति भावः। एवम्-पक्षताजन्यत्वमात्रस्य तथात्वे । तथात्वापत्तिः—अनुमितित्वापत्तिः । तत्रापि विषयतया पक्षताया हेतुत्वादिति भावः ।

पक्षताया प्रत्यक्षमेव न सम्भवतीत्याह इच्छेति । एककालीनत्वादिति । एकक्षणावच्छिन्नसामानाधिकरण्यरूपातीन्द्रियानुमित्साविरहसम्बन्धघटितप्रतियोगितावच्छेदकत्वेनेत्यर्थः । तस्याः—पक्षतायाः । अनुमितिहेतुत्वमभ्युपेत्यापि संनियतस्यैव प्रयोजकत्वमित्याशयेन दूषयति साध्यादीति । व्याप्यत्वमेव प्रयोजकत्वे तन्त्रम् , अन्यथा सामग्या अप्यननुगमेन तज्जन्यत्वस्यापि प्रयोजकत्वासम्भवादित्याशंक्य प्रयोजकत्वस्य दुर्वचतां परामर्शग्रन्थोक्तां स्मारयति प्रयोजकत्वं चेति ।

एतेन-प्रयोजकताया दुर्वचत्वेन। व्याप्तिज्ञानजन्यत्वम् अनुभवत्वन्यूनवृत्तिधर्मावच्छिन्नव्यापकताज्ञानजन्यत्वम् । अनुभवत्वन्यूनवृत्तिधर्मावच्छिन्नत्वविशेषणाद्विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिव्युदासः । अन्वयव्यतिरेकव्यापकतयोरनुगमासम्भवादाह-आदीति । तेनाभावज्ञानजन्यतालाभः। न चैवमप्यभावादिज्ञानानुव्यवसाये तद्विषयकत्वघटितधर्मावच्छिन्नजनकतानिरूपितजन्यताविवक्षणेऽप्यभावादिघटिताकांक्षादिज्ञानजन्यशाब्दबोधेऽतिप्रसङ्गो दुर्वार इति वाच्यम् । तज्जन्यत्वपदेन तत्करणकत्वविवक्षणात् । शाब्दबोधे च पदज्ञानत्वेनैव करणतयाऽतिप्रसङ्गविरहात् ।

व्यतिरेकिस्थलेऽपि अन्वयव्याप्तिज्ञानादेव साध्यनिश्चयो न तु व्यतिरेकव्याप्तिज्ञानात् , अन्वयसहचाराभावेनान्वयव्याप्तिप्रत्यक्षानुपपत्तावपि व्यतिरेकव्याप्त्या तदनुमानसम्भवात् इति,कल्पानुमितिरेवेति न प्रमाणाधिक्यमिति सिद्धान्तं समर्थयतां मतमुपन्यस्यति साध्याभावेति ।

ननु साध्याप्रसिद्धिस्थले हेतौ साध्यव्याप्यत्वानुमानसम्भवेऽपि अप्रसिद्धाभावसाध्यकस्थले साध्यव्याप्यत्वस्यापि प्रसिद्ध्यभावेन नानुमितिः सम्भवतीत्यत आह प्रसिद्धसाध्यकैवेति । साध्याप्रसिद्धिस्थले तन्निश्चयस्यैवानभ्युपगमात्तन्निश्चयस्थले प्रतियोग्यादीनां खण्डशः प्रसिद्ध्यधीनसाध्यप्रसिद्ध्यादेः कल्पनादिति भावः । न चा-

न्वयव्यतिरेकव्याप्त्योः व्याप्यव्यापकभावाज्ञानदशायामपि व्यतिरेकिहेतुना साध्यनिश्चयस्यानुभविकत्वादनुपपत्तेः प्रमाणान्तरत्वमावश्यकमिति वाच्यम्। तद्व्याप्यव्यापकभावघटकसकलपदार्थोपस्थितिसत्त्वेन मानसतज्ज्ञानस्य प्रकृतहेतुनिष्ठप्रकृतसाध्यान्वयव्याप्तिमानसस्यापि व्यतिरेकव्याप्तिज्ञानदशायां सर्वत्र सम्भव इत्याशयात् । अनुमितिस्थले साध्यस्य मानसनिश्चयसंभवेऽप्यनुमिनोमीत्यनुव्यवसायबलादनुमानस्यैव साध्याभावव्यापकाभावप्रतियोगित्वरूपान्यथानुपपत्तिज्ञानकालीननिश्चयेऽर्थापयामीत्यनुभवबलादर्थापत्तेः प्रमाणान्तरत्वं दुर्वारमित्यस्वरसः केचिदित्यनेन सूचितः ।

(दी०) अथ वह्न्याद्यभाववति धूमादेः समवायेन तन्तुत्वाद्यभाववति च पटादेः संयोगेन वर्त्तमानत्वात् साध्याभाववति च संयोगेन समवायादिना वर्त्तमानस्य विशिष्यैवाभावो वाच्यः, तथा च जलं जातिमद्गुणवत्त्वात्, गुणवच्च घटादेरित्यादिकं विलीयेत–जातिगुणाभाववतोः समवेतत्वसंयोगित्वयोरप्रासिद्धेरिति चेत् । उपदर्शयैनमपि केवलान्वयिनः सरणिम्, स्वीकुरु वा स्वाधिकरणावृत्तिसाध्याभावादिकत्वमेव व्याप्तिम्, स्वत्वानुगमस्य प्रागेव स्वहास्तितत्वादिति ।

(गा०) ननु साध्याभाववद्वृत्तित्वस्य व्याप्तित्वे व्यतिरेकिसाध्यकस्थलेऽपि यत्र हेतुतावच्छेदकसम्बन्धशून्य एवाधिकरणे साध्याव्यतिरेकप्रसिद्धिस्तत्र साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या भ्रमं विना तत्रानुमितिर्विलीयेतेत्याक्षेप्तुं प्रथमतो हेतुतावच्छेदकसम्बन्धमुक्त्वा व्याप्तौ निवेशयति अथेति। विशिष्यैवाभावः–तत्तत्सम्बन्धावच्छिन्नसाध्याभाववद्वृत्तित्वत्वेन रूपेणाभावः । वाच्यः–तत्सम्बन्धावच्छिन्नव्याप्तिरूपतया स्वीकार्यः । इत्यादिकम्–समवायसंयोगादिना गुणघटादिहेतुकानुमानम् । अप्रसिद्धेरिति । न च साध्याभाववदनुयोगिकत्वाभाववत्तत्सम्बन्धप्रतियोगित्वविवक्षया नायं दोष इति वाच्यम । वह्निमच्छून्यसंयुक्तघटादीनामपि संयोगादिना वह्न्यादिव्याप्यतापत्तेः–वह्न्यादिमदनुयोगिकतत्संयोगादौ वह्न्याद्यभाववदनुयोगिकत्वाभावसत्त्वात । तादृशाभाववदनुयोगिकत्वाभाव·

वत्त्वप्रतियोगिकसंयोगादिसामान्यकत्वानिवेशो च सामान्यपदार्थस्य व्यापकताघटिततया व्यापकसामानाधिकरण्यापेक्षयाऽपि गौरवात् ।

सामानाधिकरण्यसम्बन्धेन साध्याभावाभाव एव व्याप्तिः जात्यभावादेः समवायघटितसामानाधिकरण्याप्रसिद्धावपि तादृशव्यधिकरणसम्बन्धावच्छिन्नतदभावः सुलभ एवेति तु वृत्त्यनियामकतया सामानाधिकरण्यस्याभावप्रतियोगितावच्छेदकसम्बन्धतानुपपत्त्या हेयम् ।

एतमपि—उक्तानुमानमपि । केवलान्वयिनः सरणिमिति । तथाच विशेषदर्शिनां तत्र जात्याद्यनुमितिर्नोपपद्यत एव किन्तु जात्यादावेव समवाय्यवृत्त्यभावकत्वादिनां तत्र गुणादिसमवेतत्वानुमितिः, साध्याभाववत्समवेतत्वग्रहविरोधिनः साध्याभाववति समवायादिविरहग्रहस्य सत्त्वे उक्तहेतोः सुग्रहत्वादिति भावः ।

स्वाधिकरणावृत्तिसाध्याभावकत्वमिति । तथाच साध्याभाववति समवायाद्यसत्त्वग्रहेऽपि साध्याभावे हेतुसमवाय्यवृत्तित्वग्रहसत्त्वान्नोक्तानुमानानुपपत्तिरिति भावः । न चात्रापि सत्ताभाववान् जातित्वादित्यादौ हेतुमति विरोधिताघटकसम्बन्धेन वृत्तेरप्रसिद्धिग्रहदशायामनुपपत्तिर्दुर्वारैवेति वाच्यम् । तत्र साध्याभाववदवृत्तिसमवेतत्वादिज्ञानादेवानुमित्युपगमात् । व्यापकताज्ञानहेतुतावादिनाऽपि भेदत्वावच्छेदेन हेतुमदवृत्तित्वग्रहदशायां तादृशव्याप्तिज्ञानादेवानुमितेरुपगन्तव्यत्वात् । प्रतियोग्यधिकरणाभिन्नत्वविशेषितहेत्वधिकरणघटितव्यापकतायास्तदा दुर्ग्रहत्वात् ।

न च संयोगसम्बन्धावच्छिन्नघटाभावे साध्ये विषयितया घटादिहेतुकानुमाने का गतिः ? तत्र हेतुमति ज्ञानादौ साध्यरूपाभावप्रतियोगितावच्छेदकसंयोगेन वृत्तेरप्रसिद्धेः, साध्याभाववति च संयोगिनि विषयितारूपहेतुतावच्छेदकसम्बन्धाप्रसिद्धेः, उपदर्शितव्याप्तिद्वयस्यासम्भवादिति वाच्यम् । वृत्त्यनियामकसम्बन्धेन व्याप्तेः प्राचीनैरप्यनभ्युपगमेन तत्र विषयितादिहेतुकानुमानस्यैवोपगमात् ।

नन्वेवं स्वत्वाननुगमात्साधनतावच्छेदकभेदेन व्याप्तेर्भेदप्रसङ्ग इत्यत्रेष्टापत्तिमाह स्वत्वेति । स्वहस्तितत्वादिति । स्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिवादिनापीत्यादिः । तथाऽप्येतन्मते प्रतियोगितावच्छेदकत्वांशस्य सम्बन्धतया निवेशेन लाघवस्यानपायादिति भावः ।

(दी०) एतेन नीलेतररूपवान् नीलासमवेतत्वे सति गोत्वा-दित्यादिकं विलीयेत—विशेष्यस्य व्यभिचारित्वात्, विशिष्टस्य चानतिरिक्तवृत्तित्वादित्यपि परास्तम्। साध्याभावस्य विशिष्टहे-त्वधिकरणावृत्तित्वात् परम्परासम्बन्धेन विशेषणविशेष्यसम्ब-न्धस्यैव वा तत्र हेतुत्वादिति ॥

इति केवलान्वयिदीधितिः ॥

(गा०) साध्याभाववद्वृत्तित्वरूपव्याप्तिपक्षेऽप्यनुपपद्यमाना-याः साध्यव्यभिचारिण्या विशेष्यव्यक्तेर्विशेषणान्तरविशिष्टत्वेन व्याप्यताया निर्वाहरूपमेतत्कल्पावलम्बनप्रयोजनं दर्शयति एते-नेति । नीलरूपवान् व्यक्तिष्वव्यभिचारसत्त्वेन विपरीतविशेषण-विशेष्यनीलरूपवत्समवेतत्वे सति द्रव्यत्वादित्यादिकं नीलरूपाभा-ववति चित्ररूपवति व्यभिचारेणासदनुमानमतो नीलेतररूपसाध्य-कनीलरूपवदसमवेतत्वविशिष्टगोत्वहेत्वनुधावनम्। गोत्वरूपविशे-ष्यप्रवेशाद्गुणकर्मविशेषादौ गगनादौ च न व्यभिचारः। नीलान्यस-मवेतत्वविशिष्टगोत्वे शुद्धगोत्वानतिरेकिणि नीलेतररूपव्यभिचारवि-रहस्यादुर्घटत्वेऽपि समवेतत्वस्य समवेतभेदेन भिन्नत्वे गोत्वविशिष्ट-त्वेन गुणादिव्यावृत्तनीलान्य समवेतत्वव्यक्तिष्वव्यभिचारसत्त्वेन विपरीतविशेषणविशेष्यभावा हेतुकानुमानमेव सुघटं तद्विशिष्ट-गोत्वज्ञानदशायां गोत्वविशि ज्ज्ञानस्यापि सम्भवादिति विशिष्ट-गोत्वहेतुकानुमानविलोपे क्ष विरह इत्यालोच्याखण्डं नीलसम-वेतत्वाभावं विशेषणतयोपा वान्। न च साध्याभाववद्वृत्तितानव-च्छेदकधर्म एव व्याप्तिर्वा था, नीलासमवेतत्वविशिष्टगोत्वत्वेन च गोत्वस्य न नीलगोवृत्तित्व तो विशिष्टगोत्वत्वं तदनवच्छेदकमेवेति वाच्यम्। विशिष्टस्यानति कितया साध्याभाववद्वृत्तितावच्छेदकवि-शेष्यीभूतगोत्वत्वे विशे ान्तराविशिष्टेऽपि तदनवच्छेदकत्वासम्भ-वात्। एतदभिसंधायैव द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्राव्या-प्तिर्नोपदर्शिता। तत्र स्वाश्रयसमवेतत्वसम्बन्धेन गुणकर्मान्यत्ववै-शिष्ट्यमात्रस्य साध्याभाववद्वृत्तितानवच्छेदकतया तदादायैव वि-शिष्टसत्त्वस्य व्याप्यतोपपत्तेः। नीलासमवेतत्वस्य तादृशसम्बन्धेन वैशिष्ट्यं च द्रव्यत्वादिनिष्ठसाध्याभाववद्वृत्तितायामवच्छेदकमि

त्ति न तन्मात्रमादायापि विशिष्टगोत्वादेर्व्याप्यत्वोपपत्तिः ।

अथैतत्कल्पेऽपि द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादावव्याप्तिः साध्याभावस्य विशिष्टसत्तायाः शुद्धसत्त्वानतिरिक्ततया हेत्वधिकरणवृत्तित्वादिति चेन्न । अनुयोगिताविशेषरूपसाध्याभावत्वे स्वाधिकरणवृत्तितानवच्छेदकत्वस्य विवक्षितत्वात् । अनुयोगितायाः प्रतियोगितावच्छेदकादिभेदेन भिन्नतया शुद्धसत्ताभावादिनिरूपिताभावत्वस्य द्रव्यादिवृत्तितावच्छेदकत्वे विशिष्टाभावनिरूपिताभावत्वे तदभावसौलभ्यात् ।

एतेन जात्यभाववान् गुणत्वादित्यादौ साध्याभावस्य द्रव्यत्वादेर्हेत्वधिकरणगुणाद्यवृत्तित्वेऽपि साध्याभावसामान्यमनिवेश्यापि तदुपपत्तिः । प्रतियोगितावच्छेदकाद्यैक्येऽभावव्यक्तिभेदेनानुयोगिताभेदानभ्युपगमात्, गुणत्वादिसाधारणतया साध्यनिरूपिताभावत्वे स्वाधिकरणवृत्तितानवच्छेदकत्वस्य दुर्घटत्वात् ।

अथैवमपि सत्ताभाववान् गुणकर्मान्यत्वे सति द्रव्यान्यत्वादित्यादावगतिरेव विशिष्टहेतुमति साध्याभावप्रतियोगितावच्छेदकसमवायेन वृत्तेरप्रसिद्धेः । साध्याभाववति गुणादौ हेतुघटकविशेष्यवृत्तेर्व्याप्तिद्वयस्यैवानिर्वाहादिति चेत् । एतदभिसन्धायैव विशिष्टहेतुकस्थले विशेष्यविशेषणसम्बन्धस्य हेतुत्वमनुसृतं परंपरयादिना ।

केचित्तु अभावस्यैव भावाभावस्याप्यभावत्वेन वृत्तिर्विशेषणताविशेषणैव नास्तीति प्रत्यये सर्वत्रैकजातीयसम्बन्धावगाहिताया आनुभविकत्वादिति स्वाधिकरणे विशेषणताविशेषणैवावृत्तित्वमभावस्य विवक्षणीयम् । आकाशाभावादेरात्मादौ आकाशाभावत्वेनैव दैशिकविशेषणतया वृत्तिः न तु कालिकसम्बन्धावच्छिन्नस्वाभावाभावत्वेन काल एवाकाशाभावस्य कालिकसम्बन्धावच्छिन्नाभावो नास्तीति प्रत्ययात् । कालिकसम्बन्धावच्छिन्नस्वाभावस्याभावरूपाकाशाभाव आत्मनीत्याद्याधाराधेयभावे प्रत्यये तादृशाभावाभावत्वस्योपलक्षणतयैव भानोपगमादित्याकाशाभावादेः कालिकसम्बन्धावच्छिन्नाभावे साध्य आत्मत्वादिहेतौ नाव्याप्तिरिति तत्तद्विशिष्टहेतुकस्थले स्वाधिकरणेत्यादिव्याप्तिरेव निर्वहतीत्याहुः ॥

इतिश्रीगदाधरभट्टाचार्यचक्रवर्त्तिविरचितानुमानगादाधर्यां केवलान्वयिप्रकरणम् ॥

केवलव्यतिरेकिप्रकरणम् ।

(चि०) केवलव्यतिरेकी त्वसत्सपक्षः । यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः ।

(दी०) व्याप्तिग्रह इति साधारणोक्तिः । तत्र केवलान्वयिन्यभावाच्च । साध्यव्याप्यत्वं तद्वदन्यावृत्तित्वादिरूपमन्ततः साध्य एव प्रसिद्धम् ।

(गा०) केवलव्यतिरेकी त्वसत्सपक्ष इति मूलम् । यथाश्रुतैतल्लक्षणं साध्यसाधनोभयवत्तया निश्चीयमानधर्मिरूपसपक्षपदार्थस्य सिद्ध्यसिद्धिभ्यां पराहतमिति तदर्थमाह यत्र व्यतिरेकसहचारेणेति । व्यतिरेकसहचारेणैवेत्यर्थः । तथाचागृहीतव्याप्तिकं केवलव्यतिरेक्यनुमानलक्षणमिति पर्यवसितम् ।

तत्र व्याप्तिपदस्यान्वयव्याप्तिपरत्वे गृहीतव्याप्तिभेदाद्भेदः व्यातिरेकिणि व्यतिरेकव्याप्तेरेव गमकतेति स्वमतसाधारण्यानुपपत्तिरत आह दीधितौ व्याप्तिग्रह इतीति । साधारणोक्तिरिति-मतभेदेनान्वयव्याप्तिव्यतिरेकव्याप्त्युभयपरमित्यर्थः । मतभेदेन लक्षणभेदात् अनुगतरूपेण व्याप्त्योरुपादानमनुचितमिति शब्दस्यैव साधारणत्वमुक्तम् । स्वमते व्यतिरेकव्याप्तेरेव व्यतिरेकसहचारग्राह्यतया व्यतिरेकसहचारेण व्याप्तिग्रह इत्यस्य व्यतिरेकव्याप्तिग्रह एवानुमित्यङ्गमित्यर्थे पर्यवसानात्प्रकृतानुमित्यौपयिकव्याप्तित्वव्यापकव्यतिरेकव्याप्तित्वकत्वमित्यत्र एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यमित्यनेन सूचिते लक्षणे पर्यवसानमित्यवधेयम् । पूर्वपक्षिणा मीमांसकेन केवलान्वय्यनुमानानभ्युपगमात्तेन केवलान्वयिन्यभावाच्चेत्यनेन केवलान्वय्यनुमानानुपपत्तिप्रदर्शनमसङ्गतमतस्तत्रेत्यादौ पूरयति तत्रेति । नैयायिकस्येत्यर्थः । तथाच नैयायिकस्य स्वमतसिद्धकेवलान्वय्यनुमानानुपपत्त्या व्यतिरेकव्याप्तिधियोऽनुमितिहेतुत्वोपगमो न युक्त इति मूलाभिप्रायः । पृथिवीत्वादिहेताविरतभेदरूपसाध्यनिरू-

पितत्वव्यापकसाध्यकरूपान्वयव्याप्तेः स्वत्वघटितायाः पक्षातिरिक्तेऽसत्त्वात् अप्रसिद्ध्या नानुमानसम्भव इति व्यतिरेकव्याप्त्यान्वयव्याप्त्यनुमानाशङ्कया असंगतिरतो व्याचष्टे साध्यव्याप्यत्वमिति। तद्वदन्यावृत्तित्वमिति। अस्यापि साध्यधर्मिकान्योन्याभावगर्भहेतुव्यापकताग्रहप्रतिबध्यव्यभिचारग्रहविरोधित्वेनान्वयव्याप्तिरूपता व्यतिरेकव्याप्तिबुद्धेश्च हेत्वभावे साध्याभाववन्निष्ठाभावप्रतियोगित्वबुद्धावेव विरोधितेत्याशयः।

वस्तुतो यद्धर्मावच्छिन्नाभावव्यापकाभावप्रतियोगितावच्छेदकयद्रूपवान् यः स तद्रूपावच्छिन्नव्यापकतावच्छेदकतद्धर्मावच्छिन्नसमानाधिकरणवृत्तितद्रूपवानिति सामान्यतो व्याप्त्या पक्षधर्मताबलादप्रसिद्धाया अपि पृथिवीत्वत्वावच्छिन्नव्यापकतावच्छेदकेतरभेदत्वावच्छिन्नसमानाधिकरणवृत्तिपृथिवीत्वत्वरूपान्वयव्याप्तेः पृथिवीत्वे ग्रहसम्भव इति मूलाशयः।

ननु पृथिवीतरभिन्नावृत्तित्वरूपसाध्यस्य पृथिवीमात्रवृत्तिधर्मान्तरे प्रसिद्धिरुपगन्तव्या। तत्रापि चेद्व्यतिरेकव्याप्तिहेतुकानुमाना तत्प्रसिद्धिरित्युच्यते तदाऽनवस्था। मानान्तराद्यदि तत्प्रसिद्धिस्तदा पृथिवीत्वेऽपि सा समाना। मानान्तरं च नानुमानान्तरं तत्रापि साध्यप्रसिद्ध्यपेक्षणात्। न प्रत्यक्षं तत्र विपरीतकोटेरप्युपनीतभानसम्भवेन तन्निश्चयासम्भवादित्यत आह अंततः साध्य एवेति। साध्ये साध्यवदन्यवृत्तित्वस्य विरोधेन भानासम्भवादुपनयसहकृतेन तेन न तत्र साध्यवदन्यमात्रवृत्तित्वनिश्चयः सम्भवतीति भावः। उपस्थिताभावानामन्यत्रापि कदाचिन्मानसात्तन्निश्चयसम्भवेनांतत इत्युक्तम्।

(चि०) ननु व्यतिरेकि नानुमानं व्याप्तिपक्षधर्मताज्ञानस्य तद्धेतुत्वात्। अत्र च व्यतिरेकिसहचारात्तत्र व्याप्तिरन्वयस्य न पक्षधर्मता। न च व्याप्तिपक्षधर्मत्वं साध्याभावव्यापकाभावप्रतियोगित्वं द्वयमनुमितिप्रयोजकमिति वाच्यम्। अननुगमात्। न चान्यतरवत्त्वं तथा, एकप्रमाणपरिशेषापत्तेः। न

च तृणारणिमणिन्यायेनानुमितिविशेषे तत्कारणत्वमिति वाच्यम् । व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः—उभयसिद्धक्लृप्तत्कारणस्याभावात् । न च साध्याभावव्यापकाभावप्रतियोगित्वमेवानुमितिप्रयोजकमिति वाच्यम् । गौरवात्, केवलान्वयिन्यभावाच्च । अथ साध्याभावव्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमेवानुमीयते, एवं व्यतिरेकव्याप्त्याऽन्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते इति । तन्नान्वयव्याप्तिगर्भकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः । अन्वयव्याप्त्यनुकूलतया च तदुपन्यासेऽन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वादिति ।

उच्यते निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते प्रतियोग्यनुयोगिभावस्य नियामकत्वात् । न चैवं व्याप्तिग्रह एव पृथिवीतरभिन्नेति भासितं, नियतसामानाधिकरण्यरूपत्वाद्व्याप्तेरिति चेत् । सत्यम् । गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात् । अत एवाचार्यैः पक्षतावच्छेदके न हेतुत्वमनुमेने । पृथिवीत्वमितरभेदव्याप्यमिति प्रतीतावपि सर्वा पृथिवी इतरभिन्नेति पृथिवीविशेष्यकबुद्धेर्व्यतिरेकिसाध्यत्वाच्च ।

(दी०) निरुपाधीति । उपाधिज्ञानाहितव्यभिचारज्ञाननिरासाय पृथिवीत्वमिति । पृथिवीत्वमितरभेदव्याप्यमित्यत्र हि पृथिवीत्वत्वाविशिष्टे पृथिवीत्वे इतरभेदसामानाधिकरण्यं भासते । पृथिवीतरभिन्नेत्यत्र शुद्धपृथिवीत्वविशिष्टे तदवच्छेदेनेतरभेद

इति न सिद्धसाधनमित्यर्थः। सर्वेति च पृथिवीत्वस्यावच्छेदकत्वस्फोरणाय। अत्र च पृथिवीत्ववत्त्वं पृथिवीतरासमवेतत्वमात्रं न तु पृथिवीवृत्तित्वघटितमित्यतोपि नोपनयवैयर्थ्यम्।

(गा०) निरुपाधीति मूलं उपाधिज्ञानाभावसहितेत्यर्थकं तदसाचस्य व्याप्तिज्ञानकरणतया तत्सत्त्वप्रदर्शनस्य व्यभिचारज्ञानाभावरूपकारणसमवधानप्रदर्शनपरतया सङ्गमयति निरुपाधीति। व्यभिचारज्ञाननिरासाय-व्यभिचारज्ञानाभावसाहित्यलाभाय। पृथिवीत्वरूपपक्षतावच्छेदके साध्यसामानाधिकरण्यविषयकस्य तद्धेतुकव्याप्तिग्रहस्यानुमित्यप्रतिबन्धकत्वं तदुभयविषयतावैलक्षण्याप्रयुक्तमिति पृथिवीत्वमितरभेदव्याप्यमित्यादिमूलाभिप्रेतम्। तत्रानुमितेः पृथिवीविशेष्यकत्वकथनात् व्याप्तिग्रहे पृथिवीत्वस्य विशेष्यता अनुमितौ तद्विशिष्टस्येत्येतावदेव तदभिप्रेतमिति भ्रमनिरासाय दर्शिताकारसूचितमन्यदपि वैलक्षण्यं स्पष्टयति शुद्धेति। स्वरूपतो भासमानेत्यर्थः। हेतुभिन्नसर्वत्वस्य पक्षतावच्छेदकत्वे हेतुपक्षतावच्छेदकभेदेन सिद्धसाधनपरीहारकत्वान्नास्य कल्पान्तरतासम्भव इति सूचनाय सर्वत्वस्य पक्षतावच्छेदकत्वाभिप्रायेण न सर्वपदोल्लेख इत्याह सर्वेति चेति। अवच्छेदकत्वस्फोरणायेति। अवच्छेदकत्वेन विषयतासूचनायेत्यर्थः।

ननु पृथिवीत्वावच्छिन्नपक्षकस्थले पृथिवीत्ववत्त्वावच्छिन्नस्य हेतुत्वे पृथिवीवृत्तित्वरूपपक्षधर्मतायाः हेतौ लाभात्परार्थस्थले उपनयवैयर्थ्यम्। न च हेतुतावच्छेदकपृथिवीवृत्तित्वघटितधर्मविशिष्टे पृथिवीवृत्तित्वस्योपनयादेव भानान्न तद्वैयर्थ्यमिति वाच्यम्, तथाप्युद्देश्यतावच्छेदकविधेययोरैक्येनोपनयाधीनशाब्दबुद्धेरसम्भवादित्यत आह अत्र चेति। नोपनयवैयर्थ्य-पृथिवीवृत्तित्वघटितधर्मविशिष्टे पृथिवीवृत्तित्वस्य निराकांक्षतयाऽन्वयासम्भवेन उपनयस्यार्थाबोधकत्वेनेत्यर्थः। पृथिवीत्ववत्त्वं पृथिवीनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपसकलपृथिवीवृत्तित्वघटितमेवेत्यतोपि नोपनयवैयर्थ्यमिति सूचयितुमतोऽपीत्युक्तम्।

वस्तुतो व्यभिचारावारकतया हेतुतावच्छेदकगर्भसकलपृथिवीवृत्तित्वांशस्य वैयर्थ्येन तदनिवेश एव निर्भरः।

(चि०) यद्वा व्यतिरेकव्याप्तेरेवान्वयेन गम्यगमकभावः । साध्याभावव्यापकसाधनाभावाभावेन साधनेन पक्षे साध्याभावाभावस्य साध्यस्य साधनात् । व्यापकाभावेन व्याप्याभावावश्यंभावात् ।

(दी०) अथान्वयव्याप्तिघटकतावत्पदार्थोपस्थित्यादिकं विना न तद्ग्रहसम्भवः, तत्सत्त्वे च तत एव व्याप्तिग्रहसम्भवे व्यतिरेकसहचारज्ञानस्य हेतुत्वे मानाभावः । न च व्यभिचारशङ्कानिवर्तकत्वेनैवान्वयव्यतिरेकसहचारग्रहयोरुपयोगित्वं, तद्ग्रहेऽपि शङ्कातादवस्थ्यात् । अधिकरणविशेषे च तन्निवृत्तौ साध्यवत्त्वसाधनाभाववत्त्वयोरन्यतरग्रहस्यैव तन्त्रत्वात्, व्यतिरेकव्याप्त्युपन्यासेऽर्थान्तरादितादवस्थ्याच्च । यत्तु सहचारमात्रलाभायैव सर्वत्रोदाहरणोपन्यास इति । तन्न । अर्थान्तराद्यापत्तेर्दुर्वारत्वात्, यच्छब्दादिवैयर्थ्याच्च । व्युत्पादयिष्यते च तस्य व्याप्तिबोधकत्वम् । न चान्वयिन इव व्यतिरेकिणोऽप्युदाहरणात् स्वरससिद्धान्वयव्याप्तिधीरानुभविकी येन तदर्थमपि । प्रकारान्तरमास्थेयमत आह यद्वेति ।

साध्याभावेति । नन्विच्छादिसाध्ये आत्मत्वादेर्व्यतिरेकित्वं न स्यात्, स्याच्च संयोगादेरात्मत्वे तथात्वमिति चेन्न । साध्यतावच्छेदकावच्छिन्नसाध्यासमानाधिकरणत्वेन साध्याभावस्य साधनतावच्छेदकावच्छिन्नसाधनासमानाधिकरणत्वेन च साधनाभावस्य विशेषितत्वात् । संयोगाभावे साध्ये विभागाभावः केवलान्वयी । प्रतियोगिवैयधिकरण्यावच्छिन्ने च तत्र स तादृशो व्यतिरेक्यपि । व्याप्यव्यापकभावश्च साध्याभावत्वसाधनाभावत्वाभ्यां बोध्यः, तेन न व्यभिचारिण्यतिप्रसङ्गः । साध्याभावत्वादिकं च वैज्ञा-

निकं न तु वास्तवं तेन मेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिज्ञानादनुमानम् ।

व्यापकीयत्वेनाभावस्य ज्ञानाद्व्याप्यीयत्वेनाभावस्य सिद्धिं पुनरप्रसिद्धसाध्यकसाधारणीमाह व्यापकाभावेनेत्यादि । अभावौ–अभाववत्त्वनिश्चयौ, अवश्यंभावश्चासति प्रतिबन्धके । अत्र च यद्रूपावच्छिन्नं प्रति व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेनाभावसिद्धिः फलम् । येन रूपेण व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेन व्यापकत्वविशिष्टतत्तद्रूपावच्छिन्नीयत्वेन चाभाववत्ताज्ञानं हेतुरिति मन्तव्यम् ।

(गा०) यद्वेत्यादिकल्पमवतारयितुं पूर्वकल्पेऽस्वरसबीजं दर्शयति अथेत्यादिना । न तद्ग्रहसम्भवः–नान्वयव्याप्तिग्रहसम्भवः, विशेषणज्ञानाभावादिति भावः । तत्सत्त्वे–तावत्पदार्थोपस्थित्यादिसत्त्वे । तत एवेति । व्यतिरेकसहचारज्ञानसहकृतत्वव्यवच्छेदक एवकारः । मानाभाव इति । अन्वयव्यतिरेकानुविधानासिद्धेरिति भावः । व्यतिरेकसहचारेणान्वयव्याप्तिरेवेत्यत्र व्यतिरेकसहचारज्ञानस्य प्रयोजकत्वमेव विवक्षितं न तु कारणत्वमित्यभिप्रायिकामाशंकां निरस्यति न चेत्यादिना । अन्वयव्यतिरेकसहचारग्रहयोरिति । हेतुमत्त्वेन गृह्यमाणधर्मिणि साध्यवत्त्वग्रहोऽन्वयसहचारग्रहः तत्सत्त्वे तादृशे धर्मिणि साध्याभावग्रहासम्भवान्न तदात्मकव्यभिचारग्रहो भवति । एवं साध्याभाववत्त्वेन गृह्यमाणे धर्मिणि साधनाभावावगाहिनो व्यतिरेकग्रहस्य सत्त्वे तादृशधर्मिणि साधनवत्त्वावगाहिनो व्यभिचारज्ञानस्यैव न सम्भव इत्युभयोरेव व्यभिचारशङ्कानिवर्त्तकत्वम् । अत्रान्वयसहचारग्रहस्य तन्निवर्त्तकत्वं दृष्टान्तविधया दर्शितम् । अन्वयसहचारज्ञानस्यापि न स्वातन्त्र्येण व्याप्तिग्राहकता न वा विशेषणज्ञानविधया–तद्घटकपदार्थानां विशृखलोपस्थितितोऽपि विशेष्ये विशेषणमित्यादिरीत्या तद्ग्रहसम्भवादिति, यथा तस्यापि व्यभिचारशङ्कानिवर्त्तकतयैव व्यापकताग्रहोपयोगिता तथा व्यतिरेकसहचारग्रहस्यापि इति पर्यवसितार्थः । उपयोगित्वमित्यत्रैव न चेत्यस्य सम्बन्धः । तद्ग्रहेपि–किञ्चिदधिकरणान्तर्भावे-

ण सहचारग्रहेपि, शङ्कातादवस्थ्यात्—अन्याधिकरणान्तर्भावेण व्यभिचारशङ्कासम्भवात् ।

नन्वेकाधिकरणे सहचारग्रहस्याधिकरणान्तरे व्यभिचारशङ्कानिवर्त्तकत्वाभावेपि तदधिकरणान्तर्भावेन व्यभिचारशङ्कानिवर्त्तकता तिष्ठत्येव तावतापि व्याप्तिग्रहोपयोगित्वमक्षतं तादृशशङ्काया अपि तद्ग्रहपरपन्थित्वादित्यत आह अधिकरणविशेष इति । साध्यवत्त्वसाधनाभाववत्त्वयोरिति । अन्वयसहचारघटकसाध्यवत्त्वांशभानस्येव व्यतिरेकसहचारघटकसाधनाभाववत्त्वांशभानस्यैव व्यभिचारशङ्कानिवृत्त्युपयोगित्वादित्यर्थः । तथा चांशान्तरघटिततत्सहचारग्रहपर्यन्तस्य नोपयोगित्वसिद्धिरिति भावः ।

न च साधनवदिदं साध्याभाववदिति व्यभिचारग्रहप्रतिबन्धकतायां साध्यवत्त्वांशस्येव तद्धर्मितावच्छेदकतया साधनवत्त्वांशस्यापि भानमुपयुज्यते, निर्धर्मितावच्छेदकभानस्य विपरीतज्ञानाविरोधित्वादेव साधनवदिति व्यभिचारग्रहप्रतिबन्धकतायां साधनाभावांशस्येव तद्धर्मितावच्छेदकतया साध्याभाववत्त्वांशग्रहोऽप्युपयुज्यत इति वाच्यम् । समानविषयकत्वेन विरोधित्वमते धर्मितावच्छेदकभानस्यानुपयोगित्वात्, समानधर्मितावच्छेदकत्वेन विरोधितामते साधनादिमत्त्वसमानाधिकरणत्वमात्रेण साध्यादिमत्त्वग्रहस्य तत्सामानाधिकरण्यमात्रेण साध्याभावादिभानाविरोधितया सहचारदर्शनस्यैकाधिकरणान्तर्भावेनापि व्यभिचारग्रहविरोधित्वायोगात् । अयमेव वाऽनुशयो दूषणान्तरानुसरणाबीजम् ।

एवं व्यभिचारशङ्कानिवर्त्तकत्वेन सहचारज्ञानस्य व्यापकताग्रहोपयोगित्वेऽपि कदाचित्स्वतःसिद्धव्यभिचाराग्रहाद्व्यापकताग्रहेण व्याप्तिग्राहकसहचारभेदादनुमानभेदो नोपपद्यत इत्यपि द्रष्टव्यम् ।

व्यतिरेकव्याप्तिज्ञानस्यानुमित्यजनकत्वे पूर्वपक्षोक्ता व्यतिरेकव्याप्तिबोधकोदाहरणप्रयोगानुपपत्तिरपि दुर्वारैवेत्यत आह व्यतिरेकेति । अर्थान्तरादीत्यादिना उक्ताप्राप्तकालत्वादिपरिग्रहः ।

यत्र न साध्यं तत्र न साधनमित्युदाहरणं न व्याप्तिप्रदर्शनपरं अपि तु सहचारमात्रप्रदर्शनायैव तावता व्यभिचारशङ्कानिवृत्तौ स्वत एव मानसो व्याप्तिग्रह इति नानाकांक्षितव्यतिरेकव्याप्तिप्रदर्शनेनार्थान्तरापरयवकाश इति कस्यचित्समाधानमुपन्यस्यति य-

रिवति । अर्थान्तराद्यापत्तेरिति । हेतुप्रयोगानन्तरं गमकतौपयिकव्याप्तेरेवाकांक्षितत्वादिति भावः । यच्छब्दादीति । आदिना वीप्सादिग्रहः । वैयर्थ्यादिति । तदसत्त्वेपि साध्याभाववति न साधनमित्यादित एव सहचारलाभसंभवादिति भावः । उदाहरणस्य व्याप्तिप्रदर्शनपरत्वे तद्बोधार्थमेव तदुपयोग इत्याहुः । व्युत्पादयिष्यत इति । तस्य-यच्छब्दादेः, व्याप्तिबोधकत्वं-व्याप्तिबोधोपयोगित्वं, यत्पदार्थांशे यद्विधेयं तद्व्यापकतायास्तत्पदोपस्थापितांशे यद्विधेयं तत्र भानस्य व्युत्पत्तिसिद्धत्वादिति भावः ।

नन्वेतादृशव्याप्तिज्ञानस्य व्युत्पत्तिसिद्धत्वेऽपि तस्यापदार्थत्वे शाब्दबुद्धौ भानासम्भवात् साध्यवाचकपदस्य समभिव्यापकताविशिष्टस्वार्थलक्षणयैव व्याप्तिबोध उपपादनीयः, तथाच व्यतिरेक्युदाहरणादपि लक्षणया कथंचिदन्वयव्याप्तिलाभो भविष्यतीत्याशङ्क्याह न चेति । तदन्वयव्याप्तिबोधार्थं प्रकारान्तरं-तदन्तर्गतवह्न्यादिपदे हेतुव्यापकत्वादिविशिष्टे स्वार्थे निरूढलक्षणा ।

व्यतिरेकव्याप्तिप्रविष्टसाध्याभावसाधनाभावयोः प्रतियोगिवैयधिकरण्यं निवेशयितुं शङ्कते नन्विति । आत्मत्वादेर्हेतोर्व्यतिरेकित्वं न स्यादिति । व्यतिरेकिलिङ्गतयाऽभ्रान्तपुरुषीयानुमितिप्रयोजकत्वं न स्यादित्यर्थः । जन्येच्छादेरव्याप्यवृत्तितया आत्मादावपि तदभावसत्त्वेन तं प्रति व्याप्यवृत्त्यात्मत्वादिहेत्वभावस्याव्यापकत्वेन व्यतिरेकव्याप्तिप्रमाया अयोगादिति भावः । संयोगादेः-व्यभिचारिहेतोः, आत्मत्वे-साध्ये, तथात्वं-व्यतिरेकित्वं, अव्याप्यवृत्तेः संयोगादेरभावस्यात्मत्वाभावव्यापकत्वादिति भावः ।

यद्यप्यात्मत्वाभाववति वृक्षादौ संयोगाद्यभावस्याप्यभावसत्त्वान्न तस्यात्मत्वाद्यभावव्यापकत्वं व्यापकताव्याप्तिलक्षणप्रविष्टतद्भिन्नाभावे प्रतियोगिवैयधिकरण्यविशेषणस्यात्र प्रयोजनविरहेणानिवेशात् । न च तत्र तदनिवेशे द्रव्यभिन्नं संयोगिभेदादित्यत्राव्याप्तिः संयोगिभेदाभावस्य संयोगस्य साध्याभाववति द्रव्येऽभावसत्त्वेन साध्याभावव्यापकत्वासम्भवादिति वाच्यम् । संयोगादिभेदाभावस्य संयोगरूपत्वेपि संयोगिभेदाभावत्वेन व्याप्यवृत्तिताया आवश्यकत्वात्, अन्यथोत्पत्तिकाले घटादौ संयोगो नास्तीतिवत् संयोगिभेदाभावो नास्तीति प्रतीत्यापत्तिरिति, हेत्वभावत्वेन साध्याभा-

वव्यापकतायाः आवश्यकत्वात् । तथापि तद्वन्निष्ठाभावप्रतियोगितानवच्छेदकहेत्वभावत्वरूपव्यापकतानिवेशे घटाभावादिरूपे व्यभिचारिण्यतिप्रसङ्गः घटाभावाद्यभावत्वस्य समनियतघटत्वाद्यपेक्षया गुरुत्वेनाभावप्रतियोगितानवच्छेदकत्वात्, अतस्तद्वयत्किञ्चिद्व्यक्त्यवृत्तित्वविशिष्टसामान्यकं यद्यत्तदन्यप्रकृतहेत्वभावत्वमेव तद्व्यापकत्वं प्रकृते विवक्षणीयम् तथाच संयोगाभावादेः साध्याभाववद्यत्किञ्चिद्व्यक्त्यवृत्तित्वविशिष्टसामान्यकत्वासम्भवात्तेन रूपेण व्यापकत्वमक्षुण्णमेवेति अतिव्याप्तिसङ्गतिः ।

साध्यतासाधनतावच्छेदकयोः साध्यतासाधनतावच्छेदकावच्छिन्नाभावप्रतियोगितावच्छेदकत्वेन निवेशः शिरोवेष्टनेनेत्यादिन्यायेनानुचित इत्याशयेन ताद्रूप्येणैव तन्निवेशयन् तदवच्छिन्नवैयधिकरण्यमभावद्वये निवेशयति साध्यतेति । तदवच्छिन्नासामानाधिकरण्यं–तदवच्छिन्नानधिकरणवृत्तित्वविशिष्टत्वम्, एवञ्च साध्याभावत्वादिनिवेशवैयर्थ्यात् साध्यतावच्छेदकावच्छिन्नानाधिकरणवृत्तित्वविशिष्टव्यापकतावच्छेदकसाधनतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टत्वाश्रयप्रतियोगित्वमिति पर्यवसितार्थः । विशिष्टसत्तावान् जातेर्द्रव्यं विशिष्टसत्त्वादित्यत्रातिव्याप्त्यव्याप्त्योर्वारणाय साध्यतावच्छेदकावच्छिन्नसाधनतावच्छेदकावच्छिन्नयोर्निवेशः ।

नन्वेवं संयोगाभाववान् विभागाभावात् एतत्संयोगाभाववान् एतद्विभागाभावादित्यादौ प्रतियोगिरूपसाध्यहेतुव्यतिरेकयोर्व्याप्तिग्रहादभ्रान्तस्यानुमितिर्न स्यात्–साध्याद्यसामानाधिकरण्यरूपाविशेषणावच्छिन्नव्यतिरेकाप्रसिद्धेरित्याशङ्कामिष्टापत्त्या निराकुरुते संयोगाभाव इति । अत्र संयोगाद्यव्याप्यवृत्तिमात्रप्रतियोगिकाभावो विवक्षितः, न तु संयोगत्वाद्यवच्छिन्नाभावः—तत्संयोगाद्यभावस्य साध्यत्वे व्यतिरेकित्वानुपपत्तेर्न्यूनताप्रसङ्गात्, द्विक्षणमात्रस्थायिद्रव्यस्य सत्त्वे संयोगवति तत्र विभागस्य संयोगाधीनस्यासत्त्वेन प्रतियोगिवैयधिकरण्यानवच्छिन्नयोरपि व्यतिरेकयोर्व्याप्यव्यापकभावासत्त्वेन व्यतिरेकिताया अत्राप्रसक्त्याऽव्याप्तिशङ्काया एवानुदयाच्च । केवलान्वयीति । अभ्रान्तपुरुषं प्रति अन्वयव्याप्त्या गमक इत्यर्थः । विशेषणान्तरानवच्छिन्नयोरेव संयोगविभागाभावयोः

साध्यहेतुभावो व्यतिरकव्याप्त्यसम्भवनियतः न तु विशेषणान्तर-विशिष्टयोरपि तथाभाव इत्याह प्रतियोगीति। तत्र-संयोगाभावे साध्ये, सः-विभागाभावः,तादृशः-प्रतियोगिवैयधिकरण्यावच्छिन्नः। व्यतिरेक्यपीति। व्यतिरेकव्याप्त्यापि गमक इत्यर्थः। तत्र साध्याभावहेत्वभावयोः साध्याद्यसामानाधिकरण्यासम्भवेऽपि साध्यतावच्छेदकावच्छिन्नाद्यसामानाधिकरण्यस्य द्रव्ये सम्भवात्, तत्र साध्यतावच्छेदकप्रतियोगिवैयधिकरण्यावच्छिन्नयोस्तयोरसत्त्वात्, द्विक्षणमात्रस्थायिद्रव्यस्य प्रामाणिकत्वे अत्रापि संयोगविशेषाभावस्य साध्यता बोध्या।

यद्यपि यत्रैककपालक्रियया कपालयोरारम्भकसंयोगकाले कपालान्तरे क्रिया तदनन्तरं कपालयोर्विभागस्तदनन्तरं कपालद्वयसंयोगनाशस्तत्र घटोत्पत्तेः प्रामाणिकत्वे घटो द्विक्षणावस्थायी स्यात्, सैवाप्रामाणिकी उत्पत्तिक्षणे इन्द्रियसंयोगासम्भवेन द्वितीयक्षणे घटप्रत्यक्षासम्भवात्। तृतीयक्षणे तस्यैवासत्त्वात् विषयनाशकाले प्रत्यक्षस्य सविवादत्वात्। फलसन्देहे सामग्र्या अप्यप्रामाणिकत्वेन तल्लिङ्गकानुमानस्याप्यसम्भवात्। न च कपालतत्संयोगादिघटितसामग्र्या अप्रत्यक्षेणापि ग्रहान्न फलैकप्रमाणकत्वमिति वाच्यं, विजातीयसंयोगस्यैव द्रव्यजनकतया तादृशवैजात्यस्य फलाभावेनानभ्युपगमसम्भवेन फलानिश्चये सामग्र्यासिद्धेरिति। तथापि यत्र महाघटनाशकाले तदारम्भककतिपयसंयोगा वर्त्तन्ते तत्र द्रव्यारम्भकतावच्छेदकजातेरावश्यकता, अन्यथा तद्वत्सु कपालेषु महाघट एव नोत्पद्येत, एवञ्च तत्र घटोत्पत्तिः सामग्रीबलसिद्धा। तत्र खण्डघटोत्पत्तिपूर्वकालीनैककपालक्रियया तदुत्पत्तिकाले कपालद्वयविभागो द्वितीयक्षणे च तत्संयोगनाशे तद्घटस्य तृतीयक्षणे नाश आवश्यक इति द्विक्षणमात्रस्थायिद्रव्यं प्रामाणिकं भवति। साध्याभावत्वसाधनाभावत्वाभ्यामिति। साध्यानधिकरणवृत्तित्वविशिष्टसाधनानधिकरणवृत्तित्वविशिष्टत्वाभ्यां इत्यर्थः। व्यभिचारिण्यतिप्रसङ्ग इति। धूमाद्यभावस्यापि ह्रदवृत्तित्वादिविशिष्टत्वेन वह्न्याद्यभावव्याप्यत्वाद्वह्न्याद्यभावत्वादिना धूमाद्यभावत्वावच्छिन्नव्यापकत्वादिति भावः।

नन्वभावे प्रमेयत्वादिप्रतियोगिकत्वभ्रमदशायां प्रमेयत्वाभावो-

ऽभिधेयत्वाभावव्यापक इत्यादि प्रमात्प्रमेयत्वादिनाऽभिधेयत्वाद्य-नुमितेरनुपपत्तिः साध्याभावहेत्वभावयोरप्रसिद्ध्या तत्त्वेन व्याप्य-व्यापकभावग्रहरूपकारणासम्भवादित्यत आह साध्याभावत्वादिकं चेति। वैज्ञानिकमिति। साध्यीयत्वाभावत्वादिना भासमानत्वरूपतया ज्ञानघटितमित्यर्थः। तथाच साधनीयत्वधर्मितावच्छेदकतया भा-समानेऽभावत्वे साध्यधर्मितावच्छेदकतया भासमानाभावत्वाव-च्छिन्ननिरूपितव्यापकतावच्छेदकत्वज्ञानं हेतुर्न तु वास्तवसाध्या-भावत्वावच्छिन्ननिरूपितव्यापकताज्ञानमित्यर्थः।

मूले साध्याभावव्यापकसाधनाभावाभावेनेति। साध्याभावव्या-पकतया भासमानो यः साधनाभावस्तदभावतया तत्प्रतियोगितया वा पक्षे ज्ञायमानेनेत्यर्थः। साध्यभावाभावस्य–साध्याभावविरोधि-तावच्छेदकरूपावच्छिन्नस्य, साध्यस्य साधनात्–सिद्धेरानुभविक-त्वात्। व्यापकाभावेन व्याप्याभावावश्यंभावादिति नोक्तार्थे हेतुः–य-द्रूपावच्छिन्नसत्त्वे यद्रूपावच्छिन्नसत्त्वावश्यंभावस्तद्रूपाच्छिन्नज्ञाना-त्तद्रूपावच्छिन्नसिद्धेरनियमात्। केवलधूमत्वावच्छिन्नाज्ञानाद्वह्नित्वाव-च्छिन्नासिद्धेः। व्यापकाभावत्वेन निश्चितात् व्याप्याभावनिश्चयावश्यं-भावादित्यस्य तदर्थत्वेपि तत्सिद्धौ तत्सिद्ध्यवश्यंभावस्य हेतुत्वास-म्भवादुक्तहेतुत्वेन तदभिधानासङ्गतिः। अन्वयेन व्यतिरेकव्याप्तेर्गस्य-गमकभावेपि नास्य हेत्वन्तरता अस्यैवार्थस्य साधनादित्यन्तेनोक्त-त्वादित्यतः पूर्वं साध्याभावत्वसाधनाभावत्वाभ्यां व्याप्यव्याप-काभावज्ञानाद्धेतुमत्त्वेन ज्ञातपक्षे साध्यसिद्धेरानुभाविकत्वम् व्य-तिरेकव्याप्तेर्गमकताहेतुत्वेनोक्तम्।

इदानीमप्रसिद्धस्याभावरूपसाध्यस्य प्रतियोगितावच्छेदको यो धर्मस्तदवच्छिन्नव्यापकतावच्छेदकावच्छिन्नीयत्वेनाभावरूपत्वे-नाभावरूपहेतुमत्ताज्ञानात्तद्धर्मावच्छिन्नीयत्वेनाभावसिद्धेस्तथात्व-मित्याह व्यापकीयत्वेनेति। अप्रसिद्धसाध्यकसाधारणीमिति। तेन पृथिवीतरभेदादिरूपसाध्यस्य पक्षमात्रवृत्तितया प्रसिध्यसम्भ-वात् साध्याभावत्वेन हेत्वभावव्याप्यताग्रहो न सम्भवतीति सा-मग्र्यन्तरकल्पनमावश्यकमिति सूचितम्।

यद्यप्येकदेश्यनुमताप्रसिद्धसाध्यकानुमितिप्रकारस्यात्रैव मूल-काराभिप्रेतत्वे—ननु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वा-

दिति व्यतिरेकिणि साध्यमप्रसिद्धमित्यादि–पूर्वपक्षानवतारः, पक्षैकदेशे साध्यप्रसिद्धिमालंब्य समाधानासंगतिश्च । तथापि साध्याभावत्वहेत्वभावत्वाभ्यां व्याप्तिग्रहरूपा प्रथमोक्तसामग्री तत्र न सम्भवति प्रतियोगिज्ञानं विना व्यतिरेकव्याप्तिनिरूपणासम्भवात् । द्वितीयसामग्रीतोपि न तत्रानुमितिसम्भवः साध्यसन्देहरूपपक्षताविरहात् । अप्रसिद्धस्य विशेषणस्य ज्ञानविरहेण प्रकारतया भानासम्भवेनानुमितेः साध्याविशेषणकत्वानुभवविरोधश्चेति पूर्वपक्षाशयेन सन्दर्भशुद्धिनिर्वाहः ।

साध्यसन्देहो न पक्षता अपि तु सिद्ध्यभावः अनुमितेः साध्यविशेष्यकत्वं नानुभवविरुद्धम् । यदि चान्वयव्याप्तिबोधमन्तरेणापि पृथिवीतराभिन्नेत्याद्यनुमितिरानुभाविकी, तदाऽभावविशेष्यकानुमित्यनन्तरमेव तादृशानुमितिरुपगन्तव्या पूर्वानुमितेरेव विशेषणज्ञानत्वात् । यथा प्रतियोग्यधिकरणज्ञानसत्त्वेऽज्ञातोऽभावः प्रत्यक्षे विशेष्यतयैव भासते अनन्तरं च विशेषणतया विशेषणज्ञानस्य वृत्तत्वादित्येकदेशिमतस्याप्यन्ये त्वित्यादिना उपन्यासः सङ्गच्छत इति व्यापकाभावेनेत्यादिमूले व्यापकाभावनिश्चयाद्व्याप्याभावसिद्धिलाभायाभावपदद्वयमभावनिश्चयार्थकतया व्याचष्टे अभावावि-ति । व्यापकाभावनिश्चयेऽपि प्रतिबन्धकबाधबुद्ध्यादिसत्त्वे व्याप्याभावानिश्चयात्तन्निश्चयावश्यंभावकथनासङ्गतिरतःपूरयति अवश्यंभावश्चेति । व्यापकत्वावच्छिन्नप्रतियोगिताकोऽभावो व्यापकाभावनि[illegible]यात्सिध्यतीति मूलाशयभ्रमनिरासायाह यद्रूपावच्छिन्नं प्रतीति। यद्रूपावच्छिन्नप्रतियोगिताकत्वविषयिणीत्यर्थः।फलमिति। व्यापकभावनिश्चयफलमित्यर्थः । प्रतियोगितायां व्याप्यताघटकसम्बन्धावच्छिन्नत्वज्ञाननियमश्च व्याप्तिवादे सिद्धान्तलक्षणव्याख्यावसरे प्रपञ्चित इति नात्र तत्कथनम् ।-व्यापकस्य द्वित्वावच्छिन्नाभावनिश्चयात् व्याप्याभावासिद्धेराह येन रूपेणेति । यद्रूपे व्यापकतावच्छेदकत्वं गृह्यत इत्यर्थः । तद्रूपावच्छिन्नीयत्वेनाभाववत्ताज्ञानमिति योजना । सम्बन्धविधया तद्रूपावच्छिन्नप्रतियोगिताकत्वावगाह्यभाववत्ताज्ञानमित्यर्थः । एवं सति तद्धर्मावच्छिन्नप्रतियोगिधर्मिकव्यापकताज्ञानं पृथक् तद्धर्मावच्छिन्नाभाववत्ताज्ञानमप्यनुमितिजनकम् । विशिष्टपरामर्शस्यैवानुमितिहेतुत्वमिति नैयायिकाभिमतनियमश्चान्वयिस्थले इत्याशयः ।